# POETICS AND AESTHETICS (V)

## M.A. (Sanskrit)

## Semester-II, Paper -IV


**Director**

# Dr.Nagaraju Battu

M.H.R.M., M.B.A., L.L.M., M.A. (Psy), M.A., (Soc), M.Ed., M.Phil., Ph.D.

Centre for Distance Education

Acharya Nagarjuna University

Nagarjuna Nagar-522510

Phone No.0863-2346208, 0863-2346222,

0863-2346259 (Study Material)

Website: www.anucde.info

e-mail: anucdedirector@gmail.com

## *FOREWORD*

***Since its establishment in 1976, Acharya Nagarjuna University has been forging ahead in the path of progress and dynamism, offering a variety of courses and research contributions. I am extremely happy that by gaining 'A' grade from the NAAC in the year 2016, Acharya Nagarjuna University is offering educational opportunities at the UG, PG levels apart from research degrees to students from over 443 affiliated colleges spread over the two districts of Guntur and Prakasam.***

***The University has also started the Centre for Distance Education in 2003-04 with the aim of taking higher education to the door step of all the sectors of the society. The centre will be a great help to those who cannot join in colleges, those who cannot afford the exorbitant fees as regular students, and even to housewives desirous of pursuing higher studies. Acharya Nagarjuna University has started offering B.A., and B.Com courses at the Degree level and M.A., M.Com., M.Sc., M.B.A., and L.L.M., courses at the PG level from the academic year 2003-2004 onwards.***

***To facilitate easier understanding by students studying through the distance mode, these self-instruction materials have been prepared by eminent and experienced teachers. The lessons have been drafted with great care and expertise in the stipulated time by these teachers. Constructive ideas and scholarly suggestions are welcome from students and teachers involved respectively. Such ideas will be incorporated for the greater efficacy of this distance mode of education. For clarification of doubts and feedback, weekly classes and contact classes will be arranged at the UG and PG levels respectively.***

***It is my aim that students getting higher education through the Centre for Distance Education should improve their qualification, have better employment opportunities and in turn be part of country's progress. It is my fond desire that in the years to come, the Centre for Distance Education will go from strength to strength in the form of new courses and by catering to larger number of people. My congratulations to all the Directors, Academic Coordinators, Editors and Lesson-writers of the Centre who have helped in these endeavours.***

**Prof. P. Raja Sekhar**
**Vice-Chancellor**
**Acharya Nagarjuna University**

॥ श्रीः ॥

# ध्व न्या लो कः

## ‘दीधिति’ संस्कृत-हिन्दी विवृत्या विलसितः

### प्रथम उद्द्योतः

स्वेच्छाकेसरिणः स्वच्छस्वच्छायायासितेन्दवः ।
त्रायन्तां वो मधुरिपोः प्रपन्नार्तिच्छिदो नखाः ॥

ध्वनिवृत्तिकर्तृवाणीं, विषमां व्याख्यातुमुद्यतः सहसा ।
प्रयतः [illegible]म्य वाणीं, करुणावरुणालयस्वान्ताम् ॥ १ ॥

महसाऽऽलिङ्गितमनिशं किमपि तमश्चारु चिन्तयन् कुतुकात् ।
रचयति बदरीनाथो ध्वन्यालोकस्य दीधिति विवृतिम् ॥ २ ॥

अथ परमप्रशस्तपथाध्वनीनं ध्वनिनिबन्धं व्याचिख्यासुर्विदग्धविद्वच्चूडामणिस्तत्रभवान् राजानकानन्दवर्धनाचार्यः शिष्टाचारपरम्पराऽनुशिष्टं प्रारिप्सितप्रबन्धसमाप्तिप्रचारप्रतिबन्धकप्रत्यूहव्यूहमपोहयितुमाशीर्वादात्मकं मङ्गलं विधाय शिष्यशिक्षायै निबध्नाति—स्वेच्छेति । स्वेच्छया निजनैसर्गिकजगदवनसमीहया, यदृच्छया वा, न तु कृतकर्मवशेन परादेशेन वा, केसरिणः—सिंहस्य; मधुरिपोर्नारायणस्य नृहरेरिति यावत् । स्वच्छया—अवदातया, स्वेषाम्—आत्मनाम्, छायया कान्त्या आयासितः साम्यासादनप्रयत्नं कारितः खेदितो, वा, इन्दुश्चन्द्रमा यैस्तादृशाः । प्रपन्नानां—शरणागतानां प्रह्लादप्रभृतीनाम् । अर्तिच्छिदः—पीडाहारिणः । नखाः वो युष्मान् व्याख्यातॄन् श्रोतॄंश्च, त्रायन्तां रक्षन्त्वित्यर्थः ।

तथाहि—‘स्वेच्छा यदृच्छा स्वच्छन्दः स्वैरिता चेति ते समाः’ इति केशवः ‘छाया त्वनातपे कान्तौ’ इति वैजयन्ती । आयासो यत्नः क्लेशश्च’ इति कल्पद्रुमः । ‘चापाग्रपीडयोरर्तिः’ इति शाश्वतश्च ।

वीणाक्वणनकृतिमें प्रवीणा है धुरीणा तानमें,
पीयूषधाराको बहाती जो मधुर मुसुकानमें।
उस भारतीके चरणकञ्जोंके हमेशा ध्यानमें,
हो मग्न मैं होऊँ सफल ध्वनिकाव्यके गुणगानमें ॥ १ ॥

विद्वज्जनोंसे अत्यन्त समादृत परम प्रशस्त पथ के पथिक ध्वन्यालोक नामक निबन्धकी व्याख्या करनेकी इच्छासे कविकुल शिरोमणि श्रीआनन्दवर्द्धनाचार्य, शिष्टोंके व्यवहार परम्परासे प्राप्त, प्रारिप्सित प्रस्तुत ग्रन्थ की समाप्तिमें रुकावट डालनेवाली विघ्नबाधाओंको दूर करनेकी भावनासे ईश्वरके गुणानुवाद द्वारा आशीर्वाद रूप मंगलका, विद्यार्थियोंके शिक्षार्थ ग्रन्थके आदिमें प्रतिपादन करते हैं—स्वेच्छेत्यादि।

अपनी स्वाभाविक अखिल विश्वकी रचना करनेकी दयापरिपूर्ण इच्छासे (नकि किसी प्रकारके कर्मोंकी परतन्त्रता या किसीके शासनसे) सिंहरूपको धारण करनेवाले मधुरिपु (नारायण) नृसिंह भगवान्के, अत्यन्त निर्मल, अपनी स्वच्छ कान्तिसे चन्द्रमाको भी खिन्न करनेवाले, एवं अपनी शरणमें आगत आर्तजनोंकी पीड़ाओंको नष्ट करनेवाले अनुपम हस्तनख व्याख्याताओं और श्रोताओंकी रक्षा करें।

काव्यस्यात्मा ध्वनिरिति बुधैर्यः समाम्नातपूर्व-
स्तस्याभावं जगदुरपरे भाक्तमाहुस्तमन्ये।
(१) केचिद्वाचां स्थितमविषये तत्त्वमूचुस्तदीयं,
तेन ब्रूमः सहृदयमनःप्रीतये तत्स्वरूपम् ॥ १ ॥

अथ कारिकात्मकं ध्वनिनिबन्धमारभमाणोऽनुबन्धान् दर्शयन् ध्वनिस्वरूपनिरूपणं प्रतिजानीते—**काव्यस्यात्मेति। ध्वनिरिति**—प्रसिद्धः। काव्यस्यात्मा यो बुधैः समाम्नातपूर्वः, तस्याभावमपरे जगदुः। अन्ये तं भाक्तमाहुः। केचित् तदीयं तत्वं वाचामविषये स्थितमूचुः। तेन सहृदयमनःप्रीतये तत्स्वरूपं ब्रूम इत्यन्वयः।

अब श्रोताओंके प्रवृत्त्यर्थ अनुबन्ध चतुष्टयों (अधिकारी, विषय, सम्बन्ध, और प्रयोजन) को बतलाने की इच्छासे कारिका (श्लोकबन्ध) रूपमें ध्वनिनिबन्धका निर्माण करते हुए ग्रन्थकार ध्वनिस्वरूप निरूपणकी प्रतिज्ञा करते हैं—**काव्यस्यात्मा ध्वनिरित्यादि।**

काव्यके मर्मज्ञ विद्वानोंने सरस विदग्ध जनोंके आनन्दजनक शब्दार्थमय काव्यका आत्मा (सर्वस्व) शरीरमें जीवनकी तरह सारभूत जिस प्रसिद्ध ध्वनि

इह स्वेच्छाशब्दस्य विलक्षणैकार्थोपस्थापकत्वात् 'निजस्वात्माभिरसवद्धानां प्रधानक्रियाकर्त्रन्वयित्वम्' इति व्युत्पत्तिविरोधप्रयोज्यो नैवाभवन्मतयोगो दोषः। आतपाभाववाचित्व एव छायाशब्दस्य समासे 'छाया बाहुल्ये' इति पाणिनिसूत्रेण क्लीबत्वस्य व्याख्यातृभिः सिद्धान्तितत्वान्न 'स्वच्छाये' त्यत्र तत्प्राप्तिः। सवर्णदीर्घेण स्वरूपाविपर्यासेऽपि प्रकृते क्लीबत्वमङ्गीकर्तुमसङ्गतम्, 'स्वच्छायया' इत्याचार्यव्याख्यानानुपपत्तेः। स्वच्छशब्दस्य धर्मिवाचकत्वेऽप्युक्तरीत्याऽन्वयसामञ्जस्ये धर्मपरताकल्पनं तु कस्यचिच्चिन्त्यम्। त्राणं च प्रकृतोपयोगितया ग्रन्थसमाप्तिप्रचारप्रतिभटप्रत्यवायशान्तिलक्षणं साहाय्याचरणम्। अतो नासङ्गतिः। भगवतः स्वेच्छाकेसरिता प्राकृतसिंहापेक्षिकं व्यतिरेकमलङ्कारम् 'स्वाच्छन्द्यं द्वारीकृत्य परानियोज्यत्वेन परमैश्वर्यञ्च, मधुरिपुपदं खलनिग्राहकतां विक्रमविशेषञ्च, स पुनः प्रपन्नत्राणौचित्यम्, नखच्छायायाः स्वच्छता शशाङ्ककान्त्यपेक्षया वैलक्षण्यम्, तच्च तदासादनार्थमायासविधानोपपत्तिम्, इन्दुपदं स्वीययावत्सुषमासाम्राज्यशालित्वम्, तस्यापि साम्यासादनायासो नखानां शोभातिरेकस्यासौलभ्यमुखेन स्पृहणीयताम्, बहुत्वं प्रत्येकमपि त्राणसामर्थ्येऽनेकसद्भावे तदवश्यम्भावम्, एकाकिचन्द्रावधिकाधिक्यालाभस्येषत्करत्वं च, प्रपन्नत्वमुपेक्षानर्हताम्, आर्तत्वं झटित्युच्छेद्यताम् क्विप्प्रत्ययस्तच्छेदे नखानां नित्योद्यमम्, स च भगवतो विपक्षोच्छेदोत्साहद्वारकं वीररसम्, नखानां छिदाकर्तृत्वमायुधान्तरापरिग्रहौचितीम्, तीक्ष्णतां च, सा तु रक्षादाक्ष्यम्, समस्तवाक्यार्थो भगवन्नृसिंहविषयककविनिष्ठरतिभावं च सूचयति। इत्थञ्च वस्त्वलङ्काररसादिलक्षणस्त्रिरूपोऽपि ध्वनिरिह स्फुटोऽवगन्तव्यः **'प्रपन्नार्तिच्छिदः'** इत्यादिविशेषणस्य साभिप्रायत्वेन परिकरोऽत्रालङ्कारः श्रुतिवृत्तिच्छेकानुप्रासैः संसृज्यते।

यत्त्वत्र 'पूर्वमेक एवासाधारणवैशद्यहृद्याकारयोगात् समस्तजनाभिलषणीयताभाजनमभवम्, अद्य पुनरेवंविधा नखा दश बालचन्द्राकाराः सन्तापार्तिच्छेदकुशलाश्चेति तानेव लोको बालेन्दुबहुमानेन पश्यति, न तु मामित्याकलयन् बालेन्दुरविरतमायासमनुभवतीत्युत्प्रेक्षाऽपह्नुतिध्वनिरपि इति केचन व्याचक्षते तत्र तदीयमहत्वमनुसन्दधतो वयं परमुदास्महे। तथाहि—प्रतीयमानाऽप्युत्प्रेक्षाऽपह्नुतिश्च तदैवात्र स्वीकर्तुं शक्येते, यदि प्रकृतधर्मिकाप्रकृततादात्म्यसम्भावनायाः, प्रकृतनिषेधपुरस्सराप्रकृतस्थापनायाश्च तयोः सामग्र्याः कथञ्चिदिहोपलम्भः स्यात्। कष्टकल्पना तु न विच्छित्तिरिति सहृदयैर्विभावनीयम् ॥ १ ॥

( वाच्यार्थकी अपेक्षा अधिक चमत्कारजनक सहृदयोंसे आस्वाद्य प्रतीयमान व्यङ्ग्य विशेष ) को बहुत पहले ही कहा है, कुछ विद्वानोंने उस ध्वनिका अभाव ही माना है। कुछ ने तो लक्षणारूप आरोपित गौणी वृत्तिसे ही ध्वनिविषयक प्रतीतिको गतार्थ किया है। बहुतोंने तो ध्वनिके तत्त्वको वाणीसे अवर्णनीय बतलाते हुए उसके स्वरूपका ही खण्डन कर दिया है। इसलिए हम ( ग्रन्थकार ) सहृदय जनोंको आह्लादित करनेके लिये ध्वनिके वास्तविक स्वरूपका प्रतिपादन करते हैं ॥ १ ॥

**बुधैः काव्यतत्त्वविद्भिः काव्यस्यात्मा ध्वनिरिति संज्ञितः परम्परया यः समाम्नातः तस्य सहृदयजनमनःप्रकाशमानस्याप्यभावमन्ये जगदुः। तदभाववादिनां चामी विकल्पाः सम्भवन्ति।**

विप्रतिपत्तीर्वैशद्येन प्रकाशयितुं वृत्तिकारः कारिकां व्याचष्टे—**बुधैरिति**। काव्यस्य तत्त्वविद्भिर्मर्मज्ञैः ( न तु तदनभिज्ञैः, तदुक्तेरिह स्वत एवानुपादेयत्वात् ) बुधैः ( न तु बुधेन, एकस्य भ्रान्तेरपि सम्भवात् ) काव्यस्य सहृदयहृदयाह्लादिशब्दार्थमयस्य, आत्मा ( तं विना काव्यत्वस्यैवास्वीकाराज्जीवनाधायकत्वेन ) प्रधानम्, ध्वन्यते शब्दवाच्यार्थापेक्षयाऽधिकचमत्कारितया प्रतीयते योऽर्थः स ध्वनिरिति योगमर्यादया व्यङ्ग्यविशेषो ध्वनिरित्याख्यामाक्। परम्परयाऽविश्रान्तविबुधधारया यः सम्यगुचितं शासनानुसारं च, आम्नातः—आख्यातः (न तु सद्य एव येन केनचित् कल्पितः ) तस्य ध्वनेः, सहृदयजनानां मनसि प्रकाशमानस्य तदनुभवगोचरस्य अपि अभावम्—असत्ताम्, अपरेऽयुक्ताभिधायित्वादनुपादेयनामानः, जगदुरित्यर्थः। इतिर्लोकेऽर्थपदार्थकस्य शब्दपदार्थकत्वकृत्, इत्यभियुक्तोक्तेरितिशब्देन यदि ध्वनिशब्दस्य योगः, तदा ध्वनिशब्दो विप्रतिपत्तिग्रस्ततया निश्चयविषयाभावादतात्त्विकमर्थं विहाय शब्दस्वरूपमात्रमभिदध्यात्। सहृदयानुभवगोचरतयाऽर्थात्मनो ध्वनेरिह तात्त्विकत्वेन तु तन्नोचितमिति भिन्नक्रममितिशब्दमत्रोररीकृत्य काव्यात्मेत्यनेनैव तस्यान्वयेऽङ्गीकृते, ध्वन्यर्थविवक्षाऽक्षता भवतीति दिक्। ध्वन्यभाववादस्य सम्भावनामात्रविषयतया पारमार्थिकासत्त्वेन परोक्षत्वस्य द्योतको 'जगदुः' इति लिट् प्रायोजीति ध्येयम्।

असम्भवतो वस्तुनः खण्डनमप्ययुक्तिमिति ध्वन्यभाववादिपक्षत्रयस्य सम्भावनामुपदिशति—**तदभाववादिनामिति**। तच्छब्दः प्रकान्तं ध्वनिं परामृशति। **तस्य**—ध्वनेः, अभाववादिनाम्, अमी सम्प्रति निरूप्यमाणाः, विकल्पाः 'शब्दशा-

नानुपाती वस्तुशून्यो विकल्पः' इति पातञ्जलानुशिष्टा 'अत्यन्तासत्यपि ह्यर्थे ज्ञानं शब्दः करोति च' इति ह्युक्तेर्वैयाकरणाभिमतबौद्धपदार्थवच्छाब्दबोधविषया अपि 'आचक्षीरन्' 'ब्रूयुः' 'कथयेयुः' इति लिङुपस्थापितसम्भावनामात्रजीवनतया वस्तुतोऽसन्तः पक्षाः सम्भवन्ति, न तु सन्त्येवेत्यर्थः।

वक्ष्यमाण विप्रतिपत्तियों ( विकल्पों ) को विशद रूप से प्रकाशित करनेके लिए वृत्तिकार मूलभूत कारिकाकी व्याख्या करते हैं—बुधैः काव्यतत्त्वविद्भिरित्यादि पुरातन अनेकों काव्यतत्त्ववेत्ताओं द्वारा काव्यका जीवनाधायक प्रधानभूत 'ध्वनि' इस संज्ञासे अविश्रान्त विबुध-बुद्धिधारा-प्रवाह द्वारा जो उचित अनुशासनके अनुसार प्रतिपादित किया गया है, सरसविद्वज्जनोंसे आस्वाद्यमान उस ध्वनिका अभाव ही जिन्होंने कहा है, उन ध्वन्यभाववादियोंके निम्नप्रकारके तीन विकल्प हो सकते हैं।

**तत्र केचिदाचक्षीरन्—शब्दार्थशरीरं तावत्काव्यम्। तत्र च शब्दगताश्चारुत्वहेतवोऽनुप्रासादयः प्रसिद्धा एव। अर्थगताश्चोपमादयः। वर्णसंघटनाधर्माश्च ये माधुर्यादयस्तेऽपि प्रतीयन्ते। तदनतिरिक्तवृत्तयो वृत्तयोऽपि याः कैश्चिदुपनागरिकाद्याः प्रकाशिताः, ता अपि गताः श्रवणगोचरम्। रीतयश्च वैदर्भीप्रभृतयः। तद्व्यतिरिक्तः कोयं ध्वनिर्नामेति।**

तत्र प्रथमं पक्षमुपपादयति—**तत्र केचिदिति**। तत्र ध्वन्यभाववादिषु केचित् प्रथमे इति—इत्थम्, आचक्षीरन्नित्यन्वयः। शब्दार्थौ—चमत्कारकः शब्दस्तदर्थश्च शरीरं यस्य तादृशं, तावन्निश्चितम्, काव्यम्। ( नत्वत्र कस्यापि विमतिरिति तावच्छब्दः सूचयति )। तस्यकाव्यस्य ( अवयवे ) शब्दे—गताः—स्थिताः चारुत्वस्य विच्छित्तिविशेषस्य, हेतवः, अनुप्रासादयः शब्दालङ्काराः प्रसिद्धा एव ( न तु ध्वनिवदभिनवाः ) च पुनः, अर्थगताः—वाच्यनिष्ठाः उपमादयोऽर्थालङ्कारा, चारुत्वहेतवः प्रसिद्धा एवेति शेषः। च तथा वर्णानां सार्थकानामनर्थकानां चाक्षराणाम्, सङ्घटनानां सन्दब्धशब्दानां च ( माधुर्यादिव्यञ्जकतया ) धर्माः ( व्यङ्ग्यव्यञ्जकभावेन ) वृत्तिमन्तः माधुर्यौजःप्रसादाः—'राजा भोजो गुणानाह विंशतिं चतुरश्च यान्। वामनो दश तान् वाग्मी, भट्टस्त्रीनेव भामहः' इति सरस्वतीतीर्थदर्शितबाहुविध्या ये गुणाः ( चारुत्वहेतवः ) सन्ति, तेऽपि प्रतीयन्ते, सर्वैरिति शेषः। ( न तु ध्वनिवदप्रसिद्धा इति भावः ) ताभ्यः—सङ्घटनाभ्यः, अनतिरिक्ताऽभिन्ना, वृत्तिर्व्यापारो यासां ताः। यद्वा—'तदनतिरिक्ता' इति पाठे वृत्तिविशेषणत्वे च, तदेकरूपाः,

उप..,गरिका परुषा-ग्राम्याख्यास्तिस्रो वृत्तयोऽपि ( चारुत्वहेतवः ) याः कैश्चिद् भट्टोद्भटप्रभृतिभिः प्रकाशिताः, ता अपि श्रवणगोचरं गताः श्रुताः । न पुनः, वैदर्भीगौड़ीपाञ्चाल्यस्तिस्रो वामनोक्ताः, 'वैदर्भी गौड़ी-पाञ्चालीलाट्य' इति चतस्रो विश्वनाथकथिताः, 'वैदर्भी चाथ पाञ्चाली, गौड़ी चावन्तिका तथा । लाटीया मागधी-चेति, षोढ़ा रीतिर्निगद्यते' इति भोजराजोपदिष्टाः षड् वा तत्स्थानीया रीतयोऽपि (चारुत्वहेतवः) श्रुता एवेति शेषः । तेभ्योऽलङ्कारादिभ्यो व्यतिरिक्तो भिन्नः, अपूर्वः ( नूतनः ) केनाऽप्युच्यमानः, ध्वनिः, को नाम ? न कोऽपीत्यर्थः । 'तद्व्यतिरिक्तः' इत्यत्र तच्छब्देन गुणमात्रपरामर्शप्रकाशकः कस्यचन पक्षस्तु चिन्तनीयः, अलङ्कार-वृत्तिरीतीनामसङ्ग्रहेण प्रक्रमविरोधापत्तेः । वृत्तिरीत्योर्गुणतादात्म्यस्य कथञ्चन स्थापनायामप्यलङ्कारासङ्ग्रहेण तद्दोषतादवस्थ्यात् । यदि नामायं 'ध्वनिर्वास्तवि-कोऽभविष्यत्, तदाऽवश्यं बुधैरलङ्कारादिवत् पर्यचेष्यत । अतः प्रसिद्ध्यभावान्ना-स्त्येव ध्वनिः । नहि प्रेक्षावन्तो व्यक्ति विशेषोक्तिश्रद्धाजाड्येनालीकं वस्तु मन्यन्त इति प्रथमस्य ध्वन्यभाववादस्य भावः ।

उनमें प्रथम पक्षका उपपादन करते हैं—तत्र केचिदाचक्षीरन् इत्यादि ।

प्रथम विकल्पवादी कहते हैं कि—चमत्कार-जनक शब्द और अर्थ ही काव्यका शरीर है क्योंकि इसमें किसीको भी आपत्ति नहीं है। उनमें भी शब्द वृत्ति विच्छित्ति ( चमत्कार ) विशेषजनक अनुप्रास यमकादि शब्दालङ्कार प्रसिद्ध ही हैं, ध्वनिकी तरह कोई कालपनिक वस्तु नहीं। और वाच्यवृत्ति चारुता ( विच्छित्ति विशेष ) जनक उपमादि अर्थालङ्कार भी बहुत प्रख्यात ही हैं, एवं वर्ण—विन्यास-क्रमोंमें मधुरिमा आदिका व्यञ्जक माधुर्य, ओज, प्रसाद आदि अनेकों प्रकारके गुण भी चमत्कारजनक प्रतीत हो रहे हैं, तथा उन वर्णसंघटनक्रमोंसे अभिन्न व्यापार-वाली, उपनागरिका, परुषा, ग्राम्याख्या जो तीन वृत्तियाँ है, वे भी आह्लादजनक प्रतीत हो रही हैं। इसी तरह वैदर्भी, पाञ्चाली, गौड़ी, लाटी, मागधी और आव-न्तिका नामकी रीतियां भी चमत्कृतिविशेष पैदा कर रही हैं । परन्तु इन उक्त अलंकारादिसे भिन्न यह अभिनव कपोलकल्पित इने-गिने व्यक्तियोंसे कथित ध्वनि नामका कौनसा पदार्थ है ? अर्थात् अप्रसिद्ध होनेसे ध्वनि है ही नहीं। बुद्धिमान् व्यक्ति व्यक्तिविशेषकी श्रद्धासे मिथ्याभूत वस्तुको माननेके लिये कभी भी सहमत नहीं होते, यह प्रथम अभाववादीका अभिप्राय है।

अन्ये ब्रूयुः—नास्त्येव ध्वनिः । प्रसिद्धप्रस्थानव्यतिरेकिणः काव्य-प्रकारस्य काव्यत्वहानेः । सहृदयहृदयाह्लादिशब्दार्थमयत्वमेव काव्यलक्ष-

गम् । न चोक्तप्रस्थानातिरेकिणो मार्गस्य तत्सम्भवति । न च तत्समयान्तःपातिनः सहृदयान्कांश्चित्परिकल्प्य तत्प्रसिद्ध्या ध्वनौ काव्यव्यपदेशः प्रवर्तितोऽपि सकलविद्वन्मनोग्राहितामवलम्बते ।

अभाववादिनां द्वितीयं पक्षमुपन्यस्यति—अन्ये ब्रूयुरिति । प्रसिद्धात् प्रतिष्ठन्ते परम्परया गच्छन्त्यनेनेति प्रस्थानं प्राचीनपद्धतिस्तस्मात्, व्यतिरेकिणो भिन्नस्य काव्यप्रकारस्य ध्वन्यात्मकाव्यभेदस्य काव्यत्वहानेः काव्यत्वाभावाद्ध्वनेरभाव इत्यर्थः । यदि ध्वनिः स्वीक्रियेत, तर्हि प्राचीनाचार्यैरननुशिष्टचरं काव्यत्वमप्यनायत्या तत्राङ्गीकरणीयं स्यात् । अनुपदवक्ष्यमाणहेतोर्नेष्टं तु तत् । तथासति 'छिन्ने मूले नैव शाखा न पत्रम्' इति न्यायेन ध्वनिरेव नोररीक्रियतामित्येतत् प्रघट्टकस्य हृदयम् ।

ननु सति लक्षणसमन्वये प्रयत्नशतेनापि तत्त्वं लक्ष्यादपनेतुमशक्यं भवतीत्याक्षेपमपक्षेप्तुं काव्यस्य लक्षणमुक्त्वा ध्वन्यात्मनि लक्ष्ये तस्य समन्वयमपि ब्रवीति—**सहृदयेति** । 'चिन्मयं ब्रह्म' इत्यादौ सामानाधिकरण्यरक्षार्थं 'तत्प्रकृतवचने मयट्' इति सूत्रे तदिति वाक्यभेदस्य नागेशेनोक्तत्वात्तद्योगेनेहापि स्वार्थिको मयट् । सहृदयहृदयाह्लादिनौ शब्दार्थाविव तन्मयं काव्यम्, तस्य भावस्तत्त्वं काव्यलक्षणं तद्वृत्तिस्तदितरव्यावर्तको धर्मः । उक्तप्रस्थानातिरेकिणो मार्गस्य प्रतिपादितालङ्कारगुणादिपरिष्कृतप्रकारभिन्नस्य भवदभिमतध्वन्यात्मकाव्यभेदस्य तत् काव्यलक्षणं यतो न सम्भवति नैव समन्वेति, सहृदयहृदयाह्लादकशब्दार्थाभावात् । तस्मात् काव्यत्वं तत्र नास्तीत्यर्थः । परिगणितेभ्यो गुणादिमत्प्रकारेभ्योऽन्यत्र सहृदयाह्लादकत्वं नानुभविकमिति न काव्यत्वं ध्वनावित्याकूतम् ।

ननु ध्वनौ सहृदयाह्लादजनकत्वाभाव एवासिद्धः, कियतांचित् सहृदयानां ध्वनेरप्याह्लादजननादित्यत आह—**नचेत्यादिना** । तस्य ध्वनेः यः समयः सिद्धान्तः, तदन्तःपातिनस्तन्मध्यगामिनः—तत्स्वीकारिण इति यावत्, कांश्चित् अयोग्यतयाऽज्ञातान् परिमितान् वा सहृदयान् परिकल्प्य वस्तुसद्वैदग्ध्यविरहेऽपि स्वपक्षपोषाय सचेतसः स्वीकृत्य भवद्भिः कथमपि प्रवर्तितयेति शेषः, तस्य ध्वनेः तेषां सहृदयानां वा प्रसिद्ध्या हेतुभूतया, ध्वनौ विलक्षणशब्दार्थयोः काव्यस्य व्यपदेशो-व्यवहारः, प्रवर्तितोऽपि ( भवद्भिर्बलात् ) प्रचारितोऽपि, सकलविदुषां मनोग्राहितां-हृदयङ्गमत्वं नावलम्बते—नाश्रयतीत्यर्थः । मुष्टिमेयैर्भवत्कल्पितसहृदयैः काव्यात्मतया

स्वीकृतोऽपि ध्वनि:, सर्वविद्वदनुभवसिद्धो न भवतीत्यभिप्राय:। 'परिकल्पितत्तत्प्रसिद्ध्या' इति पाठे तु 'सहृदयान्' इत्यत्र द्वितीया नोपपद्यते। इत्थं च—'भवद्भिः प्रवर्तितया' इत्यध्याहार आवश्यकः, 'परिकल्प्य' इति क्त्वाप्रत्ययोत्पत्त्यनुरोधात्। चमत्काराजनकत्वाद्ध्वनिर्नास्तीति द्वितीयाभाववादस्य सारम्।

दूसरे अभाववादीका मत उपस्थित कर रहे हैं—अन्ये ब्रूयुः नास्त्येवेत्यादि। दूसरे ध्वन्यभाववादी कहते हैं कि—ध्वनि है ही नहीं, क्योंकि प्रसिद्ध स्थान (प्राचीन पद्धति) से भिन्न ध्वनिरूप काव्यविशेषमें काव्यत्वका अभाव है, इसलिये ध्वनिका भी अभाव ही मानना चाहिये, यदि ध्वनि वस्तु मानली जाय तो, उसमें प्राचीन आचार्योंका अनभिमत काव्यत्व भी विवशतासे मानना पड़ेगा, परन्तु अग्रिम युक्तियोंसे यह भी मानना ठीक नहीं होगा, इसलिये ध्वनिको ही समूल उच्छिन्न कर देना उचित प्रतीत होता है। क्योंकि सरसविदग्ध जनोंका आह्लाद विशेषजनक शब्दार्थत्व ही काव्यका असाधारण चिह्न है। उक्त अलंकारादि परिष्कृत काव्य-प्रकारसे भिन्न आपके अभिमत ध्वन्यात्मक काव्य विशेषमें सहृदयोंके चमत्कारजनक शब्दार्थका अभाव होनेसे उक्त काव्यका लक्षण नहीं घटता, इसलिये उसमें काव्यत्व भी नहीं है। अपने पक्षकी पुष्टिके लिये ध्वनिके सिद्धान्तोंको माननेवाले विरले ही किन्हीं सहृदय व्यक्तियोंकी मान्यताको अपनाकर उनकी प्रसिद्धिसे ध्वनिमें काव्यका व्यवहार प्रवर्तित करनेपर भी सकल विद्वज्जनोंके हृदयङ्गम नहीं होनेसे सर्वथा मान्य नहीं हो सकता। अतः आह्लादजनक नहीं होनेसे ध्वनि नहीं है, यही द्वितीय अभाववादका सार है।

**पुनरपरे तस्याभावमन्यथा कथयेयुः—न संभवत्येव ध्वनिर्नामापूर्वः कश्चित्। कामनीयकमनतिवर्तमानस्य तस्योक्तेष्वेव चारुत्वहेतुष्वन्तर्भावात्। तेषामन्यतमस्यैव वाऽपूर्वसमाख्यामात्रकरणे यत्किञ्चन कथनं स्यात्।**

ननु प्रथमेनाभाववादिना, ध्वनेः—प्रसिद्धेः, द्वितीयेन तस्य चारुत्वहेतुतायाश्च निरासे कृतेऽपि, क्वचिदेकत्रापि प्रसिद्धस्य तस्य सर्वथाऽपलापः कर्तुमशक्य एवेति शङ्कामपाकर्तुं तृतीयं पक्षमुपदिशति—**पुनरपर इत्यादिना**। अन्यथाऽपूर्वत्वाभावरूपेण प्रकारान्तरेण। अपूर्वः पूर्वोक्तालङ्कारादिभ्यो विलक्षणः—कश्चिदनिश्चितरूपः ध्वनिः नाम निश्चितम् न सम्भवति। कामनीयकं विच्छित्तिविशेषम्, अनतिवर्तमानस्यानतिक्रामतः, तस्य ध्वनेः, उक्तेष्वेवालङ्कारादिषु अन्तर्भावादित्यर्थः। अलङ्काराद्यपेक्षया चमत्कारविशेषाकरणात् ध्वनिस्तेष्वेवान्तर्भवति, ननु तेभ्यो विलक्षण इति ध्वनेरपूर्वत्वनिरसनमुखेन स्वरूपस्यापि निरसने तात्पर्यमिह पर्यवसातव्यम्॥

ननु ध्वनेस्तेष्वेवान्तर्भावे प्रसिद्धाया ध्वनिसञ्ज्ञायाः का गतिरित्यत आह—तेषामन्यतमस्यैवेत्यादिना । वा—अथवा, (ध्वनिसञ्ज्ञाप्रसिद्ध्यनुरोधेन) तेषामलङ्कारादीनाम्, अन्यतमस्य बहूनां मध्य एकस्य कस्यचन एव, नवस्य नवीनस्य अपूर्वसमाख्यामात्रकरणे ध्वनिरिति नूतननाममात्रविधाने (कृते सति) यत्किञ्चनकथनम् अविशिष्टमुपादानं स्यादित्यर्थः । ध्वनिसञ्ज्ञां प्रति श्रद्धाजाड्ये तु, अलङ्कारादिनामेवैकस्य कस्यचन यथारुचि क्रियतां ध्वनिसञ्ज्ञा, न तु तावताऽपूर्वध्वनिसिद्धिरिति तात्पर्यम् । इह 'पूर्वसमाख्यामात्रप्रकरणे' इत्यपपाठस्तु लोचनपर्यालोचनविधुरैः कल्पितः ।

यत्र तत्र 'प्रसिद्ध होते हुए भी उस ध्वनिका बिलकुल अपलाप करना उचित न होगा' इस शङ्काको दूर करनेके लिये तीसरे ध्वन्यभाववादीका मत वृत्तिकार प्रस्तुत करते हैं—पुनरपरे तस्याभावमन्यथा इत्यादि ।

तीसरे ध्वन्यभाववादी ध्वनिका अपूर्वत्वभाव प्रतिपादन द्वारा खण्डन करनेकी भावनासे कहते हैं कि—ध्वनि नामका कोई अपूर्व ( पूर्वोक्त अलङ्कारादिसे भिन्न ) अद्‌भुत पदार्थ हो ही नहीं सकता, क्योंकि नियत रूपसे रमणीयता ( आह्लाद विशेष ) का प्रतिपादक उस ध्वनिका उन्हीं पर्वोक्त चमत्कार विशेष जनक अलङ्कारादिमें अन्तर्भाव हो जाता है । अलङ्कारादि की अपेक्षा विशेष आनन्द जनक नहीं होनेसे ध्वनिको उन्हींमें गतार्थ कर सकते हैं । अथवा ध्वनिको उनमें अन्तर्भूत कर देनेपर अनादिकालसे प्रसिद्ध 'ध्वनि' इस संज्ञाके बिलकुल उच्छेदके भयसे उन्हीं अलङ्कारादिके मध्य जिस किसी भी एक पदार्थका ध्वनिनाम रखकर ध्वनिसंज्ञाका निर्वाह होनेपर भी अपूर्व ध्वनिकी सिद्धि नहीं हो पाती है ।

**किं च वाग्विकल्पानामानन्त्यात्संभवत्यपि वा कस्मिंश्चित्काव्यलक्षणविधायिभिः प्रसिद्धैरदर्शिते प्रकारलेशे ध्वनिर्ध्वनिरिति तदलीकसहृदयत्वभावनामुकुलितलोचनैर्नृत्यते । तत्र हेतुं न विद्मः । सहस्रशो हि महात्मभिरन्यैरलंकारप्रकाराः प्रकाशिताः प्रकाश्यन्ते च । न च तेषामेषा दशा श्रूयते । तस्मात्प्रवादमात्रं ध्वनिः न त्वस्य क्षोदक्षमं तत्त्वं किञ्चिदपि प्रकाशयितुं शक्यम् ।**

ध्वनिमभ्युपगम्य निरस्यति—किञ्चेत्यादिना । किञ्च पुनः प्रसिद्धैरुद्भटादिभिः काव्यलक्षणविधायिभिः, अदर्शितेऽनुपदिष्टे, कस्मिंश्चिदगण्ये ध्वनिलक्षणे, प्रकारलेशे—सूक्ष्मप्रभेदे, वक्तीति वागिति व्युत्पत्त्या वाचः शब्दस्य, उच्यत इति व्युत्पत्त्या वाचोऽर्थस्य च विकल्पानामतात्त्विकप्रकाराणाम्, आनन्त्यात्, सम्भवत्य-

पि—सम्भाविन्यपि, अलीकया—वितथया, सहृदयत्वस्य स्वधर्मिकवैदग्ध्यस्य सम्भावनया, मुकुलितानि—कृतकसहृदयत्वप्रदर्शनाय कुड्मलवत् सङ्कोचितानि, लोचनानि यैः, तादृशैः, ध्वनिर्ध्वनिरिति ब्रुवाणैर्ध्वनिवादिभिः, यत् , नृत्यते तत्र नृत्ये, हेतुं कारणविशेषं, न पश्यामः। हि यतः, अन्यैर्महात्मभिर्भामहदण्डिप्रमुखैः सहस्रशोऽलङ्काराणां प्रकाराः पूर्वं प्रकाशिताः, साम्प्रतं चेदानीन्तनैः प्रकाश्यन्ते। तेषामलङ्कारप्रकाराणाम् , एषा दशा नितरामप्रसिद्धिः न श्रूयते। तस्मादत्यप्रसिद्धत्वाद्धेतोः ध्वनिः प्रवादमात्रं केवलमसारं वचनमेव। नत्वस्य ध्वनेः किञ्चिदपि, क्षोदक्षमं चूर्णनयोग्यं सूक्ष्मविचारार्हमिति यावत्। तत्वं सारं , प्रकाशयितुं शक्यमित्यर्थः। ध्वनिर्ध्वनिरिति द्विरुक्तिः सम्भ्रममादरं च सूचयति। आस्तां वाऽनन्ते जगति कुत्रचिदेकत्र ध्वनिचर्चा, नैतावता 'नैकमुदाहरणं योगारम्भं प्रयुञ्जीत' इति शाब्दिकसिद्धान्तदृष्टान्तेन ध्वनेः सर्वानुभवगोचरत्वम्। तदभावे तु नाविसंवादिनी तस्य सिद्धिरित्यभिमतम्॥

ध्वनिको मानकर भी दूसरे ढङ्गसे खण्डन करते हैं—किञ्च वागित्यादि। काव्य लक्षणकर्ता बड़े बड़े उद्भट विद्वानोंसे नहीं दर्शाये गये ध्वनि लक्षणके तुच्छ सूक्ष्म प्रभेदोंका शब्दार्थ कल्पनाओं ( विवक्षाओं ) के अनन्त अतात्त्विक प्रकारोंसे सम्भव होनेपर भी तद्विषयक मिथ्या पाण्डित्याभिमानजन्य संभावनासे ध्वनि ! ध्वनि !!' इस तरह वागाडम्बर करते हुए आँख बन्दकर जो ध्वनिवादका मिथ्याभिमान द्वारा समर्थन करते हैं उसमें कोई युक्ति नहीं दिखलाई पड़ती, क्योंकि भामह, दंडी प्रभृति प्रमुख महान् व्यक्तियोंने हजारों अलंकारोंके भेद पहले प्रकाशित किये और अभी भी आधुनिक कतिपय विद्वान् प्रकाशित कर रहे हैं लेकिन, ध्वनिकी तरह इन अलंकारोंकी कोई भी अप्रसिद्धिकी बात सुनाई नहीं पड़ रही है। इसलिये अत्यन्त अप्रसिद्धि होनेसे ध्वनि-विषयक वचन केवल असार मात्र ही समझना चाहिये, न कि इसके विषयमें सूक्ष्म विचार करने योग्य कुछ भी तथ्यांशसे भरा हुआ सार भाग प्रकाशित करने योग्य है।

तथा चान्येन कृत एवात्र श्लोकः—

यस्मिन्नस्ति न वस्तु किञ्चन मनःप्रह्लादि सालंकृति,
　　व्युत्पन्नै रचितं च नैव वचनैर्वक्रोक्तिशून्यं च यत्।
काव्यं तद्ध्वनिना समन्वितमिति प्रीत्या प्रशंसञ्जडो,
　　नो विद्मोऽभिदधाति किं सुमतिना पृष्टः स्वरूपं ध्वनेः॥

ध्वन्यभाववादं द्रढयितुमन्यसम्मतिं दर्शयति—तथाचेत्यादिना । श्लोकः—तथा च तदर्थप्रत्यायकश्च श्लोकः, अनेनोदासीनेन ग्रन्थकर्तृसमसामयिकेन मनोरथ-(१) कविनेति शेषः, कृत एवेत्यर्थः ॥

**यस्मिन्निति** । यस्मिन् काव्ये, सालङ्कृत्यलङ्कारसहितम्, अत एव मनसः—प्रह्लादि—प्रमोदकम् (अर्थालङ्कारत्वात्) किञ्चन-किमपि, वस्तुतत्त्वमर्थं इति यावत् नास्ति । च तथा व्युत्पन्नैश्शब्दालङ्कारशालिभिः वचनैश्शब्दैः करणैर्यत्, न रचितम् । च पुनः वक्रोक्त्या कुन्तलाङ्गीकृतकाव्यजीवितेन, यत्, शून्यम् । तत्काव्यं ध्वनिना प्रधानीभूतव्यङ्ग्यार्थेन, समन्वितम्, इत्येवं, प्रीत्या—गतानुगतिकत्वप्रसृत-प्रेम्णा, प्रशंसन्-स्तुवन्, जडोऽनुचितप्रशंसित्वेन मूर्खः सुमतिनाऽयुक्तस्य ध्वनेरस्वीकारात् सुधिया ध्वनेः स्वरूपं पृष्टः सन्, किम्, अभिदधाति कथयति, उत्तरयतीति यावत् । तत्, नो विद्मो न जानीम इत्यर्थः । किमपि ध्वनेस्तत्त्वमुक्तिपर्यवसायि नास्तीति तात्पर्यम् । एवञ्च ध्वनेरपूर्वत्वं न वर्तत इति 'एषामन्यतमस्यैव समाख्या ध्वनिरित्यतः' इत्यग्रिमोक्तिमनुसरतस्तृतीयस्य ध्वन्यभाववादस्य सारम् ॥

ध्वन्यभाववादको दृढ करनेके लिये तीसरेकी सम्मति भी दिखलाते हैं—**तथा चान्येन कृत एवात्र श्लोक इत्यादि** ।

जिस काव्यमें अलंकारोंसे अलंकृत विदग्धजनानन्दजनक कुछ भी विशेष अर्थ नहीं है, एवं जो काव्य चमत्कृतिजनक व्युत्पत्तिवर्द्धक, परिनिष्ठित शब्दोंसे नहीं बनाया गया और वक्रोक्ति नामक काव्यजीवितसे शून्य है, उस काव्यको ध्वनि-रूप प्रधानभूत व्यङ्ग्यार्थसे समन्वित होनेसे सर्वथा परिपूर्ण कहकर गतानुगतिक (अन्धपरंपरा) की तरह व्यर्थ प्रीतिसे अधिक बड़ाई करता हुआ बुद्धिहीन-व्यक्ति बुद्धिमानों द्वारा ध्वनिस्वरूपके विषयमें पूछे जानेपर क्या कहेगा इसको हम नहीं जानते, अर्थात् ध्वनिका कुछ भी सार नहीं होनेसे उस व्यक्तिका सार-रहित कथन विद्वानोंका अनुपादेय ही सिद्ध होगा ।

**'भाक्तमाहुस्तमन्ये'** ।

**अन्ये तं ध्वनिसंज्ञितं काव्यात्मानं गुणवृत्तिरित्याहुः** ।

इत्थं ध्वन्यभाववादिमतत्रयं प्रदर्श्य, भाक्तत्वादिपक्षप्रकाशनमुपक्षिपन् कारिका-ऽवयवं विवृणोति—**भाक्तमाहुरित्यादिना** । भक्तिर्नाम—'अभिधेयेन सारूप्यात्सामीप्यात्समवायतः । वैपरीत्यात्क्रियायोगाल्लक्षणा पञ्चधा मता ॥१॥ इत्यभियुक्तो-

(१) कविरयं लोचनकर्तुरनुजान्मनोरथगुप्तादन्य एव कालभेदात् ।

क्तप्रकारोपचारविशेषात्मिका, सारूप्यादिना सम्बन्धेनाभिधेयसम्बन्धिनोऽर्थान्तरस्य बोधिका, लक्षणाऽपरपर्यायाऽभिधामूलिका, 'भज्यते सेव्यते प्रसिद्धतयोद्बोध्यत इति भक्तिरिति योगवती समारोपिता गौणी शक्तिः, तस्या आगतस्तज्ज्ञानप्रयोज्यारोपीयविषयताश्रयो भाक्तः, तं, ध्वनिसञ्ज्ञितं ध्वन्यत इति योगेन ध्वनिनामानं, काव्यात्मानं साररूपतया काव्यजीवनाधायकं व्यङ्ग्यम्। अन्ये लक्षणापक्षपातिनो भट्टोद्भटादयः, आहुरित्यर्थः। कर्मणो निपातेनेतिनाऽभिधानाद् गुणवृत्तिपदान्न द्वितीया। गुणैरुक्तसामीप्यादिभिः, साम्यप्रयोजकैस्तैक्ष्ण्यादिभिर्वा वृत्तिः शब्दस्य कल्पितशक्तिर्यत्रासौ गुणवृत्तिर्लक्ष्योऽर्थः। सामानाधिकरण्यनिर्देशानुरोधात् व्यधिकरणबहुव्रीहिः। 'भक्त्या बिभर्त्ति नैकत्वं रूपभेदादयं ध्वनिः' इति ध्वनिभक्तितादात्म्यखण्डनस्याऽप्युपसंहरिष्यमाणतया गुणवृत्तिपदमिहोपचाररूपाप्रधानवृत्तिपरमप्यवगन्तव्यम्। तदाऽऽक्षेपसामञ्जस्यं तु ध्वनिशब्दस्य भावसाधनताऽङ्गीकारेण कथञ्चन विधेयम्। अर्वाचीनैस्सादृश्यसम्बन्धेनार्थान्तरस्य बोधिका गौड़ी, सादृश्यभिन्नसम्बन्धेनार्थान्तरस्य बोधिका च शुद्धा लक्षणाऽऽङ्गीक्रियते। एभिस्तु तयोः स्थाने क्रमेण भक्त्यपरपर्याया गुणवृत्तिस्तथा लक्षणा व्यवह्रियत इति लक्षणाशब्देनैतन्मते, नोभयोर्ग्रहणमिति बोध्यम्। व्यङ्ग्यस्यापि गुणवृत्त्यैव बोध इत्यलं व्यञ्जनयेति भाक्तत्वपक्षाभिप्रायः॥

इस तरह तीनों ध्वन्यभाववादियोंका मत बतलाकर ध्वनिको लक्षणामें गतार्थ करनेवालोंका मत प्रस्तुत करते हैं—भाक्तमाहुस्तमन्ये इत्यादि। लक्षणाके पक्षपाती भट्ट उद्भट प्रभृति कतिपय विद्वान् लक्षणा नामकी समारोपित गौणीवृत्तिसे ही उस ध्वनि नामक काव्यके जीवनाधायक सारभूत व्यङ्ग्यविषयक बोध का प्रतिपादन करते हैं, अर्थात् व्यङ्ग्यार्थका भी लक्षणासे ही बोध हो जायगा तदर्थ, व्यञ्जनावृत्ति माननेकी कोई आवश्यकता नहीं, यही भाक्तत्वपक्षावलम्बियोंका आशय है।

**यद्यपि च ध्वनिशब्दसंकीर्तनेन काव्यलक्षणविधायिभिर्गुणवृत्तिरन्यो वा न कश्चित्प्रकारः प्रकाशितः, तथापि अमुख्यवृत्त्या काव्येषु व्यवहारं दर्शयता ध्वनिमार्गो मनाक्स्पृष्ट इति परिकल्प्यैवमुक्तम्—'भाक्तमाहुस्तमन्ये' इति।**

ननु ध्वनेर्गुणवृत्तावन्तर्भावो गगनकुसुमप्राय एव, क्वाप्यनुपादानादित्यत आह—यद्यपीत्यादिना। ध्वनिशब्दस्य सङ्कीर्तनेन स्पष्टोपादानेन, गुणवृत्तिर्भक्तिः, अन्यो गुणालङ्कारादिर्वा कोऽपि प्रकारो यद्यपि काव्यलक्षणकारैर्भामहादिभिर्न प्रकाशितः, तथापि अमुख्यवृत्त्या भक्त्या, काव्येषु, व्यवहारं—वाक्यार्थबोधं, दर्शयता भट्टो-

द्भटवामनादिना, ध्वनेर्मार्गः—सिद्धान्तः, मनाक् स्पृष्ट ईषदुपात्तः, इतीदम् परिकल्प्यानुसन्धाय, 'भाक्तमाहुस्तमन्ये' इत्येवमुक्तं कारिकाकृतेत्यर्थः। तथाहि—'शब्दाश्छन्दोऽभिधानार्था इतिहासाश्रयाः कथाः। लोको युक्तिः कलाश्चेति मन्तव्याः काव्यहेतवः'। इति भामहोक्तिं विवृण्वता, 'शब्दानामभिधानमभिधाव्यापारो गुणवृत्तिश्च' इत्युद्भटेन, 'सा सादृश्याल्लक्षणा वक्रोक्तिः' इत्यभिदधानेन वामनेन च ध्वनिभक्त्योस्तादात्म्यमिव दर्शितम्। यद्यपि नामग्राहं ध्वनिः केनापि गुणवृत्तावन्यत्र वा नान्तर्भावितः, किन्तूद्भटादिभिर्लक्षणामूलध्वनिस्थलेऽपि गुणवृत्तिमात्रमुक्तमित्यनायत्या गुणवृत्तेस्तन्मते ध्वनिस्थानीयता कल्प्यते। वस्तुतस्तु तत्र गुणवृत्तिव्यञ्जनयोः सद्भावे क्वचिद्गुणवृत्त्युपादानं नेतरव्यावृत्तितात्पर्यकमिति तैरपि परिष्कृत एवायं पन्था इत्यवसेयम्। भाक्तत्वपक्षस्य बहुत्रोपलम्भात्सारगर्भप्रायत्वाच्च विद्यमानतां सूचयितुम् 'आहुः' इति लट्प्रयोगः।

यद्यपि काव्यलक्षणके निर्माताओंने ध्वनिशब्दका स्पष्ट नाम ग्रहण कर गुणवृत्ति ( लक्षणा ) या अन्य किसी भी प्रकारका प्रतिपादन नहीं किया है, तथापि 'शब्दानामभिधानमभिधाव्यापारो गुणवृत्तिश्च' 'सा सादृश्याल्लक्षणा वक्रोक्तिः' इन शब्दोंसे उद्भट वामन प्रभृतियोंने काव्यमें लक्षणासे ही वाक्यार्थ-बोध दर्शाते हुए ध्वनिके सिद्धान्तोंको थोड़ा सा कह सा दिया है इसी बातका अनुसन्धान कर कारिकाकारने 'भाक्तमाहुस्तमन्ये' ऐसा कहा है।

**केचित्पुनर्लक्षणकरणशालीनबुद्धयो ध्वनेस्तत्त्वं गिरामगोचरं सहृदयहृदयसंवेद्यमेव समाख्यातवन्तः। तेनैवंविधासु विमतिषु स्थितासु सहृदयमनःप्रीतये तत्स्वरूपं ब्रूमः। तस्य हि ध्वनेः स्वरूपं सकलसत्कविकाव्योपनिषद्भूतमतिरमणीयमणीयसीभिश्चिरंतनकाव्यलक्षणविधायिनां बुद्धिभिरनुन्मीलितपूर्वम्, अथ च रामायणमहाभारतप्रभृतिनि लक्ष्ये सर्वत्र प्रसिद्धव्यवहारं लक्षयतां सहृदयानामानन्दो मनसि लभतां प्रतिष्ठामिति प्रकाश्यते।**

'केचिदि'त्यादिना कारिकायामुक्तं ध्वनेरनिर्वचनीयतावादं दर्शयति—**केचित्पुनरित्यादिना।** लक्षणकरणेऽव्याप्त्यतिव्याप्त्यसम्भवपरिहारेण ध्वनेर्लक्षणविधाने, शालीनाऽप्रौढा, बुद्धिर्येषां ते कोमलमतयः पुनः केचित्, ध्वनेरुत्तमकाव्यस्य व्यङ्ग्यविशेषस्य वा, तत्त्वं व्यङ्ग्यं स्वरूपं वा, गिरामगोचरमनाख्येयं सहृदयहृदयैनैव संवेद्यं नत्वसहृदयबुद्धिगम्यं, समाख्यातवन्त ऊचिरे। इह ध्वनौ विप्रतिपन्नाः प्रथमे सतो-

ऽपि तस्याभावं वदन्तो भ्रान्ताः, प्रधानस्यापि तस्य तत्त्वपह्नुवाना मध्यमाः संशयानाः, अनपह्नुवाना अपि तस्य स्वरूपमेव लक्षयितुमजाना अन्तिमा अज्ञानिन इत्युत्तरोत्तरं स्फुरति वैचित्र्यमेषाम् । उपसंहरति—**तेनैवमित्यादिना** । हेतौ तृतीया, निर्धारणे सप्तमी । यत एवंविधा-एतादृश्य इहोक्ता अनुक्ताश्च विमतयो विरुद्धबुद्धयो विरुद्धयुक्तिमदुक्तय इति यावत् स्थिताः, तेन हेतुना, तस्य ध्वनेः, स्वरूपं ब्रूमो निरूपयाम इत्यर्थः । ध्वनिस्वरूपानिरूपणे परैः पृष्टस्य सचेतसोऽपि कदाचिद् भ्रमः संशयो मौनं च सम्भवतीति तत्स्वरूपनिरूपणमावश्यकमित्याशयः । तेनेत्येकवचनेनैकैकविप्रतिपत्तिवाक्यार्थस्यापि निरूपणे हेतुत्वं सूच्यते ।

तावताऽप्यपरितुष्यन् बुद्धिवैशद्याय शिष्याणामभिधेयप्रदर्शनाय च 'तेन ब्रूमः सहृदयमनःप्रीतये तत्स्वरूपम्' इत्यमुमंशं कारिकायाः पुनर्व्याचष्टे - **तस्य हि ध्वनेरिति** । सकलानां सत्कवीनां काव्यस्योपनिषद्भूतमुपोद्घतं निषीदतीत्युपनिषदिति व्युत्पत्त्या सारत्वान्मूर्धन्यम्, 'उपनिषत्तु वेदान्ते रहस्यधर्मयोरपि' इति हैमोक्तो रहस्यं वा अतिरमणीयं विच्छित्त्याधानाच्छब्दवाच्यलक्ष्यापेक्षया मनोरमतमम्, अणीयसीभिरतिसूक्ष्माभिः, चिरन्तनानां प्राचां, काव्यलक्षणविधायिनां बुद्धिभिः, गुणादिवद्, अनुन्मीलितपूर्वं प्रागप्रकाशितम् । अथ च तथा, रामायण-महाभारतप्रभृतिनि तदादिनि, लक्ष्ये उदाहरणे सर्वत्र, प्रसिद्धो व्यवहारो यस्य तादृशं, न तु खपुष्पवदप्रसिद्धम्, तस्य विप्रतिपत्तिपिशाचीग्रस्यमानस्य ध्वनेः, स्वरूपं लक्षयतां लक्षणपुरस्सरं निरूपयतां पश्यतां वा, सहृदयानां, मनसि, आनन्दो रसास्वादात्मा प्रमोदः स्वपक्षस्थापनोद्भूताहोपुरुषिकाप्रयुक्तः प्रसादो वा, प्रतिष्ठां शाश्वतीं स्थितिं, लभतामिति हेतोः, प्रकाश्यते ध्वनिस्वरूपं निरूप्यत' इत्यर्थः । इह सकलसत्कविशब्दाभ्यां ध्वनेः प्रसिद्धता, तया 'सम्भवत्यपि वा कस्मिंश्चित् इत्यादिनाऽऽपादितस्याप्रसिद्धत्वस्य मृषात्वम्, उपनिषद्भूतपदेन 'अपूर्वसमाख्यामात्रकरणे' इत्यादिनोपक्षिप्तस्यानपूर्वत्वस्य निरसनम्, अतिरमणीयत्वेन भाक्तत्वाभावः, 'अणीयसीभि' रित्यादिना गुणाद्यनन्तर्भूतत्वद्वारा नवीनत्वम्, तेनास्य ग्रन्थस्य प्राचीनग्रन्थैरगतार्थता, रामायणादिलक्ष्यप्रसिद्धव्यवहारतया 'तत्समयान्तःपातिनः' इत्यादिदर्शितदूषणनिराकरणम्, लक्षयतामित्यनेन तदनाख्येयत्वाभावः, आनन्दशब्देन निबन्धृनामव प्रतीयते । समस्तेन ध्वनिस्वरूपमभिधेयम्, तज्ज्ञानेन सहृदयहृदयानन्दावाप्तिः प्रयोजनम्, तल्लिप्सुरधिकारी, साध्यसाधनभावः सम्बन्धश्च सूच्यते ।

अब ध्वनिके अनिर्वचनीयतावादको दिखलाते हैं—केचित्पुनर्लक्षणकरणशा-लीनबुद्धय इत्यादि। ध्वनिके लक्षण करनेमें अत्यन्त सुकुमार (कोमल) मति-वाले किन्हीं विद्वानोंने तो ध्वनि नामक उत्तम काव्यके स्वरूपको वाणीका अगोचर (अविषय) अर्थात् अवर्णनीय एवं सरस सहृदय जनोंसे ही जानने योग्य कहा है, इसलिए इस तरहके ध्वनि स्वरूपको ही समूल नष्ट करनेवाले नाना मत मतान्तरों के उपस्थित होनेपर विद्वज्जनोंके मनःप्रसादार्थ ध्वनिके वास्तविक स्वरूपको कहते हैं। समस्त सत्कवियोंके काव्यका मूर्धन्यभूत, रहस्यमय अत्यन्त रमणीय, अति प्राचीन काव्य-लक्षण निर्माताओंकी सूक्ष्म बुद्धियोंसे भी पूर्वमें अप्रकाशित, तथा रामायण महाभारतादि सकललक्ष्योंमें प्रसिद्ध व्यवहारवाले उस ध्वनिके स्वरूपको अतिसूक्ष्मतासे हृदयंगम करनेवाले सहृदयोंके हृदयमें आनन्द प्राप्त हो इस भावसे में ध्वनि-स्वरूपको प्रकाशित करता हूँ। यहाँ पर आनन्द शब्दसे ग्रन्थकारका नाम, समस्त वाक्यसे ध्वनिरूप अभिधेय, उसके ज्ञानसे विद्वज्जनोंको आनन्द-प्राप्तिरूप प्रयोजन, तल्लिप्सु अधिकारी और साध्यसाधनभावरूप सम्बन्ध, ये अनुबन्ध चतुष्टय सूचित होते हैं।

तत्र ध्वनेरेव लक्षयितुमारब्धस्य भूमिकां रचयितुमिदमुच्यते—

**योऽर्थः सहृदयश्लाघ्यः काव्यात्मेति व्यवस्थितः।**
**वाच्यप्रतीयमानाख्यौ तस्य भेदावुभौ स्मृतौ ॥२॥**

काव्यस्य हि ललितोचितसन्निवेशचारुणः शरीरस्येवात्मा साररूपतया स्थितः सहृदयश्लाघ्यो योऽर्थस्तस्य वाच्यः प्रतीयमानश्चेति द्वौ भेदौ।

**तत्र ध्वनेरिति।** तत्रोक्तेऽनुबन्धचतुष्टये निर्णीते, ध्वनेरेव लक्षयितुमारब्धस्य लक्षणं कर्तुमुपक्रान्तस्य निर्मातुमारब्धस्य प्रासादस्य भूमिमिव भूमिकामवतरणिकां, रचयितुं, ग्रन्थकृता, इदमधोनिर्दिश्यमानमुच्यते, नत्वसम्बद्धं किमपीत्याशयः।

ध्वनिस्वरूपनिरूपणे प्रतिज्ञाते, वाच्यादिभेदकथनस्यासङ्गतिं निराकर्तुं, सामान्य-भेदप्रदर्शनद्वारा ध्वनिं स्थापयितुं वा वृत्तिकारः कारिकामवतारयति—**योऽर्थः सहृदयेत्यादिना।** सहृदयैः श्लाघ्योऽतिप्रशंसनीयः, काव्यस्य शब्दार्थोभयमयस्य, देहस्य जीव इव, आत्मा प्रधानमिति, योऽर्थो व्यवस्थितो निश्चितः स्थेमानं वा प्राप्तः, तस्य वाच्योऽभिधेयः प्रतीयमानो व्यङ्ग्यश्चेति ख्यातो, उभौ भेदौ स्मृतौ कथिताविन्त्यर्थः। तदेवाह वृत्तिकारः—**काव्यस्येत्यादिना।** ललितेन गुणालङ्कारादिसुन्दरेण, उचितेन रसव्यञ्जनानुकूलेन, सन्निवेशेन शब्दार्थविरचनेन चारुणो मनोरमस्य काव्यस्येत्यन्वयः। अवशिष्टं स्पष्टं विवृतमेव।

इदमत्रावसेयम्—काव्येऽर्थप्रतीत्युपयोगिनः शब्दस्य वाच्यलक्ष्यार्थयोरेव न प्राधान्यम्, शरीररूपत्वात् । किन्तु सहृदयश्लाघोत्कर्षमात्रत्वेन परापेक्षया चमत्कारातिशयाधानाच्चात्मभूतः प्रतीयमानो योऽर्थः, स एव काव्यत्वव्यपदेशहेतुरनुप्राणकः प्रधानम् । इतरथा सर्वेषामपि वाक्यानां काव्यत्वमापद्येत । ननु यदि 'काव्यस्यात्मा ध्वनिः' इति प्रागुक्तम्, 'काव्यस्यात्मा स एवार्थः' इत्यग्रेऽपि प्रतीयमानस्यैवार्थस्य काव्यात्मत्वं वक्ष्यते, तर्हि कथमिदानीं काव्यात्मभूतार्थप्रभेदतया वाच्यार्थोऽप्युच्यत इति चेन्, मैवम् । वाच्यार्थस्येहाविविक्तार्थसामान्यप्रकारताकथनेऽपि काव्यात्मत्वेनोपादानाभावात् । यदाहुर्लोचनकाराः—'स एव एवार्थो द्विशाखतया विवेकिभिर्विभागबुद्ध्याऽभियुज्यते । तथाहि—तुल्येऽर्थरूपत्वे किमिति कस्मैचित् सहृदयः श्लाघते, तद्भवितव्यं केनचिद्विशेषेण । यो विशेषः, स प्रतीयमानभागो विवेकिभिर्विशेषहेतुत्वादात्मेति व्यवस्थाप्यते । वाच्यसङ्कलनाविमोहितहृदयैस्तु तत्पृथग्भावो विप्रतिपद्यते, चार्वाकैरिवात्मपृथग्भावः । अत एवार्थ इत्येकतयोपक्रम्य सहृदयश्लाघ्य इतिविशेषणद्वारा हेतुमभिधायापोद्धारणदृशा तस्य द्वौ भेदावंशावित्युक्तम्, नतु द्वावप्यात्मानौ काव्यस्य' इति । न च ध्वनिनिरूपणप्रस्तावे वाच्यार्थनिरूपणमसङ्गतमिति वाच्यम् । व्यङ्ग्यार्थबोधौपयिकत्वेन तन्निरूपणस्याऽप्यपेक्षितत्वात् । अत एवाग्रे वक्ष्यति 'तदुपायतया तद्वदर्थे वाच्ये तदादृतः' इति ॥ २ ॥

अब ध्वनिस्वरूपको लक्षित करने ( विशेष रूपसे जानने ) के लिये भूमिका रचते हैं—योऽर्थः सहृदयश्लाघ्य इत्यादि ।

गुण अलंकारादिसे सुन्दर रसव्यञ्जनके योग्य, शब्द सन्निवेशक्रमसे अत्यन्त मनोरम शब्दार्थमय काव्यके शरीरमें जीवकी तरह अनुप्राण स्वरूप जो अर्थ सहृदयजनोंसे अत्यन्त प्रशंसनीय माना गया है, उसके वाच्य और प्रतीयमान ( व्यङ्ग्य ) ये दो भेद कहे गये हैं ।

यहाँ पर यद्यपि अतिशय चमत्कार जनक होनेसे व्यङ्ग्यरूप ध्वनि ही काव्यका आत्मा माना गया है इसके मध्यमें वाच्यार्थका कथन संदर्भ-विरुद्ध मालूम पड़ता है, तथापि वाच्यार्थके पार्थक्यका विश्लेषण नहीं करके अर्थ सामान्यके अन्दर मान कर ही उसका परिगणन किया गया है और वाच्यार्थ ज्ञान द्वारा ही व्यङ्ग्यार्थका बोध होता है, इसलिये भी उसका निरूपण आवश्यक माना गया है ।

**तत्र वाच्यः प्रसिद्धो यः प्रकारैरुपमादिभिः ।**
**बहुधा व्याकृतः सोऽन्यैः काव्यलक्ष्मविधायिभिः ॥ ३ ॥**

वाच्यार्थविशेषनिरूपणाभावकारणमाह—**तत्र वाच्य इत्यादिना**। तत्र द्वयोरर्थस्यांशयोर्मध्ये, यो वाच्योऽर्थः प्रसिद्धो; न तु 'विप्रतिपत्तिग्रासनिगूढः, सौऽन्यैरुद्भटादिभिः, काव्यलक्ष्मविधायिभिः काव्यलक्षणकारैः, बहुधा वाच्यालङ्कारादिविपुलप्रकारैः, व्याकृतो व्युत्पादित इत्यर्थः यतोऽलङ्कारादिप्रकारनिरूपणप्रसङ्गेन प्राचीनैर्वाच्योऽर्थः सुविवृत एव, तस्मात् तत्पिष्टपेषणमिव मन्यमानैरस्माभिर्नैवात्र स विस्तरेण वर्ण्यते, किन्तु क्वचित्क्वचिदुपकाराय केवलमुद्देश्यतयोपादीयत इत्याशयः।

उनमें वाच्यका बृहद्रूपसे वर्णन करने की अनावश्यकता प्रकट करते हैं—**तत्र वाच्यः प्रसिद्ध इत्यादि**। उन दोनों अर्थ-भेदों के बीच उपमादि अलंकार, गुण, रीति प्रभृतिके प्रकारोंसे जगद्विख्यात जो वाच्यार्थ है, उसका अनेकों प्रकारका व्युत्पादन काव्यलक्षण-निर्माता प्राचीन प्रतिष्ठित विद्वान् अलंकारादि निरूपण प्रसंगमें कर चुके हैं।

ततो नेह प्रतन्यते केवलमनूद्यते पुनर्यथोपयोगमिति।

**प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम्।**
**यत्तत्प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवाङ्गनासु॥ ४॥**

प्रतीयमानं पुनरन्यदेव वाच्याद्वस्त्वस्ति वाणीषु महाकवीनाम्। यत्तत्सहृदयहृदयसुप्रसिद्धं प्रसिद्धेभ्योऽलंकृतेभ्यः प्रतीतेभ्यो वाऽवयवेभ्यो व्यतिरिक्तत्वेन प्रकाशते लावण्यमिवाङ्गनासु। यथा ह्यङ्गनासु लावण्यं पृथङ्निर्वर्ण्यमानं निखिलावयवव्यतिरेकि किमप्यन्यदेव सहृदयलोचनामृतं तत्त्वान्तरं तद्वदेव सोऽर्थः। स ह्यर्थो वाच्यसामर्थ्याक्षिप्तं वस्तुमात्रमलंकारा रसादयश्चेत्यनेकप्रभेदप्रभिन्नो दर्शयिष्यते। सर्वेषु च तेषु प्रकारेषु तस्य वाच्यादन्यत्वम्।

तदेवाह वृत्तिकृत्—**ततो नेत्यादिना**। तच्छब्देन कारिकाऽर्थो हेतुत्वेन परामृश्यते पुनश्शब्देन च व्यतिरेकः सूच्यते। अन्यद्व्याख्यातमेव। अर्थान्तरापेक्षया व्यङ्ग्यस्य वैलक्षण्यं निदर्शनेन द्रढयति—**प्रतीयमानमिति**। अङ्गनासु प्रशस्तस्त्रीषु, प्रसिद्धेभ्योऽवयवेभ्यः करचरणादिभ्योऽतिरिक्तं भिन्नं, लावण्यम् 'मुक्ताफलेषुच्छायायास्तरलत्वमिवान्तरा। प्रतिभाति यदङ्गेषु तल्लावण्यमितीरितम्' इति शिङ्गभूपेन लक्षितं कान्तिपूरमिव, महाकवीनां वाणीषु कवितात्मकवाक्षु, प्रसिद्धेभ्योऽवयवेभ्यः शब्दार्थ—तदुभयालङ्कारादिभ्योऽतिरिक्तं, यत् त्रिशाखं प्रतीयमानं वस्तु विभाति, तदन्यदेवास्ति, न तु शब्दार्थादिरूपं विद्यत इत्यर्थः, तदेव विवृणोति

वृत्तिकृत्—**प्रतीयमानमिति**। सहृदयहृदयेषु सुप्रसिद्धं शाश्वतिकप्रतीतिगोचरीभूतम्। प्रतीतेभ्यः प्रख्यातेभ्यः। पृथक्त्वं—लावण्यस्यावयवेभ्यो ज्ञेयम्। निर्वर्ण्यमानं दृश्यमानम्। लोचनामृतं सुधावन्नयनानन्दकम्। तत्त्वं वस्तु, पदार्थं इति यावत्। सोऽर्थो व्यङ्ग्योऽर्थः। अवशिष्टं व्याख्यातमेव।

यत्तु व्यक्तिविवेककारः—'प्रतीयमानः पुनरन्य एव, सोऽर्थोऽस्ति वाणीषु महाकवीनाम्' इतीह प्रकरणानुरोधेन पाठभेदमकल्पयत्। तत्र विचार्यते—वस्तुतत्वं यदि केवलान्वयि तर्हि प्रतीयमानेऽर्थे कथं न तिष्ठेत्। तत्सत्त्वस्वीकारे च काऽनुपपत्तिः इत्थं च वृथैव पाठविपर्यासकल्पनमिति विभावनीयम्।

प्रतीयमानार्थस्य वाच्यात्पार्थक्यं प्रदर्श्य शाखात्रयमुद्दिशति—**स ह्यर्थ इत्यादिना**। स व्यङ्ग्योऽर्थो हि अनेकैस्त्रिभिः प्रभेदैः प्रकारैः, भिन्नो विभक्तः, अनुपदं दर्शयिष्यते। तथाहि—वाच्यस्य सामर्थ्येन व्यञ्जनाश्रयतया आक्षिप्तं प्रत्यायितं, वस्तुमात्रं केवलं वस्तु नत्वलङ्कारसादिरित्येकः प्रकारः। वाच्यसामर्थ्याक्षिप्ता अलंकारा इति द्वितीयः प्रकारः। तादृशा एव रसादयश्चेति तृतीयः प्रकारः। अनेकत्वमिह कपिञ्जलालम्भन्यायेन त्रित्वमात्रपर्यवसायि, प्रभेदप्रभेदापेक्षि वा ज्ञेयम्। इत्थं व्यङ्ग्यस्य भेदानुद्दिश्य पुनर्वाच्यादभेदं प्रतिजानीते—**सर्वेषु चेत्यादिना**। तेषु पूर्वोक्तेषु त्रिषु। तस्य—व्यङ्ग्यस्य। अन्यत्वं भेदः।

इसलिये पिष्टपेषणवत् विस्ताररूपसे यहाँ उसका वर्णन करना निरर्थक है किन्तु आवश्यकतानुसार कहीं कहीं केवल अनुवाद मात्र किया जायगा।

अर्थान्तर की अपेक्षा व्यङ्ग्यार्थकी विशेषता दृष्टान्त द्वारा बतलाते हैं—प्रतीयमानं पुनरित्यादि। विकसित यौवना किन्हीं कामिनी स्त्रियोंके चारु मुख, नयन, स्तन, जघनादि अवयवोंके सौन्दर्यसे उद्भूत एक विलक्षण दृश्यमान लावण्यधारा (सौन्दर्यछटा) जैसे युवकों को अमृताञ्जनकी तरह नयनानन्द-जनक होती है वैसे ही अलंकारादि वाच्यार्थोंसे भिन्न सरसजनों द्वारा आस्वाद्यमान कुछ विलक्षण (निराला) ही प्रतीयमान व्यङ्ग्यार्थ महाकवियोंके वाग्विलासमें चमत्कृत होता हुआ सहृदयोंका आनन्द-जनक होता है। और व्यञ्जनावृत्तिसे प्रतिपाद्य वह व्यङ्ग्यार्थ—व्यङ्ग्यवस्तु, व्यङ्ग्य अलंकार और व्यङ्ग्य रसादि (रस, रसाभास, भाव, भावाभास, भावोदय, भावप्रशम, भावसन्धि और भावशबलता) के भेदसे तीन प्रकारका दर्शाया जायगा, इन तीनों प्रकारोंमें वाच्यसे व्यङ्ग्यकी अत्यन्त भिन्नता है।

(1) तथा ह्याद्यस्तावत्प्रभेदो वाच्याद् दूरं विभेदवान्। स हि कदाचिद्वाच्ये विधिरूपे प्रतिषेधरूपः।

यथा—

'भम धम्मिअ वीसत्थो सो सुणओ अज्ज मारिओ देण ।
गोलाणइकच्छकुडङ्गवासिणा दरिअसीहेण ॥'

तत्रादौ वस्तुनो व्यङ्ग्यस्य ततो भेदं वदति—**तथाहीति** । आद्यो वस्तुरूपः । दूरमत्यन्तम् । तत्र हेतुमाह—**स हि कदाचिदिति** । हि यतो वाच्ये विधिरूपे, स व्यङ्ग्योऽर्थः प्रतिषेधरूपः कदाचित् भवति ततस्तस्माद्भिन्न एव । नहि विधिनिषेधात्मनोरर्थयोरैक्यं सम्भवति । भेदसिद्धौ च व्यङ्ग्यप्राधान्यनिबन्धना ध्वनिसिद्धिरिह्याकूतम् । तदुदाहरति - **यथेति** । कुसुमान्यवचेतुं स्वसङ्केतस्थलीभूतगोदावरीतीरस्थकुञ्जं प्रति प्रयान्तं कमप्यभिसारविघ्नं रहस्यभेदं वाऽऽशङ्कमाना भीषयितुं काचन पुंश्चली व्याहरति—**भम धम्मिअ इति** । 'भ्रम धार्मिक ! विश्वस्तः, स शुनकोऽद्य मारितस्तेन । गोदानदीकच्छकुञ्जवासिना दृप्तसिंहेन' । इतिच्छाया । हे धार्मिक ! विश्वस्तः स्वैरं न तु पूर्ववत्सत्रासम्, भ्रम—कुसुमान्यवचेतुं सञ्चर । यतः स त्वत्त्रासहेतुः शुनकः श्वा, अद्य, तेन प्रसिद्धेन ( केवलं त्वयैवाज्ञातेन ) गोदानदीकच्छकुञ्जे गोदावरीसरित्तीरलतामण्डपे, वासिना सन्ततवासशीलेन, दृप्तो गर्वितः (ग्राममपि प्रविश्य हठाद् घातुकः) चासौ सिंहो दृप्तसिंहस्तेन मारित इत्यर्थः । जघनविपुलाच्छन्दः । अत्र त्रासहेतोः शुनो विनाशोपन्यासेन भ्रमणविधिर्वाच्यः । शुनोऽपि भीरोः सिंहोपलम्भोक्त्या सुतरां भ्रमणनिषेधस्तु वस्तुरूपः, संकेतरहस्यभङ्गभीरुपुंश्चलीवैशिष्ट्येन व्यङ्ग्य इति वाच्यव्यङ्ग्ययोर्भेदः, स्फुटः व्यङ्ग्यस्य चमत्कारितया च वस्तुध्वनिः । न च भ्रमेत्यस्य भ्रमणनिषेधे विपरीतलक्षणैवेति कुतो ध्वनेः सम्भव इति वाच्यम् । पदार्थोपस्थित्यनन्तरमेव बाधग्रहे जायमाने विपरीतलक्षणायाः प्रसरस्य प्रदीपकर्तृचरणैर्निर्धारणात् । इह तु वाच्यार्थबोधोत्तरं वक्त्र्यादिवैशिष्ट्यपर्यालोचनावसरे तद्ग्रह इति लक्षणायास्तदानीं भ्रष्टावसरतया व्यञ्जनयैव बोधः । तथा च—'क्वचिद्बाध्यतया ख्यातिः क्वचित्ख्यातस्य बाधनम् । पूर्वत्र लक्षणैव स्यादुत्तरत्राभिधैव तु ।' इत्यभियुक्तोक्तिसंवादेन व्यवस्थापितं दर्पणेऽपि । यदपि 'सद्मप्रान्ते श्वविनाशहेतुकेन भ्रमणविधिना, नदीकूले सिंहोपलम्भात्तन्निषेधोऽनुमीयत इति महिम्नाऽवलेपमहिम्ना प्रतिपादितम् । तच्चिन्तनीयम्, धार्मिकत्वेन स्पर्शदोषाच्छुनोभीरोरपि, वीरस्य, गुरुप्रभुनिदेश–प्रियानुराग–निधिलाभलोभादिपरवशस्य च सिंहाधिष्ठानस्थानेऽपि गमनदर्शनाद्धेतोर्व्यभिचरितत्वात् ।

अब सबसे पहले वाच्यसे अत्यन्त भिन्न व्यङ्ग्य वस्तुका प्रतिपादन करते हैं— तथाहि आद्यस्तावत इत्यादि। वाच्यसे व्यङ्ग्य वस्तुके भी अनेकों अवान्तर (उपभेद) प्रभेद हैं। उनमें अभी विधिरूप वाच्य स्थलमें निषेध रूप व्यङ्ग्य वस्तुका उदाहरण देते हैं—यथा—भम धम्मिअ इत्यादि। रमणार्थ निश्चित निज संकेत स्थलरूप गोदावरी नदीके किनारे उस फुलवारीमें फूल चुननेके लिए जाते हुए किसी अन्य व्यक्तिको, रहस्यभेद खुल जानेका संदेह करके डरानेकी भावनासे कोई पुंश्चली नायिका कह रही है—हे धार्मिक! अब तुम पूर्ण विश्वस्त (निश्चिन्त) होकर मनमानी (नकि पूर्ववत् कुत्तेके डरसे घबड़ाकर) पुष्प चुननेके लिए घूमो, अब डरने की कोई आवश्यकता नहीं, क्योंकि वह कुत्ता, जो कि पहले तेरा पीछा करता था, आज गोदावरीके तटपर झाड़ीमें रहनेवाले किसी अज्ञिष्ट एक गर्वीले सिंहसे मारा गया। यहाँपर त्रासहेतु कुत्तेका मरणोपन्याससे भ्रमणका विधान, शब्दसे प्रतिपादित किया गया है और कुत्तेसे भी डरनेवालेको सिंह-प्राप्ति कथनसे अनायास ही भ्रमण का निषेधरूप वस्तु, संकेतरहस्यभेदभङ्गभीरु पुंश्चलीकी उक्ति-मर्यादासे व्यङ्ग्य प्रतीत हो रही है अतः वाच्यसे व्यङ्ग्यमें भेद स्पष्ट है, एवं व्यङ्ग्यके चमत्कार जनक होनेसे वस्तु ध्वनि प्रतीत होती है।

क्वचिद्वाच्ये प्रतिषेधरूपे विधिरूपो यथा—

> 'अत्ता एत्थ णिमज्जइ एत्थ अहं दि अरुअं पलोएहि।
> मा पहिअ रत्तिअन्धअ सेज्जाए मह णमज्जहिसि॥'

दार्ढ्याय पुनरन्यथोदाहरति—क्वचिद्वाच्ये इति। स्वगृहकृतवसतिं पथिकं प्रोषितपतिका पांसुला प्रतिपादयति—अत्ता एत्थेति। 'श्वश्रूरत्र निमज्जति, अत्राहं दिवसकं प्रलोकय। मा पथिक! रात्र्यन्धक! शय्यायामावयोर्माङ्क्षीः।' इतिच्छाया। हे रात्र्यन्धक तैमिरिक! पथिक पान्थ! अत्रास्मिन् स्थाने, श्वश्रूर्मत्पतिजननी निमज्जति जराऽऽधिक्येन निश्चेतनं शेते, अत्र तदितरस्थाने, अहं शये। (तत् त्वं) दिवसकं दिनं व्याप्य प्रलोकय सम्यक् पश्य। (अन्यथा) आवयोः श्वश्रूस्नुषयोः शय्यायां, मा माङ्क्षीर्निस्सञ्ज्ञो मा पतेत्यर्थः। गाथाच्छन्दश्च। इह शय्यायामापतनस्य निषेधो वाच्यः। निमज्जनेन संज्ञाशून्यता, तया रहस्यभेदासम्भवः, तेन स्वैरविहारयोग्यता, तया च निवासावश्यम्भावौचिती, स्वस्य भिन्नस्थाने शयनेन विशेषविधेः शेषनिषेधपरत्वमिति न्यायेनाहमित्युक्तेस्तत्र स्वेतरजनाभावः, तेन प्राग्वत्, कुत्साऽर्थककप्रत्ययेन सम्भोगप्रतिबन्धिनि दिवसेऽसूया, यद्वाऽल्पार्थकेन तेन विलासौत्सुक्यम्, प्रलोकनाभ्यनुज्ञया तन्मुखेक्षणविनोदेन दिननिनीषा पथिकत्वेन कामुकत्वोपपत्तिः श्रान्तिश्च, ताभ्यां शय्याश्रयण-

सम्भवः, रात्र्यन्धकत्वेन निशि तल्पस्थे कदाचित् परेण दृष्टेऽपि तस्मिन् क्षत्यभावः, तल्पपतनसम्भवश्च, आवयोरित्यनेन केवलस्वसम्बन्धाभावः, तेन रहस्यगोपनम्, तावता, व्यभिचारिप्रतिपादकप्रतिपाद्यसम्बन्धेन च, मम शय्यायां निश्शङ्कं त्वया निशि शयनीयमिति कामुकपान्थकविजिहीर्षाऽनुमानानन्तरमभ्यनुज्ञानरूपो विधिस्तु व्यङ्ग्य इति तयोरपि व्यक्तमेवान्यत्वम् ।

ध्वनिकी पुष्टि हेतु कहीं पर निषेधरूप वाच्य स्थलमें विधिरूप व्यङ्ग्य वस्तुका उदाहरण बतलाते हैं--क्वचिद् वाच्ये प्रतिषेधरूपे इत्यादि । अपने घरपर अचानक आए हुए किसी राहीसे एक चतुर नायिका संभोग करनेकी इच्छासे कह रही है- हे रात्र्यन्धक ! (रात के अन्धे) पथिक ! इस शय्यापर मेरी सास अधिक बुढ़ापेसे जड़की तरह सोई पड़ी रहती है और इससे दूसरी शय्या पर मैं सोती हूँ इस विषय को तुम दिन में ही भलीभाँति देखलो, अन्यथा कहीं ऐसा नहो कि हम दोनों (सास-बहू) की शय्यापर रातमें धोखासे गिर जाओ, यहाँ शय्या पर आनेका निषेध शब्दतः किया गया है, जो कि वाच्य है, और 'निमज्जति' आदि पदोंकी महिमासे 'मेरी शय्या पर निःशङ्क रातमें आकर तुम सोना' इस कामुक पथिकके साथ रमण करनेके आशयसे हार्दिक अभिप्रायको सूचित करना ही व्यङ्ग्य वस्तु रूप विधि प्रतीत होती है ।

**क्वचिद्वाच्ये विधिरूपेऽनुभयरूपो यथा—**

**'वच्च मह व्विअ एक्केइ होन्तु णीसासरोइअव्वाइं ।**
**मा तुज्ज वि तीअ विणा दक्खिण्णहअस्स जाअन्तु ॥'**

पुनरन्यथोदाहरति–**क्वचिद्वाच्ये इति** । अनुभयरूपो विधिनिषेधविलक्षणस्तटस्थस्वरूपः । सपत्नीसमासक्तं तदन्तिके जिगमिषन्तमपि स्वानुरोधेन विलम्बमानं कान्तं काचन ब्रूते - **वच्च महेति** । व्रज ममैवैकस्या भवन्तु निश्श्वासरोदितव्यानि । मा तवापि तया विना दाक्षिण्यहतस्य जनिषत । इतिच्छाया । हे कान्त ! व्रज प्रेयसीगृहं गच्छ । एकस्या एकाकिन्याः ममैव त्वद्वियोगेन निश्श्वासा रोदितव्यानि च भवन्तु । दाक्षिण्येनानेककान्ताविषयकाविषमानुरागेण, हतस्य नष्टस्य (न तु प्रेमगुणोत्कर्षापकर्षविवेकिनः) तवापि, तया प्रेप्सितप्रेयस्या, बिना तद्विरहेण, निश्श्वासरोदितव्यानि, मा जनिषत मा भूवन्नित्यर्थः । इह 'दुःखी स्यामहमेक एव सकलो लोकः सुखं जीवतु' इति न्यायेन सर्वथाऽनिष्टस्यापि प्रियगमनस्य विधिर्वाच्यः, त्वन्मनो नितरान्तस्यामासक्तमिति त्वदीयं शठत्वमवधारितं मया, अतो मद्-

न्तिके स्थित्वा कृतं कृतकदाक्षिण्यप्रकटनेनेति विधिनिषेधाभ्यामुदासीनमतदुभयात्मकं तर्जनं वस्तु तु व्यङ्ग्यमित्यनयोऽपि तयोर्भेदः।

कहीं पर विधिरूप वाच्य स्थलमें विधि और निषेधसे विलक्षण ही व्यङ्ग्यका उदाहरण द्वारा प्रतिपादन करते हैं—क्वचिद् वाच्ये विधिरूपे इत्यादि। अपनी सौतमें आसक्त एवं उसके पास जानेके लिए अत्यन्त उत्कण्ठित होने पर भी अपने अनुरोधसे ठहरे हुए प्रियको नायिका कह रही है—हे कान्त! तुम अपनी प्रेयसीके घर जाओ, मेरे अनुरोधसे यहाँ मत ठहरो, क्योंकि तुम्हारे वियोग में मैं ही अकेली गरम साँस लेकर अश्रुपात करूँ यह अच्छा है पर उस प्रेयसीके बिना ( विरहमें ) सबके प्रति बराबर प्रेम करनेवाले तुम्हें भी उच्छ्वसित होकर रोना अच्छा नहीं। यहाँ पर मैं अकेले भले ही दुःखी रहूँ लेकिन तुम मेरे कारण दुःखी मत हो' इस तरह अनिष्ट भी प्रिय गमनका शब्दतः विधान किया है जो कि विधिरूप वाच्य है और तुम्हारा मन उसमें अत्यन्त आसक्त है, तुम्हारी शठता मैंने भलीभाँति जान ली अतः यहाँ ठहरनेकी आवश्यकता नहीं। अधिक उदारता प्रकट मत करो यह विधिनिषेधसे भिन्न ही तर्जनात्मक वस्तु व्यङ्ग्य प्रतीत हो रही है।

पुनरन्यथोदाहरति—

क्वचिद्वाच्ये प्रतिषेधरूपेऽनुभयोरूपो यथा।

नायकः स्वापराधमवधार्य संकेतस्थलान्निवर्तमानां दयितां निवर्तयंश्चाधुनाऽनुनयति—

'दे आ पसिअ णिवत्तसु मुहससिजोह्लाविलुत्ततमणिवहे!।
अहिसारिआणँ विग्घं करोसि अण्णाणं वि हआसे!॥'

प्रार्थये तावत् प्रसीद निवर्तस्व मुखशशिज्योत्स्नाविलुप्ततमोनिवहे!।
अभिसारिकाणां विघ्नं करोष्यन्यासामपि हताशे! इतिच्छाया।

हे मुखशशिज्योत्स्नाविलुप्ततमोनिवहे! वदनेन्दुचन्द्रिकानिरस्ततिमिरस्तोमे! त्वामहं प्रार्थये, प्रसीद–प्रसन्ना भव, निवर्तस्व मा प्रयासीः हे हताशे! अन्यासामपि ( स्वस्य त्वर्थतः प्राप्तम् ) अभिसारिकाणां कान्तार्थं सङ्केतं गच्छन्तीनां, मार्गे मुखचन्द्रप्रकाशकरणाद् विघ्नं करोषीत्यर्थः। नायकस्य गृहमेवागच्छन्तीं प्रत्यप्रत्यभिज्ञानच्छलेन, तटस्थस्याभिसारिकासामान्यं प्रति वेयमुक्तिरिति, 'हताशे' इति सम्बुद्ध्यनौचितीं चाहुराचार्याः। अप्रत्यभिज्ञानदार्ढ्यौपयिकं युक्तं तदिति नव्याः। अत्र प्रवृत्तिप्रतिषेधरूपं निवर्तनं वाच्यम्, विधिनिषेधाभ्यामुदासीनं दयितोपश्लोकनन्तु व्यङ्ग्यमिति भेदः सुवेदः।

कहीं पर प्रतिषेधरूप वाच्यस्थलमें विधि-निषेधसे विलक्षण ही व्यङ्ग्यका उदाहरण देते हैं—क्वचिद् वाच्ये प्रतिषेधरूपे इत्यादि। नायक अपना अपराध जानकर संकेत स्थलसे लौटकर व्यर्थ ही वापस आती हुई नायिकाको लौटनेके लिए अनुनय (प्रार्थना) करता हुआ कहता है—हे मुखरूपचन्द्रकी चाँदनीसे अन्धकार समूह को दूर करने वाली प्रिये! मैं तुमसे प्रार्थना करता हूँ, तुम प्रसन्न हो जाओ और लौटकर वापस वहीं चलो, घर मत जाओ, हे हताशे! तुम अपने रमण निमित्त संकेत स्थलको जाती हुई अन्य नायिकाओंको भी रास्तेमें अपने मुखचन्द्रके उजियालापनसे विघ्नमत डालो। यहाँ पर गृह गमनका प्रतिषेध रूप निवर्तन ही वाच्य है और विधि निषेधसे भिन्न नायिका को अनुनय द्वारा प्रसन्न करना व्यङ्ग्य प्रतीत हो रहा है।

पुनः प्रतिपाद्यभेदनिबन्धनं तयोर्भेदमुदाहरति—

क्वचिद्वाच्याद्विभिन्नविषयत्वेन व्यवस्थापितो यथा।

वाच्ये यो विषयः प्रतिपाद्यो बोद्धव्य इति यावत्, तस्माद् विभिन्नो विषयो बोद्धव्यजनो यस्य तत्त्वेन व्यवस्थापितो ध्वन्यया नियमितः।

अब प्रतिपाद्य व्यक्तियोंके भेदसे व्यङ्ग्यमें वाच्यका भेद बतलाते हैं—क्वचिद् वाच्याद् विभिन्न इत्यादि। अर्थात् जिस व्यक्तिको लक्ष्य कर वाच्यार्थ का प्रतिपादन किया जाता है उससे भिन्न व्यक्तिको लक्ष्य कर व्यङ्ग्यार्थका कथन करनेके कारण भी वाच्य से व्यङ्ग्यको विलक्षण समझना चाहिए।

अविनीतनायिकाया अधरे क्षतदर्शनेन नायकस्य तद्विषयकजारकर्तृकत्वसन्देहो मा भूदिति वाच्यकक्षायां ताम्प्रति, व्यङ्ग्यकक्षायान्तु तत्पतिं प्रति विदग्धसहचरी निगदति—

'कस्स व ण होइ रोसो दट्ठूण पिआए सव्वणं अहरम्।
सभमरपउमग्घाइणि! वारिअवामे! सहसु एह्लिम्॥'

(कस्या वा न भवति रोषो दृष्ट्वा प्रियायाः सव्रणमधरम्।
सभ्रमरपद्माघ्रायिणि! वारितवामे! सहस्वेदानीम्!' इतिच्छाया।

प्रियायाः स्वपत्न्याः सव्रणमनात्मकृतक्षतभाजम्, अधरं दृष्ट्वा, कस्य वा पुंसो रोषो न भवति, (अपि तु सर्वस्य भवत्येव) भ्रमरेण सहितं सभ्रमरं यत्पद्मं तदाघ्रातुं शीलमस्या इति तत्सम्बुद्धौ हे सभ्रमरपद्माघ्रायिणि! तथा वारिता 'मा सभ्रमरं पद्मं घ्रासीः' इति मुहुर्निरुद्धाऽपि वामा विरुद्धाचरणात् प्रतिकूला या, तत्सम्बुद्धौ हे वारितवामे! इदानीं पतिसंशयदशायां स्वानुचिताचरणोचितफलोपगमावसरे वा

सहस्व स्वदुरभिनिवेशसम्भवं पतिरोषजनियन्त्रणं मर्षयेत्यर्थः। इह 'मद्वारणमनादृत्य विहितस्याग्रहस्य फलं भुङ्क्ष्व, न मयाऽत्र किमपि प्रतिविधेय' मिति तात्पर्यकस्य वाच्यस्य प्रतिपाद्या नायिका, मया वारिताऽपीयं मत्सखी, वामस्वभावतया सभ्रमरं पद्ममघ्रासीदिति भ्रमरेणास्या अधरो दष्टो, न तूपपतिनेति व्यङ्ग्यस्य प्रतिपाद्यस्तु सन्निहितस्तत्पतिरिति विषयभेदादपि तयोर्भेदः स्ववधारः। अत्र संभविनामन्येषां क्रमशो भासमानानां प्रतिवेशि-सपत्नी-नायिका—तदुपपति-तटस्थादिविषयकाणां व्यङ्ग्यानां विस्तरभिया वर्णनं पृथङ् न कृतमिति लोचनेनालोचनीयम्।

जैसे एक उद्धत नायिकाके ओठमें दन्त-क्षत देखनेसे नायकको इस विषयमें जार पुरुषकी करतूतका संदेह न हो इस तात्पर्यसे वाच्यार्थ द्वारा उस नायिका को फटकारती हुई एक अत्यन्त चतुर सहचरी व्यङ्ग्यार्थ द्वारा उसके पतिको रहस्यभेद छिपानेकी भावनासे सान्त्वना दे रही है—हे सखि! अपनी प्रेयसीका अन्य कृत दन्तक्षत युक्त अधर (ओठ) को देखकर किस पुरुषको क्रोध नहीं होता है (अपितु सबको ही होता है) इसलिये भ्रमरयुक्त कमल पुष्पको सूघनेवाली मेरे द्वारा मना करनेपर भी नहीं माननेवाली तू अभी (पतिरोष दशा में) चाञ्चल्य वश किये हुए अपने अनुचित कर्मसे पतिरोष जन्य नियन्त्रण (यातना) को सह। यहाँ पर 'निषेधात्मक मेरे वचनका अनादर कर, की हुई अपनी करतूतका फल भोगो, मैं इसमें कुछ भी नहीं कर सकती' यह बात नायिकाको लक्ष्यकर कही गई है, जो कि वाच्य है और 'मैंने यद्यपि इसको मना किया फिर भी इसने अपने चंचल स्वभावसे भ्रमरयुक्त कमलको सूंघा अतः भौंरेने इसके अधरको डँस लिया (न कि किसी अन्य पुरुषने)। यह बात उसके पतिको लक्ष्य कर कही गई है वही यहाँ व्यङ्ग्य है अतः नायिका और नायक रूप प्रतिपाद्य व्यक्तियोंके भेदसे स्पष्ट ही वाच्यसे व्यङ्ग्यभिन्न प्रतीत हो रहा है।

'गतोऽस्तमर्कः' इत्यादौ वाच्यव्यङ्ग्ययोर्भेदकानां संख्यादीनामपि सङ्ग्रहार्थमाह—

**अन्ये चैवं प्रकारा वाच्याद्विभेदिनः प्रतीयमानभेदाः संभवन्ति। तेषां दिङ्मात्रमेतत्प्रदर्शितम्।**

विभेदिनो भिन्नाः। प्रतीयमानभेदा व्यङ्ग्यप्रकाराः। दिङ्मात्रं नत्ववधारणम्। तेन सङ्ख्यादिभेदभिन्नानामपि सङ्ग्रहः। तदुक्तं दर्पणे—

'बोद्धृस्वरूपसङ्ख्यानिमित्तकार्यप्रतीतिकालानाम्।
आश्रयविषयादीनां भेदाद्भिन्नोऽभिधेयतो व्यङ्ग्यः।' इति॥

वाच्यसे भिन्न व्यङ्ग्यके और भी दूसरे बहुतसे प्रकार हो सकते हैं, उनका मैंने उदाहरण मात्र बतलाया है।

अलङ्कारात्मकव्यङ्ग्यद्वितीयभेदस्यापि वाच्याद्भेदमुपदिशति—

**द्वितीयोऽपि प्रभेदो वाच्याद्विभिन्नः सप्रपञ्चमग्रे दर्शयिष्यते ।**

द्वितीयोऽलंकाररूपः । सप्रपञ्चम्–सविस्तरम् । अग्रे 'क्रमेणोद्द्योतितः परः' इत्यादिना द्वितीयोद्द्योते । वस्तुध्वनिवदलङ्कारध्वनिर्विधिनिषेध–तदुदासीनरूपत्वेनैव नानुगतः, किन्तु बहुशाख इतीह विस्तरेण न वर्णित इति भावः ।

वाच्यसे अलंकार रूप द्वितीय व्यङ्ग्यका भी सविस्तर भेद द्वितीय उद्द्योत में दिखलाया जायगा ।

रसादिलक्षणं प्रधानतमं व्यङ्ग्यस्य तृतीयमपि भेदं वाच्याद्भिन्नं वदति—

**तृतीयस्तु रसादिलक्षणः प्रभेदो वाच्यसामर्थ्याक्षिप्तः प्रकाशते । न तु साक्षाच्छब्दव्यापारविषय इति वाच्याद्विभिन्न एव ।**

तृतीयो रस–भाव–तदाभास–तदुदय–शान्ति–सन्धि–शबलताध्वनिरूपो व्यङ्ग्य-प्रकारः, वाच्यसामर्थ्याक्षिप्तोऽर्थनिष्ठव्यञ्जनाऽवगतः, प्रकाशते बोधविषयो भवति, न तु साक्षाच्छब्दव्यापारस्याभिधाशक्तेः, विषयस्तत्प्रयोज्यशाब्दधीगोचरो भवति । तथा सति दोषान्तरैः सह स्वशब्दवाच्यत्वमप्यापद्येत ।

तृतीय रसादिरूप प्रधान व्यङ्ग्यका वाच्यसे विलक्षण प्रकार बतलाते हैं—तृतीय इति । तीसरा जो रस, रसाभास, भाव, भावाभास आदि ध्वनिका प्रकार है वह, अर्थनिष्ठ व्यञ्जना वृत्तिसे ही अभिव्यक्त होकर जाना जाता है, न कि शब्द-वृत्ति अभिधावृत्तिसे जाना जाता है । इसलिए भी वाच्यसे व्यङ्ग्यको भिन्न समझना चाहिए, क्योंकि वाच्यार्थ तो अभिधासे ही जाना जाता है ।

रसादीनां वाच्यत्वं खण्डयितुं विकल्पयति—

**तथा हि वाच्यत्वं तस्य स्वशब्दनिवेदितत्वेन वा स्यात्, विभावादि-प्रतिपादनमुखेन वा ।**

तस्य रसादेः, स्वशब्दै रसादिशब्दैश्शृङ्गारादिशब्दैर्वा, निवेदितत्वेनाभिधाद्वारा बोधनेन, विभावादिवाचकशब्दैरभिधाद्वारा विभावादेः, 'यत्परः शब्दः स शब्दार्थः' इति न्यायेन तात्पर्यशक्त्या च रसादेरपि बोधनेन वाच्यत्वं सम्भवति ।

अब रसादिमें वाच्यताका खण्डन करने के लिए दो विकल्प कोटि उपस्थित करते हैं- तथाहि इति । क्या आप (रसादिको वाच्य मानने वाले) उस रसादि रूप व्यङ्ग्यको रसादि शब्द या शृङ्गारादिशब्दोंसे अभिधावृत्ति जन्य बोधद्वारा अथवा विभावादि वाचक शब्दोंसे अभिधाद्वारा विभावादिका और तात्पर्य द्वारा रसादिक बोध होने से वाच्य मानते हैं ?

तत्राद्यपक्षे दोषमाह—

**पूर्वस्मिन्पक्षे स्वशब्दनिवेदितत्वाभावे रसादीनामप्रतीतिप्रसङ्गः।**

रसादि—शृङ्गारादिशब्दैरेव रसादीनामास्वाद इति पूर्वः पक्षः, तदभ्युपगमे तु, रसादिशब्दाभाववति—

भानुमिश्रस्य—

'कर्णकल्पितरसालमञ्जरी—पिञ्जरीकृतकपोलमण्डलः।
निष्पतन्नयनवारिधारया, राधया मधुरिपुर्निरीक्ष्यते॥'

इत्यादौ रसप्रतीतिः,।

रूपगोस्वामिनः—

'अवतंसितमञ्जुमञ्जरे, तरुणीनेत्रचकोरपञ्जरे।
नवकुङ्कुमपुञ्जपिञ्जरे, मतिरास्तां मम गोपकुञ्जरे॥'

इत्यादौ भावप्रतीतिश्च सर्वसम्मताऽपि भवितुं न शक्नुयात्। रसालशब्दस्य व्यूढस्यैव चूते रूढिरिति तद्घटकरसशब्दो निरर्थकः।

प्रथम पक्ष मानने पर 'शून्यं वासगृहम्' यहाँ पर रसादि या शृङ्गारादि शब्दोंके अभाव होनेसे शृङ्गार रसका बोध नहीं होगा।

तामेवानुपपत्तिमुपपादयति—

**न च सर्वत्र तेषां स्वशब्दनिवेदितत्वम्।**

सर्वत्र रसादिप्रत्यायके काव्ये तेषां रसादीनां च न तत्त्वम्। इत्थञ्च रसादिवाचकाभावेऽपि तत्र तत्र रसप्रतीतेर्जागरूकत्वाद्व्यक्तो व्यतिरेकाभावः।

इस प्रकारके सभी रसादि प्रत्यायक काव्योंमें रस, रति आदि शब्दोंके अभावमें भी रसादिकी प्रतीति होने से व्यतिरेक व्यभिचार स्फुट रूपसे प्रतीत हो रहा है।

अथान्वयाभावमपि दर्शयति—

**यत्राप्यस्ति तत् तत्रापि विशिष्टविभावादिप्रतिपादनमुखेनैवैषां प्रतीतिः।**

यत्रापि—

'मीनवती नयनाभ्यां चरणाभ्यामपि प्रफुल्लकमलवती।
शैवालिनी च केशैः सुरसेयं सुन्दरी सरसी॥' इत्यादौ,
'त्रिभुवनकमनं तमालवर्णं, रविकरगौरवराम्बरं दधाने।
वपुरलककुलावृताननाब्जं, विजयसखे रतिरस्तु मेऽनवद्या'॥

इत्यादौ च रसस्य भावस्य च तत् स्वशब्दनिवेदितत्वमस्ति, तत्रापि रसभावास्वादो रसभाववाचकशब्दमहिम्ना नैव भवतः, किन्तु विशिष्टानां मिथस्संसर्गेण विलक्षणानां विभावादीनां, प्रतिपादनमुखेनैव, एषां रसादीनां प्रतीतिरास्वादो भवतीत्यर्थः।

अब अन्वय व्यभिचार भी दिखलाते हैं—यत्राप्यस्तीति। जहाँ कहीं रस भावादि का रसादिशब्दसे कथन भी है वहाँ पर भी रसादिशब्दोंकी महिमासे रसादिका बोध नहीं होता अपि तु परस्परके विलक्षण सम्पर्कसे विभावादिकी उपस्थिति द्वारा ही रसादिकी प्रतीति होती है।

ननु तत्र रसादिशब्दादपि तत्प्रतीतिर्वारयितुमशक्येत्यत आह—

**स्वशब्देन सा केवलमनूद्यते, न तु तत्कृता।**

सा रसादिप्रतीतिः। न तत्कृता न रसादिशब्दप्रयोज्या।

अयम्भावः—रसादिव्यञ्जकाभ्यां रसादिशब्दघटिताभ्यामुक्तवाक्याभ्यां यो रसाद्यास्वादः, स च विभावादिप्रतीतिद्वारको व्यक्तिप्रयुक्त एव, न तु रसरतिशब्दप्रयुक्तः। तत्र रसरतिशब्दौ च शाब्दबोधमात्रं जनयन्तौ तमेवास्वादमनुवदतः, न तु स्वयं तमास्वादं जनयितुमीशाते, व्यभिचारेण तत्कारणताविघटनात्।

रसादि शब्द तो केवल उसका अनुवादमात्र करता है, न कि उससे रसादिकी प्रतीति होती है। इसलिए उक्त पद्यमें स्पष्ट ही अन्वय व्यभिचार दोष लगनेसे रसादि, वाच्य नहीं हो सकता।

तत्र व्यतिरेकिहेतुमाह—

**विषयान्तरे तथा तस्या अदर्शनात्।**

विषयान्तरे विभावादिवाचकशब्दाभाववति रसादिशब्दघटितेऽपि—

'सरसो विपरीतश्चेत् सरसत्वं न मुञ्चति।
साक्षरा विपरीताश्चेद् राक्षसा एव केवलम्।' इत्यादौ,

तथा तादृशालौकिकचमत्कारप्राणत्वप्रकारेण, तस्या रसादिप्रतीतेः, अदर्शनादनुव्यवसायविरहादित्यर्थः। यदि रसादिशब्देभ्य एव रसाद्यास्वादो, न तु विभावादिवाचकशब्देभ्यः, तदा विभावादिप्रतिपादकशब्दाभावेऽपि पूर्वोक्तपद्ये स स्यात्।

विच्छित्तिविधुरं शाब्दधीमात्रं तु तत्रापि भवत्येवेत्याचष्टे—तथेति। प्रत्यक्षातिरिक्तं ज्ञानं न चमत्कारकारीति प्रदीपे स्फुटम्।

उक्त बातको व्यतिरेक प्रदर्शन द्वारा पुष्ट करते हैं—विषयान्तर इति। 'तामुद्वीक्ष्य कुरङ्गाक्षीं रसो नः कोप्यजायत' इत्यादि स्थलोंमें केवल रस रति आदि शब्दोंके

रहने पर भी विभावादि प्रतिपादक शब्दोंके अभावमें तादृश अलौकिक चमत्कार जनक रसादिकी प्रतीति नहीं होती।

तथाह—

नहि केवलशृङ्गारादिशब्दमात्रभाजि विभावादिप्रतिपादनरहिते काव्ये मनागपि रसवत्त्वप्रतीतिरस्ति।

आदिशब्देन वीरकरुणाद्भुतहास्यभयानकबीभत्सरौद्रशान्ता गृह्यन्ते। मनागीषत्। रसवत्त्वस्य रसस्य प्रतीतिरास्वादः, प्रकृत्यर्थे प्रकारीभूतस्य भावत्वात्।

क्योंकि जैसे मधुर शब्द कहने मात्रसे ही मिठासका स्वाद नहीं होता किन्तु जिह्वा द्वारा मधुर वस्तुको चखनेसे ही होता है वैसे ही केवल शृङ्गार शृङ्गार शब्द मात्र बोलनेसे ही शृङ्गार रसका अनुभव नहीं होता अपितु उसके लिए नायक, नायिका, चन्द्र-चन्द्रिका, कोकिल, कलरव, भ्रमर, वसन्त, उद्यान, नदी-तालाब, शीतल, मन्द सुगन्ध पवन आदि साधनोंका काव्य-नाटकादि द्वारा उपस्थित होना अत्यन्त आवश्यक है।

पर्यवसितमाह—

यतश्च स्वाभिधानमन्तरेण केवलेभ्योऽपि विभावादिभ्यो विशिष्टेभ्यो रसादीनां प्रतीतिः। केवलाच्च स्वाभिधानादप्रतीतिः। तस्मादन्वयव्यतिरेकाभ्यामभिधेयसामर्थ्याक्षिप्तत्वमेव रसादीनाम्। नत्वभिधेयत्वं कथञ्चित्। इति तृतीयोऽपि प्रभेदो वाच्याद्भिन्न एवेति स्थितम्।

अभिधीयतेऽभिधया बोध्यतेऽनेनेत्यभिधानं वाचकशब्दः, तद्विनाऽपि, यस्माद्विभावादिप्रतीतिबलेन रसाद्यास्वादो भवति, तत्सत्त्वेऽपि विभावादिप्रतिपादनं विना च न भवति। तस्मात् कार्यसत्त्वे कारणसत्त्वं, कारणाभावे कार्य्याभावः इत्यन्वयव्यतिरेकयोः कारणता-नियामकयोरभावाद्रसादिशब्दानां नैव रसाद्यास्वादजनकत्वम्। इत्थं पूर्वो विकल्पः स्फुटं निरस्तः। द्वितीयस्तु विकल्पः सर्वथा खण्डनं नैवार्हति, विभावादिप्रतीतिद्वारकस्य रसाद्यास्वादस्य स्वीकृतत्वात्, किन्तु तत्र तेषां वाच्यत्वमात्रं खण्डनीयम्, विभावादिवाचकशब्देभ्योऽभिधया तदबोधात्। अत एव कण्ठतस्तदाशक्तिर्नोक्ता। एवञ्च रसादिरूपव्यङ्ग्यतृतीयभेदस्यापि नैव वाच्यता, किन्तु वाच्यसामर्थ्याक्षिप्तत्वमेव। इति तस्मात्। सर्वे त्रयोऽपि, प्रतीयमानप्रकारा वाच्यातिरिक्ता एवेति स्थितं पर्यवसितमित्यर्थः।

अब सबका सारांश बतलाते हैं—यतश्चेति। अर्थात् रस रत्यादि शब्दोंके बिना भी विभावादिकी प्रतीतिसे रसादि आस्वादित होता है और रसादि शब्द रहने

पर भी विभावादिकी प्रतीति बिना रसादिका आवाद नहीं होता इसलिये अन्वय-व्यभिचार (कारणके रहनेपर भी कार्य न होना) और व्यतिरेक व्यभिचार (कारण-के नहीं रहने पर भी कार्य होना) लग जानेसे रसादि प्रतीतिके प्रति रसादि शब्दोंमें कारणताग्राहक अन्वय-व्यतिरेक—'कारणत्वे कार्यसत्ता कारणाभावे कार्याभावः'। का अभाव है अतः रसादि शब्दोंसे रसादिका बोध नहीं होता किन्तु, व्यञ्जना वृत्तिसे ही अभिव्यञ्जित होकर रसादि, अलौकिक चमत्कारजनक होता है। इस प्रकार व्यङ्ग्य रसादिमें वाच्यत्वका खंडनसे प्रथम विकल्पके खण्डित हो जाने पर भी दूसरे विकल्पका बिलकुल खण्डन नहीं हो सकता, क्योंकि विभावादि प्रतीति द्वारा रसास्वादको सबने माना है, किन्तु इतना अवश्य समझना चाहिये कि इस पक्षमें भी अभिधाद्वारा विभावादिवाचक शब्दोंसे रसादिका बोध नहीं होनेसे रसादि वाच्य नहीं हैं अपितु व्यङ्ग्य ही हैं। इस तर उक्त तीनों ही (वस्तु, अलंकार, रसादि रूप) व्यङ्ग्य प्रकार वाच्यसे अतिरिक्त सिद्ध हुए।

रसादि प्रतीतेरलक्ष्यक्रमत्वं समासेनाह—

वाच्येन त्वस्य सहेव प्रतीतिरित्यग्रे **दर्शयिष्यते**।

अस्य रसादिरूपव्यङ्ग्यस्य, न तु **वस्त्वलङ्कारयोः**, प्रतीतिर्वाच्येन सह सम-मिव, न तु सहैव; न वा चिरकालोत्तरम्, **भवतीत्यग्रे द्वितीयोद्द्योते**—'रसभावतदा-भासभावशान्त्यादिरक्रमः, इति कारिकाया तृतीयोद्द्योते—प्रघट्टकेन च दर्शयिष्यत इत्यर्थः। कार्यकारणभावाद्वाच्यप्रतीतेः पश्चाद्भवन्त्या अपि रसादिप्रतीतेर्लाघवातिरेकेण क्रमः सम्यङ् न लक्ष्यत इत्यसंलक्ष्यक्रमत्वं रसादीनामिवशब्दो व्यनक्ति।

वाच्य प्रतीतिके अव्यवहित (तुरत) उत्तरक्षणमें ही व्यङ्ग्य रसादि की प्रतीति को संक्षेपसे कहते हैं—वाच्येनेति। इस रसादि रूप व्यङ्ग्य (न कि वस्तु अलंकार रूप व्यङ्ग्य) की प्रतीति वाच्य प्रतीतिके तुरत ही उत्तरक्षणमें (न कि साथ ही नापि अधिक देरके बाद ही) होती है, यह बात आगे कहेंगे। उक्त दोनों वाच्य और व्यङ्ग्योंकी प्रतीतिमें अत्यन्त सूक्ष्म व्यवधान होनेसे इन रसादिको असंलक्ष्य-क्रमव्यङ्ग्य कहा है।

रसादिरूपव्यङ्ग्य एव काव्ये जीवनाधायक इति प्राचीनेतिवृत्तोपन्यासेन द्रढयति—

**'काव्यस्यात्मा स एवार्थस्तथा चादिकवेः पुरा।**
**क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः॥ ५॥**

स व्यङ्ग्यो रसादिरेवार्थः काव्यस्य जीव इव शरीरस्य जीवनाधायकत्वादात्मा प्रधानमस्तीति शेषः। तथा च आदिकवेर्वाल्मीकेः क्रौञ्चद्वन्द्वस्य वकोटमिथुनस्य

वियोगादेकस्य व्याधेन हननाज्जायमानाद्विरहाद् उत्थः—उत्पन्नः, शोकः करुणरसस्थायिभावः, श्लोकत्वं छन्दोबन्धविशिष्टपद्यत्वम् , आगतः प्राप्त इत्यर्थः।

रसादि रूप व्यङ्ग्य ही काव्यका जीवनाधायक है इस बातको प्रचीन एक कथानक द्वारा पुष्ट करते हैं—काव्यस्येति। वह कोई विलक्षण ही आह्लादजनक व्यङ्ग्य रसादि काव्यका सर्वस्व माना गया है, यह बात स्पष्टही एक प्राचीन घटनासे अत्यन्त तथ्य परिपूर्ण मालूम पड़ती है—एक क्रौञ्च नामके पक्षीविशेषके जोड़ेमें एकका व्याध द्वारा हनन जन्य वियोगसे दूसरीका करुणाक्रन्दन युक्त विलाप सुनकर अत्यन्त करुणासे द्रवित चित्त आदिकवि वाल्मीकि ऋषिका उत्पन्न शोक ही श्लोक रूपमें परिणत हो गया।

इह त्रिविधानामपि व्यङ्ग्यानां प्रक्रमेऽपि सन्निकर्षविशेषवशाद् वृत्तिग्रन्थबलाच्च तच्छब्देन रसादिरेव गृह्यते। तदेव विशदीकरोति—

**विविधवाच्यवाचकरचनाप्रपञ्चचारुणः काव्यस्य स एवार्थः सारभूतः। तथा चादिकवेर्वाल्मीकेर्निहतसहचरीविरहकातरक्रौञ्च्याक्रन्दजनितः शोक एव श्लोकतया परिणतः।**

विविधेन नानासंविधानेन, वाच्यवाचकयोरर्थशब्दयोः, रचनायाः प्रपञ्चेन विन्यासेन 'चारुणो मनोरमस्य, काव्यस्य, स रसादिरेवार्थः सारभूतः प्रधानम्। तथाच—आदिकवेर्वाल्मीकेः निहतस्य, व्याधेन मारितस्य सहचरस्य विरहेण कान्तस्य वियोगेन कातरायाः—विह्वलायाः क्रौञ्च्या आक्रन्दाज्जनितश्श्रवणागोचरीभूतः, शोकश्चित्तवृत्तिविशेष एव श्लोकतया पद्यरूपेण परिणतः पर्यवसन्न इत्यर्थः। 'सन्निहितसहचरीविरहकातरक्रौञ्चाक्रन्दजनितः' इति पाठः, क्रौञ्चद्वन्द्ववियोगेन सहचरीहननोद्भूतेन साहचर्यध्वंसनेन' इत्यादिव्याख्यानञ्च न सम्यक्—,

तस्मात्तु मिथुनादेकं पुमांसं पापनिश्चयः।
जघान वैरनिलयो निषादस्तस्य पश्यतः॥

इति तदीयरामायणे निषादकृतक्रौञ्चघातस्यैव सिद्धेः, तत्समधिरस्कतया मतिमारूढे श्रीरामचरितात्मकद्वितीयार्थेऽपि रावणवधस्यैव प्रसिद्धेश्च। अत एव 'कञ्चन क्रौञ्चमिथुनादेकं पञ्चशरविद्धमपि व्याधेनानुविद्धम्' इति भोजमहाराजः प्रायुङ्क्त। एतेन 'अनुप्रेषितश्च स तया निषादनिहतसहचरीकं क्रौञ्चयुवानं करुणक्रेङ्कारया गिरा क्रन्दन्तमुदीक्ष्य शोकवान् श्लोकमुज्जगाद' इति राजशेखरोक्तिरप्यपहस्तितैव।

ननु चित्तवृत्त्यात्मकशोकस्य शब्दार्थरूपश्लोकत्वपरिणामो न सम्भवतीति चेत्? सत्यम्। न हि परिणामोऽत्र साङ्ख्याभिमतं कारणसमसत्ताकं कार्यं मन्यते, किन्तु 'वृक्षः फलरूपेण परिणतः' इत्यादिवत् फलं कार्यमात्रम्। तथा च शोकास्वादानन्तरं मुनिहृदये सहसैव श्लोकस्याविर्भावेन 'तदुदितः स हि यो यदनन्तरः' इति न्यायेन शोकस्य श्लोकः परिणामः सङ्गच्छते। एषा विचित्रपरिणतिरेव स्वशिष्यं भरद्वाजं प्रति 'अहो किमिदम्' इति प्रश्नहेतोर्मुनिविस्मीयितत्वस्य मूलम्। 'न मुनेः शोक इति मन्तव्यम्' इत्यादिलोचनन्तु चिन्त्यम्, क्रौञ्चस्य शोकालम्बनविभावतायास्तत्रैवोक्तत्वेन तस्य क्रौञ्चवृत्तित्वेन वक्तुमशक्यत्वात्। 'चर्वणा च सामाजिकानामिति तेष्वेव रसः' इत्यादिना प्रदीप आस्वादात्मनो रसादेरालम्बनेऽस्वीकारादनायत्या मुनौ तत्कल्पनात्। न च मुनेः शोकाङ्गीकारे दुःखितया तद्वृत्तिशोकस्य दुःखसंवलनाश्काव्यात्मत्वं न स्यादिति वाच्यं? मुनेर्दुःखित्वेऽप्यानन्दचिन्मयस्य रसादेरात्मत्वेऽबाधात्। लौकिकस्य शोकस्योद्वेजकत्वेऽप्यलौकिकभावताऽऽपत्तिदशायामानन्दरूपं हि सर्वसम्मतं। रस्यमानतास्थितावेव हि शोकस्य रसादिपदवाच्यत्वम्।

एवं तेन यदाह भट्टनायकः—

> 'शब्दप्राधान्यमाश्रित्य तत्र शास्त्रं पृथग्विदुः।
> अर्थतत्त्वेन युक्तं तु वदन्त्याख्यानमेतयोः।
> द्वयोर्गुणत्वे व्यापारप्राधान्ये काव्यधीर्भवेत्।' इति।

तदपास्तम्। व्यापारो हि यदि ध्वननात्मा रसनास्वभावः, तन्नापूर्वमुक्तम्। 'अथाभिधैव व्यापारः, तथाप्यस्याः प्राधान्यं नेत्यावेदितं प्राक्' इतिभट्टनायकोक्तिखण्डनमपि चिन्त्यमेव, रसनाख्यव्यापारस्य सर्वानभ्युपगमादशातुश्च कृतेऽपूर्वत्वादित्यलं प्राचीनवचनपर्य्यालोचनयेति दिक्।

उक्त बातको ही वृत्तिकार विश्लेषण द्वारा विशदरूपसे प्रतिपादन करते हैं—विविधेति। अनेक प्रकारके शब्दार्थोंकी रचनाके विन्याससे अत्यन्त मनोरम काव्य का प्रतीयमान रसादि ही सारभूत वस्तु है, यह बात एक प्राचीन वृत्तान्तसे स्पष्ट प्रतीत हो रही है—व्याधके द्वारा मारे गये अपने प्राणप्रिय सहचर क्रौञ्च पक्षी विशेषके वियोग से अत्यन्त विह्वल क्रौञ्चीके करुणमय क्रन्दनसे वाल्मीकिका दयासे द्रवित चित्तवृत्ति विशेष शोक ही वक्ष्यमाणश्लोक रूपमें प्रकट हो गया।

आदिकवेः श्लोकं निर्दिशति—

> 'मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीः समाः।
> यत्क्रौञ्चमिथुनादेकमवधीः काममोहितम्॥' इति

हे निषाद ! तु निश्चयेन मा नास्ति यस्य सोऽमो निश्श्रीकस्तत्सम्बोधने हे अम ! ( त्वम् ) शाश्वतीरपरिमिताः, समा वर्षाणि यावत् प्रतिष्ठां स्थितिं मा गमो न प्राप्नुहि, द्रुतं म्रियस्वेति यावत् । यद् यस्मात् कामेन मोहितं मदनातुरम्, क्रौञ्च-मिथुनाद्बकविशेषद्वन्द्वादेकं पुमांसम्, अवधीर्निहतवानिति शोकपक्षीयोऽर्थः ।

अस्य श्लोकस्य रामायणाविर्भावमूलतया रामपक्षीयार्थस्तु— निषीदति तिष्ठत्य-स्मिन्निति निषाद आश्रयः, माया लक्ष्म्या निषादो मानिषादस्तत्सम्बुद्धौ हे मानि-षाद ! श्रीनिवास ! राम ! त्वं शाश्वतीः समाः प्रतिष्ठाम् अगमः प्राप्तवानसि । यत् क्रुञ्चा कुटिलगतिकत्वाद्राक्षसी कैकसी तदपत्यं पुमान् क्रौञ्चो रावणस्तत्पत्नी च क्रौञ्ची मन्दोदरी, तयोर्मिथुनादेकं काममोहितं रावणमवधीरिति ।

इह यच्छब्दस्योत्तरवाक्यघटकतया 'साधु चन्द्रमसि पुष्करैः कृतं मीलितं यद-भिरामताऽधिके' इत्यादिवन्नैव तच्छब्दोपादानापेक्षा । पूर्वार्धे 'माङो योगेऽपि छान्द-सत्वादडागमः' इति कस्यचन व्याख्यानन्तु 'अम' इति छेदेनैव निरवलम्बनीकृतम् ।

आदि कविका वह श्लोक दिखलाते हैं- मा निषादेति । हे निषाद ! तुम निश्चय ही अधिक वर्षों तक इस जगत् में स्थितिको मत प्राप्त होवो अर्थात् शीघ्र ही मर जाओ । क्योंकि क्रौञ्चनामक पक्षी विशेषके जोड़ेमें एक को जो कि, अत्यन्त कामातुर था, निरपराध तुमने मार डाला ।

शोकस्यैतत्काव्यजीवितत्वबीजभूतं व्यङ्ग्यत्वमाह—

**शोको हि करुणरसस्थायिभावः प्रतीयमानरूप एवेति प्रतिपादितम् ।**

करुणरसस्य—

> 'प्रकृष्यमाणो यो भावो रसतां प्रतिपद्यते ।
> स एव भावः स्थायीति भरतादिभिरुच्यते ॥'

इत्युक्तलक्षणः स्थायी भावः, 'पुत्रादिमरणजन्मा वैक्लव्याख्यश्चित्तवृत्तिविशेषः शोकः' इतिजगन्नाथलक्षितः शोको व्यङ्ग्य एवात्र काव्ये जीवितम्, न तु वाच्य इत्युक्तमेवेत्यर्थः । वस्त्वलङ्कारध्वन्योः सतोरपि चमत्कारोत्कर्षनिबन्धनं रसादि-ध्वनेरेवात्मत्वम् । यत्र तु रसादिध्वन्यभावः तत्र तयोरपि चमत्कारितया कुश-काशन्यायेन काव्यजीवितत्वम् । इहादिकविपद्येपि प्रथमार्थेन प्रधानतया प्रतीयमानः करुणस्थायी शोक एव जीवितम् ।

करुणारस का स्थायिभाव पुत्रादिमरण जन्य वैक्लव्याख्य चित्तवृत्ति विशेषरूप शोक ही उक्त स्थलमें काव्यका अनुप्राण स्वरूप बीजभूत व्यङ्ग्य है, वाच्य नहीं, यह हम पहले ही प्रतिपादन कर चुके हैं ।

'योऽर्थः सहृदयश्लाघ्य: काव्यात्मेति व्यवस्थितः' इत्यनेन सर्वेषामेव प्रतीयमानानामुपक्षिप्तं काव्यात्मत्वं रसादिमात्रस्य तत्त्वव्यवस्थापनेन विरुद्धमित्यत आह—

प्रतीयमानस्य चान्यप्रभेददर्शनेऽपि रसभावमुखेनैवोपलक्षणम्; प्राधान्यात् ।

यद्यपि व्यङ्ग्यस्य वस्त्वलङ्काररूपं भेदद्वयमपरमप्यस्ति, किन्तु विच्छित्तिविशेषाधानात् प्राधान्येन रसभावादीनां मुखेनैव द्वारेणैव, उपलक्षणं तयोरपि भासनमित्यर्थः । अभिप्रायस्तु प्रागेव स्फुटीकृतः ।

यद्यपि व्यङ्ग्यके वस्तु और अलङ्कार रूप और भी दो भेद हैं, किन्तु मुख्यरूपसे चमत्कारविशेष प्रतिपादक काव्यका वास्तवमें जीवनभूत रस, भाव आदिके द्वारा ही उन दोनोंको काव्यका जीवन समझना चाहिये । वास्तवमें काव्यका जीवन सर्वस्व तो व्यङ्ग्य रस भावादि ही है ।

प्राचीनेतिवृत्तावलम्बेन व्यङ्ग्यस्य रसादेः काव्यात्मत्वं प्रतिपाद्य सम्प्रति तामेवान्यथाऽपि व्यवस्थापयति—

(6) **'सरस्वती स्वादु तदर्थवस्तु निःष्यन्दमाना महतां कवीनाम् ।**
**अलोकसामान्यमभिव्यनक्ति परिस्फुरन्तं प्रतिभाविशेषम् ॥६॥'**

स्वादु चर्वणीयं, तदर्थवस्तु रसादिव्यङ्ग्यार्थरूपतत्त्वं, निःष्यन्दमाना—

'वाग्धेनुर्दुग्ध एकं हि रसं यद्बालतृष्णया ।
तेन नास्य समः स स्याद् दुह्यते योगिभिर्हि यः ॥'

इति भट्टनायकोक्तेर्दुग्धं कामधेनुरिव स्वयं प्रस्नुवाना, महतां प्रतिभातिशयेन गुरूणां कवीनाम्, सरस्वती भारती अलोकसामान्यम्—अलौकिकमसर्वसाधारणं दिव्यमिति यावत्, परिस्फुरन्तमतिभासमानम्, प्रतिभाविशेषं (तदीय) सरसकाव्यरचनानिदान—नवनवोन्मेषशालिप्रज्ञातिरेकम्, अभिव्यनक्ति सूचयतीत्यर्थः ।

कविप्रतिभाया भासमानत्वेनानुभवविषयताऽप्यनुमन्यते न केवलमनुमितिगोचरतैव,

'नायकस्य कवेः श्रोतुः समानोऽनुभवस्ततः'

इति तौतभट्टोक्तेः ।

प्राचीन उक्त वृत्तान्त द्वारा व्यङ्ग्य भूत रसादि को काव्यका जीवन बतलाकर उसीको दूसरे ढंगसे भी कहते हैं—सरस्वती इति । सरसजनोंके आस्वादन योग्य

अतिशय रमणीय रसादि व्यङ्ग्यार्थरूपतत्त्वको कामधेनुकी तरह स्रवित करती हुई कविशिरोमणियोंकी वाणी, स्फुरायमाण दिव्य अलौकिक सरस काव्यरचनाकी निदानभूत नई नई स्फूर्त्तिशाली कविकी विलक्षण प्रतिभाको सूचित करती है।

कारिकां विवृणोति वृत्तिकृत्—

**भारती तद् वस्तुतत्त्वं निःष्यन्दमाना महतां कवीनाम् अलोकसामान्यं प्रतिभाविशेषं परिस्फुरन्तमभिव्यनक्ति।**

व्याकृतोऽर्थः॥

वृत्तिकार उक्तार्थको अभिव्यक्त करनेकी भावनासे कारिकाकी व्याख्या करते हैं—भारती इति। उन कवियों की सरसवाणी, अलौकिक आनन्दजनक व्यङ्ग्य रसादिको प्रस्रवित करती हुई, महान कवियोंके लोकोत्तर चमत्कारशाली प्रतिभा विशेषको व्यक्त करती है।

स प्रतिभाविशेष एव महाकवित्वस्य सम्पादक इति दर्शयति—

**येनास्मिन्नतिविचित्रकविपरम्परावाहिनि संसारे कालिदासप्रभृतयो द्वित्राः पञ्चषा वा महाकवय इति गण्यन्ते।**

येन परिस्फुरत्प्रतिभाविशेषेण हेतुना, अतिविचित्रकविपरम्परावाहिनि नैकप्रकारकत्वेनाद्भुततरकविपरिपाटीधारणपटीयसि, अस्मिन् संसारे, कालिदासप्रभृतयस्तत्सदृशाः द्वौ वा त्रयो वा द्वित्राः, पञ्च वा षट् वा पञ्चषा एव, न त्वन्येऽपि बहवः महाकवय इति गण्यन्ते महाकवित्वेन सङ्ख्यायन्त इत्यर्थः।

तादृशप्रतिभाया एव महाकवित्वख्यातिमूलत्वादनेकेषु जातेषु जायमानेषु कविषु, विरलानामेव महाकवित्वेन गणनेत्यभिप्रायः।

इसी प्रतिभाविशेषके कारण अनेकों प्रकारकी अपनी विद्वत्ताद्वारा विश्वको ही चकित करनेवाले कवि परम्पराओंको निर्माण द्वारा धारण करनेवाले इस अनादि संसारमें विरले ही इने-गिने दो-तीन या पांच-छः कालिदास प्रभृत्ति विद्वान्, महाकवियोंमें गिने गये, दूसरे नहीं, यही कारण है कि वह कुछ निराली अनुपम प्रतिभा सबमें नहीं हो पाई।

सम्प्रति वाच्यव्यङ्ग्ययोः प्रतीतिसामग्रीभेदनिबन्धनमपि भेदं दर्शयितुमुपक्षिपति—

**इदं चापरं प्रतीयमानस्यार्थस्य सद्भावसाधनं प्रमाणम्।**

चकारः प्रागुक्तबोद्धृस्वरूपसङ्ख्यादीनि भेदकान्तराणि समुच्चितानि सूचयति। भेदसिद्धौ सुतरां सद्भावसिद्धिरिति पूर्वापरसन्दर्भसङ्गतिरनुसन्धेया।

अब वाच्यसे व्यङ्ग्यका प्रतीतिजनक सामग्रियोंके भेद प्रयुक्त भी, पार्थक्य बतलाते हैं—इदमिति। यह (अभी तुरत वक्ष्यमाण) व्यङ्ग्यार्थबोधजनक सामग्री और बोद्धव्य, (प्रतिपाद्य व्यक्ति) स्वरूप, संख्या आदि पदार्थ, प्रतीयमान व्यङ्ग्यार्थ के भेद-सिद्धिसम्पादनमें प्रधान साधक प्रमाण हैं।

तमेव भेदकमाह—

'शब्दार्थशासनज्ञानमात्रेणैव न वेद्यते।
वेद्यते स तु काव्यार्थतत्त्वज्ञैरेव केवलम् ॥ ७ ॥

स-व्यङ्ग्योऽर्थः, हि-यतः, शब्दार्थशासनमात्रेणैव केवलेन शब्दसाधकार्थव्युत्पादकव्याकरणकोशज्ञानेन, न वेद्यते नावगम्यते, किन्तु केवलं परं, काव्यार्थतत्त्वज्ञैः काव्यसारार्थभावकैः, वेद्यते, तस्माद्वाच्यतोऽतिरिक्त एवेत्यर्थः।

भावना वाच्यादिवैलक्षण्येन शश्वदनुसन्धानम्। वेद्यत इत्यविवक्षितप्रेरणार्थाद्वेत्तेर्णिजन्तात्कर्मणि तङ्। विद्यत इति पाठस्तूचितः। 'गतोऽस्तमर्कः' इत्यादौ सूर्यकर्तृकास्तङ्गतिरूपवाच्यार्थस्यैव बोधे व्याकरणादिव्युत्पत्तिः कारणम्, सन्तापासद्भावादिनानाविधव्यङ्ग्यार्थावगमे तु काव्यार्थभावनापरिपक्वप्रज्ञैव कारणमिति प्रतीतिसामग्रीभेदहेतुकस्तयोर्भेद इति सारम्॥

उसी भेदसाधक सामग्रीको कहते हैं—शब्दार्थेति। क्योंकि वह व्यङ्ग्यार्थ केवल शब्दार्थव्युत्पादक व्याकरणकोशादि ज्ञानसे ही नहीं जाना जाता अपितु काव्यार्थके सरस मर्मज्ञोंसे ही जाना जाता है। एवं 'गतोऽस्तमर्कः' यहाँ पर व्याकरणादिसे 'सूर्य छिप गया' इस वाच्यार्थका ज्ञान होनेपर भी 'ताप शान्ति, अभिसरणादि' नानाविध व्यङ्ग्यार्थका बोध काव्यार्थपरिशीलनजन्य परिपक्वबुद्धिवालोंको ही होता है इसलिये वाच्यसे वह व्यङ्ग्य बिलकुल भिन्न ही है।

तदेवाह वृत्तिकारः—

(शब्दार्थशासनज्ञानमात्रेऽपि परं न वेद्यते सोऽर्थो यस्मात्केवलं काव्यार्थतत्त्वज्ञैरेव ज्ञायते।)

व्याख्यातप्रायमेतत् ॥

उक्त बातको ही वृत्तिकार स्पष्ट करते हैं—शब्दार्थेति। अर्थात् शब्दार्थ प्रतिपादक व्याकरणादि ज्ञानमात्रसे उस विलक्षण व्यङ्ग्यार्थको जाननेमें कोई भी व्यक्ति समर्थ नहीं होता, किन्तु केवल काव्यार्थ रहस्यवेत्ता ही उसको जान सकता है।

तयोर्भेदकं तर्कमाख्याति—

(यदि च वाच्यरूप एवासावर्थः स्यात्, तद्वाच्यवाचकस्वरूपपरिज्ञानादेव तत्प्रतीतिः स्यात्।)

वाच्यवाचकस्वरूपपरिज्ञानं पदप्रत्यक्षपूर्विका पदार्थोपस्थितिः।

उसीमें तर्क उपस्थित करते हैं—यदि चेति। यदि वाच्यरूप ही वह व्यङ्ग्यार्थ होता तो अभिधावृत्तिज्ञान द्वारा पदश्रवणजन्य पदार्थोपस्थिति मात्रसे ही जाना जा सकता, परन्तु ऐसा नहीं होता है, अतः वाच्यसे व्यङ्ग्य भिन्न वस्तु है।

तत्र सनिदर्शनं व्यतिरेकमाह—

(अथ च वाच्यवाचकलक्षणमात्रकृतश्रमाणां काव्यतत्त्वार्थभावनाविमुखानां स्वरश्रुत्यादिलक्षणमिव प्रगीतानां गान्धर्वलक्षणविदामगोचर एवासावर्थः।)

यथा गान्धर्वलक्षणविदो सङ्गीतशास्त्रीयपदार्थसम्बन्धीनि लक्षणानि न तु लक्ष्याण्यपि जानतां पुंसाम्, प्रगीतानां प्रकृष्टगीतसम्बन्धी स्वरः—

'श्रुत्यनन्तरभावी यः स्निग्धोऽनुरणनात्मकः।
स्वतो रञ्जयति श्रोतुश्चित्तं स स्वर उच्यते॥'

इति सङ्गीतरत्नाकरोक्तलक्षणो निषादादिसप्तविधो ध्वनिविशेषः,

श्रुतिः—'प्रथमश्रवणाच्छब्दः श्रूयते ह्रस्वमात्रकः।
सा श्रुतिः सम्परिज्ञेया स्वरावयवलक्षणा।'

इति तदुक्तलक्षणः स्वराद्यवयवात्मकः स्वनः, तल्लक्षणं तद्रूपं वस्तु, अगोचरो बुद्धेरविषयः, लक्ष्याज्ञानात्, तथा वाच्यवाचकलक्षणमात्रे केवलशब्दार्थज्ञापकशास्त्रे कृतश्रमाणां काव्यार्थभावनाविमुखानामसहृदयवैयाकरणानाम्, असौ व्यङ्ग्योऽर्थः, बुद्ध्यविषय इत्यर्थः।

यद्वा—यथा गान्धर्वलक्षणविदां स्वरश्रुत्यादिलक्षणं गोचरः, तथा नायं शब्दार्थमात्रविदां गोचर इति व्यतिरेकदृष्टान्तोऽयं द्रष्टव्यः। किन्त्वस्मिन् पक्षे नञः समासो दुर्घटः। 'अप्रगीतानाम्' इतित्वपपाठः, सन्दर्भाशुद्धेः।

अब व्यतिरेक द्वारा उसीका उपसंहार करते हैं—अथ चेति। संगीत शास्त्र सम्बन्धी लक्षणमात्रको जाननेवाले लक्ष्यज्ञानशून्य व्यक्तियोंको जैसे अनुरणनात्मक ध्वनि, विशेषस्वर, श्रुति, लय, ताल, आरोह और अवरोह आदिका कुछ भी ज्ञान नहीं हो पाता वैसे ही शब्दार्थमें अभिधा नामक शक्तिमात्रके परिच्छेदक

व्याकरण कोशादिके परिशीलनमें अधिक परिश्रमशील होते हुए भी काव्यार्थके आन्तरिक परिशीलनसे सर्वथा वञ्चित नीरस वैयाकरणोंको व्यङ्ग्यार्थका बिलकुल ही ज्ञान नहीं होता है।

इदानीं प्रतीयमानार्थस्य [illegible] प्रक्रमते—

एवं वाच्यव्यतिरेकिणो व्यङ्ग्यस्य सद्भावं प्रतिपाद्य प्राधान्यं तस्यैवेति प्रतिपादयति—

**'सोऽर्थस्तद् व्यक्तिसामर्थ्ययोगी शब्दश्च कश्चन ।**
**यत्नतः प्रत्यभिज्ञेयौ तौ शब्दार्थौ महाकवेः ॥ ८ ॥**

स व्यङ्ग्योऽर्थः, स पुनः, कश्चन न सर्वः, तस्य प्रविरलत्वात्, तस्य व्यङ्ग्यस्य व्यक्तिसामर्थ्येन व्यञ्जनशक्त्या योगः सम्बन्धोऽस्त्यस्येति तादृशः **शब्दः, तौ शब्दार्थौ** महाकवेः यत्नतः प्रत्यभिज्ञेयावित्यर्थः। महाकवेरिति कर्तरि षष्ठी। **प्रत्यभिज्ञानमिह** ज्ञातस्यापि शश्वदनुसन्धानरूपं निरूपणम्, न तु तदेवेदमिति प्रतीतिमात्रम् ॥

उक्त रीतिसे वाच्यसे अत्यन्त भिन्न व्यङ्ग्यका अस्तित्व स्थापित कर, काव्यमें उसीकी प्रधानतामें युक्ति बतलाते हैं—सोऽर्थ इति। वह कोई विरल ही विलक्षण व्यङ्ग्यार्थ है और व्यञ्जना वृत्तिद्वारा उसका अभिव्यञ्जक शब्दार्थ भी विरल ही है, इसलिये महाकवियोंको चाहिये कि इन दोनों व्यङ्ग्य-व्यञ्जकोंको बड़ी सतर्कतासे पहचानें अर्थात् बारंबार अनुसंधानद्वारा मनन-परिशीलनकर उसको हृदयङ्गम करें।

कारिकां विवृणोति वृत्तिकृत्—

**स व्यङ्ग्योऽर्थस्तत्प्रकाशनसामर्थ्ययोगी शब्दश्च कश्चन, न सर्वः। तावेव शब्दार्थौ महाकवेः प्रत्यभिज्ञेयौ व्यङ्ग्यव्यञ्जकाभ्यामेव हि सुप्रयुक्ताभ्यां महाकवित्वलाभो महाकवीनाम्, वाच्यवाचकरचनामात्रेण।**

व्यक्तिर्व्यञ्जनम्। नहि सर्व एव शब्दोऽर्थो वा व्यञ्जकः, किन्तु विरल एव। न वा व्यङ्ग्यव्यञ्जकप्रयोगमन्तरेण महाकवित्वसम्पत्तिः, तस्मान्महाकवित्वमाशासानस्य तादृशशब्दार्थभावनाविशेष एवावश्यक इत्याशयः।

वृत्तिकार उक्त कारिकाकी व्याख्या करते हैं—स व्यङ्ग्य इति। वह व्यङ्ग्यार्थ और उसका व्यञ्जक शब्द या अर्थ भी विरल ही है, सब नहीं। अतः महाकवि उन्हीं दोनोंको अपना प्रधान लक्ष्य समझकर अपनावें। क्योंकि व्यङ्ग्य-व्यञ्जक-

भावसे प्रयोग करने पर ही महाकवित्व शक्ति प्राप्त होती है, न कि केवल वाच्य-वाचक मात्रको प्रयोग करनेसे कवित्व शक्ति प्राप्त होती है।

ध्वनिमार्गे वाच्यवाचकयोर्बहिरङ्गत्वेऽपि प्रथमोपादानप्रयोजनमुपपादयति—

इदानीं व्यङ्ग्यव्यञ्जकयोः प्राधान्येऽपि यद्वाच्यवाचकावेव प्रथममुपाददते कवयस्तदपि युक्तमेवेत्याह—

'आलोकार्थी यथा दीपशिखायां यत्नवाञ्जनः।
तदुपायतया, तद्वदर्थे वाच्ये तदादृतः॥ ९॥

आलोकार्थी प्रकाशं प्रकाशनं वाऽभिलषन्, जनो यथा तदुपायतया प्रकाशकारणत्वेन दीपस्य शिखायां कीलकलिकायां यत्नवान् भवति, तद्वत् तथा तदादृतो व्यङ्ग्यार्थप्रतीतिविषयकादरयुक्तो व्यङ्ग्यं बुभुत्सुरिति यावत्, तज्जनकतया वाच्येऽर्थे तदवगमे यत्नवान् भवतीत्यर्थः। कार्यस्य प्राधान्येऽपि कारणोपादानं प्रागेव युक्तम्, न च तावता तस्य प्राधान्ये काचन क्षतिरिति भावः।

अब व्यङ्ग्य-व्यञ्जकका प्राधान्य होनेपर भी वाच्य-वाचक के ही प्रथम उपादान-का कारण बतलाते हैं—आलोकार्थी इति। जैसे प्रकाश (रोशनी) चाहनेवाला व्यक्ति उसका साधन होनेसे पहले दीपशिखाको ही तैलादिद्वारा जलानेके लिये सतर्क होता है, वैसे ही व्यङ्ग्यार्थके प्रति अधिक स्नेह रखनेवाले व्यक्ति भी उसके मूल कारण वाच्य-वाचकको ही पहले अपनाते हैं। अन्यथा व्यङ्ग्यका बोध होना असम्भव हो जायगा।

तदाह वृत्तिकारः—

यथा ह्यालोकार्थी सन्नपि दीपशिखायां यत्नवाञ्जनो भवति तदुपायतया। नहि दीपशिखामन्तरेणालोकः संभवति। तद्वद्व्यङ्ग्यमर्थं प्रत्यादृतो जनो वाच्येऽर्थे यत्नवान्भवति।

वाच्यव्यङ्ग्यप्रतीत्योः कार्यकारणभावस्त्वग्रेऽपि व्यवस्थापयिष्यते साम्प्रतन्तु प्रासङ्गिकः सनिदर्शनः समुद्देशः।

उक्त बातको ही वृत्तिकार विशद करते हैं—यथा इति। जैसे उजियाला चाहने-वाला व्यक्ति पहले दीपकलिकाको ही अपनाता है, क्योंकि उसके बिना प्रकाश नहीं हो सकता, वैसे ही परम रमणीय सरस रसादि व्यङ्ग्यार्थके प्रति अधिक प्रेमी व्यक्तिको भी पहले वाच्यका ग्रहण करना आवश्यक है।

प्रकृतोपयोगं दर्शयति—

**अनेन प्रतिपादकस्य कवेर्व्यंङ्ग्यमर्थं प्रति व्यापारो दर्शितः ।**

व्यङ्ग्यार्थंबुबोधयिषयैव कविः शब्दं प्रयुङ्क्त इति तस्यैव परमोद्देश्यतया प्राधान्यमित्याशयः ।

उक्त उपक्रमसे यह सारांश निकला कि—व्यङ्ग्यार्थको बतलाने की भावनासे ही कवि शब्द प्रयोग करता है, इसलिये व्यङ्ग्य रसादि ही कविके मुख्य उद्देश्य होनेसे प्रधान हैं, परन्तु व्यङ्ग्यार्थ प्रतीतिके लिये वाच्यार्थ ज्ञानको ही द्वार समझना चाहिये अर्थात् वाच्यार्थ ज्ञानके द्वारा ही व्यङ्ग्यार्थका बोध होता है ।

न केवलं वक्तुरेव सोऽर्थं उद्देश्यभूतः, किन्तु बोद्धुरपीत्याह—

**प्रतिपाद्यस्यापि तं दर्शयितुमाह ।**

तच्छब्दो व्यङ्ग्योद्देश्यकव्यापारं परामृशति ।

सदृष्टान्तप्रदर्शनं कार्यकारणभावमाह—

(१०) **'यथा पदार्थद्वारेण वाक्यार्थः सम्प्रतीयते ।**

**वाच्यार्थपूर्विका तद्वत्प्रतिपत् तस्य वस्तुनः ॥ १० ॥'**

पदार्थद्वारेण पदार्थप्रतीतिपुरस्सरं यथा वाक्यार्थः सम्प्रतीयते, तद्वत् तथा तस्य वस्तुनो व्यङ्ग्यार्थस्य प्रतिपज्ज्ञानम्, वाच्यार्थपूर्विका वाच्यार्थप्रतीतिपुरस्सरा, एवेत्यर्थः । प्रतिपदिति प्रतिपद्यतेर्ज्ञानार्थाद्भावे क्विप् । वाक्यार्थबोधे पदार्थोपस्थितिरिव, व्यङ्ग्यार्थबोधे वाच्यप्रतीतिः कारणमिति सारांशः ।

नन्वेवं वर्णानां व्यञ्जकत्वं व्याहन्येत वाच्यार्थविरहादिति चेत् ? उच्यते—यत्र वाच्यव्यङ्ग्ययोरुभयोः प्रतीतिः, तत्रैव व्यङ्ग्यप्रतीतेर्वाच्यप्रतीतिपूर्वकत्वं कल्प्यते, इतरथा गुरुनयेन एव शक्तिस्वीकारे दृष्टान्तासिद्धिरापद्येत । यत्र तु वाच्यबोधमनपेक्ष्यैव व्यङ्ग्बोध आनुभविकः, तत्रानायत्या शब्दादिप्रत्यक्षपूर्वकत्वमेव तस्य स्वीक्रियते । इह दृष्टान्तदार्ष्टान्तिकयोः साम्यं स्वांशिकमेव सामान्यकारणत्वेनेति विशेषतस्तृतीयोद्द्योते स्फुटीकृतं भविष्यति ।

केवल वक्ताओंका ही नहीं अपितु बोद्धाओंका भी व्यङ्ग्यार्थमें ही मुख्य तात्पर्य रहता है, परन्तु वाच्यार्थ ज्ञान ही उसका साधन है इस बातको दृष्टान्तद्वारा बतलाते हैं—यथा पदार्थं इति । जैसे पदार्थ ज्ञानके बाद ही वाक्यार्थका ज्ञान होता है, वैसे ही वाच्यार्थ प्रतीतिके बाद ही व्यङ्ग्यार्थकी प्रतीति होती है, अर्थात् वाक्यार्थ बोधमें पदार्थोपस्थितिवत् व्यङ्ग्यार्थ बोधमें वाच्यार्थका ज्ञान कारण है ।

तदेवाह—

यथा हि पदार्थद्वारेण वाक्यार्थावगमः, तथा वाच्यार्थप्रतीतिपूर्विका व्यङ्ग्यस्यार्थस्य प्रतिपत्तिः ।

एतावता वाच्यव्यङ्ग्यप्रतीत्योः क्रमोऽप्युद्दिष्टः ।

वृत्तिकार उसीका अनुवाद करते हैं—यथाहि इति । जैसे पदार्थ ज्ञानद्वारा ही वाक्यार्थका बोध होता है वैसे वाच्यार्थ ज्ञानपूर्वक ही व्यङ्ग्यार्थ की प्रतीति होती है ।

ननु वाच्यस्य प्रथमप्रतीतत्वान्न कुतः प्राधान्यमित्यत आह—

इदानीं वाच्यार्थप्रतीतिपूर्वकत्वेऽपि तत्प्रतीतेर्व्यङ्ग्यस्यार्थस्य प्राधान्यं यथा न व्यालुप्यते तथा दर्शयति—

**'स्वसामर्थ्यवशेनैव वाक्यार्थं प्रतिपादयन् ।**
**यथा व्यापारनिष्पत्तौ पदार्थो न विभाव्यते ॥ ११ ॥'**

सन्दानितकम् ॥

तामेतां व्याचष्टे वृत्तिकारः—

यथा स्वसामर्थ्यवशेनैव वाक्यार्थं प्रकाशयन्नपि पदार्थो व्यापारनिष्पत्तौ न विभाव्यते विभक्ततया ।

स्वस्योपस्थितपदार्थस्य, सामर्थ्यमाकाङ्क्षा–योग्यताऽऽसत्तितात्पर्यज्ञानादिसहकारिकारणसमवधानम्, तद्वशेन तदधीनतया यथा व्यापारस्य वाक्यार्थबोधानुकूलक्रियायाः, निष्पत्तौ पार्यन्तिकफलोत्पादनेन कृतकृत्यतायाम् पदार्थो न विभाव्यते विभक्ततया नावगम्यते, तद्वदित्यग्रेसरकारिकया सह संबन्धः । एवं चेहाविज्ञायमानक्रमसत्त्वं सूचितम् । एतेन स्फोटात्मकतया क्रमाभावपरत्वमस्य केनचिदुक्तं प्रयुक्तम् ।

अब व्यङ्ग्यार्थ प्रतीतिके लिये वाच्यार्थ ज्ञानके प्रथम अपेक्षित होनेपर भी उसकी प्रधानता न होकर व्यङ्ग्यार्थकी ही प्रधानता बतलाते हैं—स्वसामर्थ्येति । जैसे उपस्थित पदार्थ अपनी सामर्थ्य ( आकांक्षा, योग्यता, आसत्ति और तात्पर्य ज्ञान ) के सहयोगसे वाक्यार्थ बोधके लिये अपनेको समर्पण कर स्वयं रहता हुआ भी मुख्य रूपसे नहीं सा भासित होता है ।

दृष्टान्तमुक्त्वा दार्ष्टान्तिकं ब्रवीति—

**'तद्वत्सचेतसां सोऽर्थो वाच्यार्थविमुखात्मनाम् ।**
**बुद्धौ तत्त्वार्थदर्शिन्यां झटित्येवावभासते ॥ १२ ॥**

तद्वत्, वाच्यार्थाद् विमुखश्चमत्कारविरहादपरितुष्यन् आत्मा येषां ते तथोक्ताः, तेषां सचेतसाम्, तत्त्वार्थदर्शिन्यां सारार्थानुसन्धायिन्याम्, बुद्धौ, स व्यङ्ग्योऽर्थः, झटित्येव वाच्यार्थप्रतीत्यविलम्बेनैव भासते विषयो भवतीत्यर्थः ।

इदमाकूतम्—तद्धर्मावच्छिन्नविषयताकशाब्दबोधत्वावच्छिन्नं प्रति, तात्पर्ययोग्यताऽऽकाङ्क्षाऽऽसत्तिप्रतीतिसध्रीचीनाऽस्तद्धर्मावच्छिन्नरूपितवृत्तिज्ञानाधीनतद्धर्मावच्छिन्नविषयताकोपस्थितेः कारणतया, यथा पदार्थोपस्थितिः, उपस्थितिविषयः पदार्थो वा, तात्पर्यादिज्ञानसहकारेण, वाक्यार्थबोधं जनयित्वा स्वयं सन्नपि पृथगनवगम्यमानः प्राधान्यं नावलम्बते, तथैव व्यङ्ग्यप्रतीतिजनकप्रतीतिविषयो वाच्योऽप्युपसर्जनत्वमेव भजति ॥

वैसे ही चमत्कारहीन नीरस वाच्यार्थसे विमुख सहृदयोंके तत्त्वार्थदर्शिनी बुद्धिमें वही अलौकिक चमत्कारजनक व्यङ्ग्यार्थ तुरत चमत्कृत होने लगता है, वाच्यार्थ तो उसके उपकारार्थ अपनेको अर्पण कर गौण सा हो जाता है ।

नन्वेवं सचेतसां बुद्धेरेवायमनुभावो यद्विलक्षणमर्थमवगाहते, न तु काव्यस्य कश्चन विशेषोऽमुना सिध्यतीत्याशङ्कां निराकर्तुमाह—

**यत्रावभासते ।**

यत्र काव्ये, वाच्यप्रतीतिसाहाय्येन, अवभासते, सोऽर्थ इति शेषः । तेन काव्यस्यापि महत्त्वमायातमेव । अविभागेन भासनाद्वाच्यस्य सर्वथैव तत्र नानवभासः । तेन घटप्रदीपन्यायमुपन्यस्य वाच्यव्यङ्ग्यप्रतीत्योरेककालिकत्वं बोधयता तृतीयोद्द्योतग्रन्थेन सह नास्य विरोधः ।

इसीलिये जिस काव्यमें वाच्यकी सहायतासे वह व्यङ्ग्यार्थ सहृदयोंका आह्लाद जनक होता है उस काव्यका भी महत्त्व बढ़ जाता है ।

ननु ध्वनौ निरूपणीये व्यङ्ग्यस्य सत्त्व–वाच्यभिन्नत्व–प्रधानत्वानां विचारोऽनुचित इत्यापेक्षं समाधातुमाचष्टे—

**एवं वाच्यव्यतिरेकिणो व्यङ्ग्यस्यार्थस्य सद्भावं प्रतिपाद्य प्रकृत उपयोजयन्नाह ।**

एवमुक्तरीत्या वाच्यभिन्नस्य व्यङ्ग्यस्य सद्भावं सत्तामुत्तमतां प्राधान्यं वा प्रतिपाद्योक्त्वा, प्रकृते ध्वनिनिरूपणे, उपयोजयन्नुपकारं दर्शयन्नाहेत्यर्थः । सच्छब्दस्यार्थत्रयमिह विवक्षितमुपयोगात् ॥

उक्त रीतिसे ध्वनिनिरूपणके अवसर पर वाच्यकी अपेक्षा व्यङ्ग्यकी भिन्नता, अस्तित्व, उत्तमता एवं प्रधानताको बतलानेकी अनावश्यकत्व-शंकाको दूर करनेकी भावनासे प्रकृतमें वक्ष्यमाण रीतिसे उसको संलग्न ( संगत ) करते हैं।

ध्वनिं लक्षयति—

'यत्रार्थः शब्दो वा तमर्थमुपसर्जनीकृतस्वार्थौ ।
व्यङ्क्तः काव्यविशेषः स ध्वनिरिति सूरिभिः कथितः ॥१३॥'

यत्र काव्ये, उपसर्जनीकृतौ व्यङ्ग्योपस्कारकत्वेनाप्रधानीकृतौ स्वमात्मा अर्थश्च याभ्यां तौ गुणीकृतात्मार्थौ गुणीकृताभिधेयः शब्दश्च तं सहृदयहृदयानन्दनेन प्रसिद्धं तदनुभवैकगोचरं 'प्रतीयमानं पुनरन्यदेव वस्तु' इत्यादिना पूर्वप्रकान्तं वा, अर्थं व्यङ्क्तो व्यञ्जनाशक्त्या प्रकाशयतः, स काव्यस्य विशेष उत्तमं काव्यं, ध्वनिरिति नाम्ना, सूरिभिर्ध्वनिपण्डितैः कथित इत्यर्थः। तथा च—'अप्रधानोपसर्जने' इत्यमरः। इह व्यङ्क्त इति द्विवचनं वाशब्दस्य समुच्चयद्योतकतां द्रढयति। नचैकतरस्य व्यञ्जकतायां काव्येऽव्याप्तिरिति वाच्यम्, एकस्य व्यञ्जकतायामपरस्य सहकारित्वस्वीकारात्। तदुक्तं साहित्यदर्पणे—

'शब्दबोध्यो व्यनक्त्यर्थः शब्दोऽप्यर्थान्तराश्रयः।
एकस्य व्यञ्जकत्वे तदन्यस्य सहकारिता॥'

इत्युभयोरपि व्यञ्जकत्वमायातमेव। तेनात्र द्विवचनासङ्गतिवचनं भट्टनायकस्य चिन्त्यमेव। काव्यशब्दो गुणालङ्कारप्रसाधितशब्दार्थयोः सर्वातिशायिव्यङ्ग्यप्रकाशकत्वे ध्वनित्वमनुमनुमते। ध्वनतीति ध्वन्यतेऽनेन वेति व्युत्पत्तिः शब्दार्थयोर्ध्वनिर्देशोऽवधार्यते। शब्दस्य पश्चादुपादानमेव प्राधान्यं सूचयति।

यत्तु व्यक्तिं ध्वनिं शब्दं शब्दनिवेशश्च खण्डयता महिमभट्टेन—

'वाच्यस्तदनुमितो वा यत्रार्थोऽर्थान्तरं प्रकाशयति।
सम्बन्धतः कुतश्चित् सा काव्यानुमितिरित्युक्ता॥'

इतिकारिकास्वरूपं परिवर्त्य, 'एतच्चानुमानस्यैव लक्षणं नान्यस्य' इत्यभिहितम्। तदवसरे ध्वनिस्थापनेन यदननुमेयत्वकथनेन च स्फुटं निरस्येत। गीतादौ शब्दस्य व्यञ्जकताया व्यक्तमनुभवात्तन्निवेशोऽप्यावश्यक एव। तथा च-'स्वविषयकप्रतीतिजन्यचमत्कारन्यूनचमत्कारजनकप्रतीतिविषयत्व—स्वव्यञ्जकघटितत्वसम्बन्धाभ्याम्

व्यङ्ग्यविशिष्टशब्दार्थोभयत्वम्' इति ध्वनिकाव्यस्य लक्षणनिष्कर्षः । विच्छित्तिविशेषाधायकशब्दार्थयोः काव्यत्वमिति नये लक्षणमिदम् । तादृशशब्दमात्रस्य तत्त्वाङ्गीकारमते तु शब्द एव व्यङ्ग्यवैशिष्ट्यं योजनीयमिति दिक् ॥

जिस काव्यमें वाच्यार्थ या वाचक शब्द क्रमशः अपने स्वरूप या अपने अर्थको दूसरेके प्रति समर्पण द्वारा अप्रधान बनाकर उस विलक्षण अत्यन्त रमणीय व्यङ्ग्यार्थको व्यञ्जनाद्वारा व्यक्त करता है उस काव्य विशेषको विद्वानोंने ध्वनि नामक उत्तम काव्य कहा है ।

कारिकां विवृणोति—

**यत्रार्थो वाच्यविशेषो वाचकविशेषः शब्दो वा तमर्थं व्यङ्क्तः, स काव्यविशेषो ध्वनिरिति ।**

व्याख्यातम् ॥

वृत्तिकार उक्त कारिकाकी व्याख्या करते हैं—यत्रार्थं इति । जहाँ पर वाच्यविशेष अर्थ या वाचक विशेष शब्द अत्यन्त चमत्कारजनक व्यङ्ग्यार्थको व्यक्त करता है वहीं पर ध्वनि नामक उत्तम काव्य माना जाता है ।

एवं ध्वनिं लक्षयित्वा विप्रतिपन्नमतानि खण्डयितुमुपक्रममाणः प्रथमं ध्वनेरलङ्कारान्तर्भावाभावमाह—

**अनेन वाच्यवाचकचारुत्वहेतुभ्य उपमाऽऽदिभ्योऽनुप्रासादिभ्यश्च विभक्त एव ध्वनेर्विषय इति दर्शितम् ।**

अनेन शब्दार्थयोर्गौणत्वस्य व्यङ्ग्यस्य मुख्यतायाश्च वचनेन, उपमादयो वाच्यमात्रम्, अनुप्रासादयश्च वाचकमात्रमवलम्ब्य चारुतामादधानाः स्वरूपं प्रकाशयन्ति, ध्वनिस्तु शब्दार्थातिशायिनं व्यङ्ग्यमाश्रित्येति व्यक्तो विषयविभागः । आश्रयभेदे च तेषु तदन्तर्भावो दुर्भावः ।

इस प्रकार वाच्य-वाचककी अपेक्षा व्यङ्ग्यार्थके प्रधान होनेसे वाच्यमात्रके आश्रयण द्वारा रमणीयताका प्रतिपादक उपमादि अर्थालंकार तथा वाच्यमात्रके आश्रयणद्वारा रमणीयता प्रतिपादक अनुप्रास, यमकादिक शब्दालंकारसे ध्वनिका विषय विलक्षण (निराला) ही है, इसलिये उक्त इन अलंकारोंका ध्वनिमें अन्तर्भाव नहीं हो सकता क्योंकि वाच्यवाचकसे अत्यन्त विलक्षण व्यङ्ग्यार्थको आश्रय कर ही ध्वनि प्रकाशित होती है ।

अथाप्रसिद्धेर्ध्वनिमनङ्गीकुर्वतो मतमुद्दिश्य निराकरोति—

**यदप्युक्तम्—'प्रसिद्धप्रस्थानातिक्रमिणो मार्गस्य काव्यत्वहानेर्ध्वनिर्नास्ति'**

'स्ति' इति. तदप्ययुक्तम् । यतो लक्षणकृतामेव स केवलं न प्रसिद्धः, लक्ष्ये तु परीक्ष्यमाणे स एव सहृदयहृदयाह्लादकारि काव्यतत्त्वम् । ततोऽन्यच्चित्रमेवेत्यग्रे दर्शयिष्यामः ।

पूर्वपक्षस्याशयः प्रागुक्त एव । लक्ष्यानुरोधेनैव लक्षणकरणमिति लक्ष्याप्रसिद्धिरिह ध्वनिसिद्धिं बाधितुं क्षमेत, न तु लक्षणाप्रसिद्धिः । लक्ष्यन्तु काव्यप्राणभूतं शतशः सहृदयानुभवगोचरीकृतं महाभारतादौ नैकधा प्रसिद्धमिति लक्षणकाराणामेवायं प्रमादः । न ह्ययं स्थाणोरपराधो यदन्धो नैनं पश्यतीति न्यायेनेत्याशयः ।

ध्वनिपदमिह प्रधानाप्रधानान्यतरव्यङ्ग्यभृत्काव्यपरम् । अत एव 'ततोऽन्यच्चित्रमेव' इति वृत्तिरसङ्गच्छते । लक्ष्यस्य परीक्षणं विवेकः । स एव काव्यतत्त्वमित्युद्देश्यविधेयवाचकपदयोः समानलिङ्गकत्वनियमविरहात् । अविवक्षितव्यङ्ग्यककाव्यस्य चित्रत्वोपचारस्तु विस्मयजनकच्छन्दोऽलङ्कारादिसम्बन्धात्, प्रधानानुकारिगजतुरगादिचित्रवत् काव्यानुकरणाद्वा बोध्यः । तदेतद्, अग्रे तृतीयोद्द्योते—

> 'प्रधानगुणभावाभ्यां व्यङ्ग्यस्यैवं व्यवस्थितम् ।
> द्विधा काव्यं, ततोऽन्यद् यत्तच्चित्रमभिधीयते ॥'

इति कारिकाया व्याख्यानावसरे दर्शयिष्यामः ।

अब अप्रसिद्धिसे जो ध्वनि का अभाव मानते हैं उनका खण्डन कर रहे हैं—यदप्युक्तमिति । प्रसिद्ध प्राचीन पद्धतिसे भिन्न मार्गवाली ध्वनिमें काव्यत्वका अभाव होनेसे ध्वनि ही नहीं है—ऐसा जो किसीने कहा, वह भी ठीक नहीं, क्योंकि लक्ष्यके अनुसार ही लक्षण किया जाता है, इसलिये लक्ष्यकी अप्रसिद्धि, ध्वनिकी सिद्धिमें बाधक भी हो सकती थी, परन्तु ऐसी बात नहीं है क्योंकि ध्वनि नामक लक्ष्यको परीक्षा-निकष ( कसौटी ) पर परीक्षण करने ( कसने ) से वास्तवमें वही सहृदयोंका आह्लादजनक काव्यका प्राणस्वरूप सारभूत पदार्थ सिद्ध हो चुका है, अतः दुराग्रही लक्षणकारोंकी दृष्टिसे ही वह अप्रसिद्ध है. इसमें उनकी वहाँ तक नहीं पहुँच के सिवा और कुछ नहीं कह सकते । सारांश यह है कि प्रधान या अप्रधान रूपसे व्यङ्ग्यार्थ जहाँ हो उसीको उत्तम या मध्यम काव्य माना जाता है, उससे भिन्न तो चित्रनामका अधमकाव्य ही होता है यह आगे दर्शाया जायगा ।

पुनरलङ्कारगुणादिष्वेव ध्वनिमन्तर्भावयतो मतमुद्दिश्य खण्डयति—

यदप्युक्तम्—'कामनीयकमनतिवर्तमानस्य तस्योक्तालङ्कारादिप्रकारेष्वन्तर्भावः' इति, तदप्यसमीचीनम् । यतो वाच्यवाचकमात्राश्रयिणि प्रस्थाने व्यङ्ग्यव्यञ्जकसमाश्रयेण व्यवस्थितस्य ध्वनेः कथमन्तर्भावः ।

केवलं शब्दमर्थं वाऽऽश्रित्य तिष्ठत्स्वलङ्कारेषु, व्यङ्ग्यार्थं—पदवाक्यप्रभृति-नानाविषयव्यञ्जकाश्रयेण विद्यमानो ध्वनिरन्तर्भावितुमर्हति, विभिन्नाश्रयत्वादिति भावः। आदिपदेन गुणानां रीतीनां वृत्तीनां च संग्रहः। अन्यथाऽलङ्कारमात्रान्तर्भावस्याधुनैव निराकृतत्वे पुनस्तन्निराकरणं छायां क्षपयेत्।

रमणीयता-प्रतिपादक उस ध्वनिका अलंकार, गुण, रीति आदिमें अन्तर्भाव हो जाता है ऐसा जो किसीने कहा, वह भी ठीक नहीं, क्योंकि केवल वाच्यवाचकको आश्रय कर चमत्कारशाली अलंकारादिमें व्यङ्ग्यव्यञ्जकका आश्रयण द्वारा सुव्यवस्थित अलौकिक आह्लादजनक ध्वनिका अन्तर्भाव नहीं हो सका।

तत्र हेतुमाह—

**वाच्यवाचकचारुत्वहेतवो हि तस्याङ्गभूताः, न तु तदेकरूपा एवेति प्रतिपिपादयिष्यमाणत्वात्।**

अनुप्रासोपमादयो हि यतो ध्वनेरुपकारकाः, तस्मान्न ध्वनिस्वरूपाः कार्यंकारणवदुपकार्य्योपकारकयोस्तादात्म्यानङ्गीकारात्॥

वाच्य और वाचककी शोभाको बढ़ानेवाले उपमा अनुप्रास आदि अलंकार तो ध्वनिके उपकारक हैं, अतः वे ध्वनिरूप नहीं हो सकते, क्योंकि कार्यकारणकी तरह उपकार्य और उपकारक कभी भी एक नहीं होता, यह आगे कहेंगे।

समाहरति—

**परिकरश्लोकश्चात्र—**

अस्तीति शेषः। परिकरोति प्रकृतार्थमधिकाधानेनोपकरोतीति परिकरः॥

'व्यङ्ग्यव्यञ्जकसम्बन्धनिबन्धनतया ध्वनेः।
वाच्यवाचकचारुत्वहेत्वन्तःपातिता कुतः॥'

व्यङ्ग्यव्यञ्जकयोः सम्बन्धो व्यञ्जना, तन्निबन्धनतया तन्मूलकत्वेन भासमानस्य, वाच्यवाचकचारुत्वहेतुष्वलङ्कारेषु, ध्वनेरन्तर्भावः कुतः स्यादित्यर्थः॥

उक्त बातका ही संक्षेपमें उपसंहार करते हैं—परिकर इति। केवल वाच्यवाचकोंके सौन्दर्यवर्द्धक अलंकारादिमें व्यङ्ग्यव्यञ्जकोंकी व्यञ्जनावृत्तिमूलक चमत्काराधायक ध्वनिका समावेश कैसे हो सकता है?

इदानीं गुणीभूतव्यङ्ग्येष्वलङ्कारविशेषेषु, ध्वनेरन्तर्भावमाशङ्क्य क्रमशो निरस्यति—

**ननु यत्र प्रतीयमानस्यार्थस्य वैशद्येनाप्रतीतिः, स नाम मा भूद्ध्वनेर्विषयः। यत्र तु प्रतीतिरस्ति यथा समासोक्त्याक्षेपानुक्तनिमित्तविशेषोक्ति-**

पर्यायोक्तापह्नुतिदीपकसङ्करालङ्कारादौ, तत्र ध्वनेरन्तर्भावो भविष्यतीत्यादि निराकर्तुमभिहितम् 'उपसर्जनीकृतस्वार्थौ' इति ।

यत्रानुप्रासाद्यलङ्कारेषु, व्यङ्ग्यस्याप्रतीतिः, यत्र चोपमाद्यलङ्कारेषु तस्य स्फुटतयाऽप्रतीतिः, तत्र ध्वनेरन्तर्भावो नास्ताम् । येषु पुनः समासोक्त्यादिष्वलङ्कारेषु व्यङ्ग्यस्य स्फुटतयैव प्रतीतिः, तत्र कथं नान्तर्भावः स्यादिति चेत् ? उच्यते—ध्वनौ व्यङ्ग्यापेक्षया वाच्यवाचकयोरुपसर्जनत्वं भवति, गुणीभूतव्यङ्ग्ये समासोक्त्यादौ तु व्यङ्ग्यस्योपसर्जनत्वाद्वाच्यस्यैव प्राधान्यात्तदभावः । कारिकांशोक्तेर्भूतकालिकतया 'अभिहितम्' इत्यत्र क्तप्रत्ययः ॥

अलंकार विशेषमें जहाँ कि व्यङ्ग्यार्थ अप्रधान है, ध्वनिके अन्तर्भावकी शंकाकर क्रमशः खण्डन करते हैं—ननु यत्रेति । जहाँ पर (अनुप्रासादिमें) व्यङ्ग्यकी प्रतीति नहीं होती या जहाँ पर ( उपमादिमें ) स्फुटस्वरूपसे व्यङ्ग्यकी प्रतीति नहीं होती, वहाँ पर भले ही ध्वनिका अन्तर्भाव न हो, लेकिन जिन समासोक्ति आदिमें स्फुटरूपसे व्यङ्ग्यकी प्रतीति होती है, ध्वनिका अन्तर्भाव क्यों नहीं हो सकता यह कथन भी ठीक नहीं, क्योंकि ध्वनिमें व्यङ्ग्यकी अपेक्षा वाच्य अप्रधान होता है यह पहले कह चुके हैं किन्तु समासोक्ति आदिमें व्यङ्ग्य गौण और वाच्य ही प्रधान रहता है, इसलिये उन अलंकारोंमें ध्वनि गतार्थ नहीं हो सकती ।

कारिकांशं विवृण्वन्नुक्तमर्थं समर्थयति—

अर्थो गुणीकृतात्मा, गुणीकृताभिधेयश्च शब्दो वा यत्रार्थान्तरमभिव्यनक्ति स ध्वनिरिति तेषु कथं तस्यान्तर्भावः । व्यङ्ग्यप्राधान्ये हि ध्वनिः । न चैतत्समासोक्त्यादिष्वस्ति ।

इतिहेतौ । यतः समासोक्त्यादिषु व्यङ्ग्यस्य सत्त्वेऽपि, वाच्योपस्कारकत्वेन गुणीभावान्न प्राधान्यम्, ध्वनौ तु तदेव प्रधानम्, तस्मात्तेषु समासोक्त्यादिषु, तस्य ध्वनेरन्तर्भावः कथं स्यात् । न हि व्यङ्ग्यप्राधान्यमन्तरेण ध्वनिः, न वा तदलंकारेषु व्यङ्ग्यस्य प्राधान्यं सम्भवतीति नान्तर्भाव इति सारम् ।

वृत्तिकार उक्तबातका समर्थन करते हैं—अर्थो गुणीति । जहाँ वाच्यार्थ अपने स्वरूपको या वाचक शब्द अपने वाच्यार्थको गौण बनाकर मुख्यरूपसे व्यङ्ग्यार्थको व्यक्त करता है, वहीं ध्वनिकी मर्यादा रहती है, समासोक्ति आदि में तो वाच्यकी मुख्यता देकर व्यङ्ग्य अप्रधान हो जाता है और व्यङ्ग्यकी प्रधानताके बिना ध्वनि नहीं रह सकती इसलिये समासोक्ति आदिमें व्यङ्ग्यका अप्राधान्य होनेसे ध्वनिका अन्तर्भाव नहीं हुआ ।

तत्र प्रथमोपात्तत्वात् समासोक्तौ प्रथमं व्यङ्ग्याप्राधान्यमुदाहरणोपन्यासेन दर्शयति—

**समासोक्तौ तावत्—**

तावत् पूर्वम् ।

'प्रकृतार्थेन वाक्येन तत्समानैर्विशेषणैः ।
अप्रस्तुतार्थकथनं समासोक्तिरुदाहृता' ॥

इत्युद्भटलक्षितायां समासोक्तौ, व्यङ्ग्येनानुगतमित्यादिनाऽन्वयः ॥

उनमें सबसे पहले समासोक्तिमें व्यङ्ग्यका अप्राधान्य उदाहरण द्वारा बतलाते हैं—समासोक्ताविति । प्रस्तुत अर्थकी पुष्टिके लिये प्रयुक्त विशेषणोंके तुल्य विशेषणोंसे वाक्यद्वारा जहाँ अप्रस्तुत अर्थका कथन हो उसे समासोक्ति अलङ्कार कहते हैं ।

सायंसन्ध्यां वर्णयति—

**'उपोढरागेण विलोलतारकं तथा गृहीतं शशिना निशामुखम् ।**
**यथा समस्तं तिमिरांशुकं तया पुरोऽपि रागाद्गलितं न लक्षितम् ॥'**

उपोढो धृतः, रागः सन्ध्याशोणिमा प्रेमा च, येन, स उपोढरागस्तेन शशिना नायकेन च विलोला उदयरभसेन प्रियालोकजविभ्रमेण च चञ्चलाः, तारका उडवः-कनीनिकाश्च यत्र, तादृशं निशाया नायिकायाश्च, मुखं प्रदोषरूपाग्रिमाङ्गम् वदनञ्च, तथा तेन प्रकारेण द्रुतमिति यावत्, वात्स्यायनोक्तप्रकारेण च गृहीतमुद्दीपितं चुम्बितुमात्तञ्च यथा पुरोऽपि प्राच्यामपि पुरस्तादपि च, रागादुदयारुण्यात् प्रेमोद्रेकाच्च, गलितं विनष्टं पतितञ्च, समस्तमखिलम्, तिमिरांशुकं तमःपटलं तिमिरमिव वसनञ्च, तया सेतुभूतया निशया कर्त्र्या नायिकया च, न लक्षितं नावलोकितमित्यर्थः । तथाहि—'अंशुकं शुक्लवस्त्रे स्याद्वस्त्रमात्रोत्तरीययोः' इति रभसः । 'रागोऽनुरक्तो मात्सर्ये क्लेशादौ लोहितादिषु' इति विश्वश्च ।

अत्र रागस्य वहनकर्मत्वेन गौरवातिशयः, मुखस्य विलोलतारकत्वेन स्मरसमरसम्भ्रमः, तेन गलितांशुकदर्शनाभावेन च नायिकाया प्रमोदातिशयद्वारा प्रागल्भ्यं च सूच्यते । 'तया निशयेति कर्तृपदम् । नचाचेतनाया कर्तृत्वमुपपन्नम्, इति शब्देनैवात्र नायकव्यवहार उन्नीतोऽभिधेय एव, न व्यङ्ग्य इत्यत एव समासोक्तिः' इति चन्द्रिका नायकव्यवहारस्याभिधेयत्वात्प्रकृतग्रन्थप्रातिकूल्यादुपपत्तिचिन्तामपेक्षते ।

कवि सायंकालका वर्णन करता है—उपोढेति। सायंकालीन लालिमा धारण कर चन्द्रमाने रातके प्रथम भाग ( शाम ) को इतना शीघ्र प्रकाशित कर दिया कि पूर्वदिशाकी रक्तिमासे नष्ट समस्त अन्धकारको रात लक्षित नहीं कर सकी, यह वाच्यार्थ है। और 'एक प्रेमी नायकने नायिकाके मुखको, जिसमें आंखोंकी पुतलियां बिजली जैसी चमक रही थीं, ऐसी चतुराईसे चूमनेके लिये, पकड़ा, जिससे कि वह नायिका प्रेमसे विभोर होकर शरीरसे गिरे हुए कपड़े तकको भी न जान सकी' यह व्यङ्ग्य अर्थ सूचित होता है।

प्रकृतसङ्गतिमाह—

इत्यादौ व्यङ्ग्येनानुगतं वाच्यमेव प्राधान्येन प्रतीयते।

व्यङ्ग्येनानुगतमुपकृतम्। अत्र यद्यपि श्लिष्टविशेषणमहिम्नाऽवाच्ययोरपि शृङ्गाररसालम्बनयोर्नायकयोर्निशाशशिशब्दाभ्यां प्रतीतिर्जायते, किन्तु, व्यङ्ग्ययोस्तद्व्यवहारयोरारोपादारोपितनायिकाव्यवहारा वाच्या निशा, आरोपितनायकव्यवहारो वाच्यः शशी च प्राधान्येन वाक्यार्थबोधविषयाविति व्यङ्ग्यस्य गुणीभावान्न ध्वनिः, किन्त्वलङ्कार एवेत्याशयः॥

प्रस्तुत विषयको संगत करते हैं—इत्यादाविति। उक्तस्थलमें यद्यपि अचेतन चन्द्र और रातमें ज्ञानकी अनुपपत्तिसे द्व्यर्थक विशेषणोंकी महत्ता द्वारा नायक-नायिकाका व्यवहार व्यक्त होता है तथापि उन दोनोंका व्यवहार चन्द्र-रात्रिमें आरोप कर उक्त व्यङ्ग्यसे परिपोषित नायकनायिकाका आरोपित व्यवहार वाले चन्द्र और रात्रिरूप वाच्यार्थ ही प्रधान रूपसे चमत्कारजनक मालूम पड़ते हैं।

तदेवाह वृत्तिकारः—

समारोपितनायिकानायकव्यवहारयोर्निशाशशिनोरेव वाक्यार्थत्वात्।

वाक्यार्थत्वं प्राधान्येन वाक्यर्थबोधविषयत्वम्। नायिकानायकेति त्वेकशेषावश्यम्भावाद् दुर्घटम्, किन्तु नायिकया सहितो नायक इति शाकपार्थिवादेराकृतिगणत्वान्मध्यमपदलोपी समासोऽत्र बोध्यः। तथा सति नायिकायाश्शाब्दप्रतीतावप्राधान्येऽप्यर्थप्रतीतौ तदबाधः। एकशेषे प्रायो झटिति प्रतीतिविरहाद्वैषमुक्तिः।

उक्त बातको ही वृत्तिकार संक्षेपमें कहते हैं—समारोपित इति। समारोपित है नायिका और नायकका व्यवहार जिसमें ऐसे रात्रिऔर चन्द्र ही मुख्य रूपमें वाक्यसे जाने जाते हैं।

अथाक्षेपालंकारे व्यङ्ग्याप्राधान्यं दर्शयितुमाचष्टे—

आक्षेपेऽपि व्यङ्ग्यविशेषाक्षेपिणो वाच्यस्यैव चारुत्वम्। प्राधान्येन वाक्यार्थं आक्षेपोक्तिसामर्थ्यादेव ज्ञायते।

'निषेधो वक्तुमिष्टस्य यो विशेषाभिधित्सया ।
वक्ष्यमाणोक्तविषयः स आक्षेपो द्विधा मतः' ।

इति मम्मटभट्टोक्तलक्षणस्याक्षेपस्य,—

'स्मरशरशतविधुराया भणामि सख्याः कृते किमपि ।
क्षणमिह विश्रम्य सखे ! निर्दयहृदयस्य किं भणाम्यथवा ।
तव विरहे हरिणाक्षी निरीक्ष्य नवमालिकां दलिताम् ।
हन्त नितान्तमिदानीमाः ! किं हतजल्पितैरथवा ।'

इत्युदाहरणयोः वाच्यो वचननिषेधः कथनस्य प्रस्तुतत्वादिष्टत्वाच्च बाधेनास्कन्दितो निषेधाभासत्वेन पर्यवस्यन् विधिशबलं वक्तव्यवैलक्षण्यवैभवं व्यनक्ति । तत्रागृरितव्यङ्ग्यमन्तरेण वाधग्रस्ततया वाच्यार्थबोधस्यैवानिष्पत्त्या व्यङ्ग्यस्य वाच्यबोधनिर्वाहकत्वेन गुणीभावः। आक्षेपशब्द एव व्यङ्ग्यावापं विना वाच्यार्थबोधानिर्वाहं कथयति । तथा च स्फुटमेव व्यङ्ग्यस्य वाच्याङ्गत्वम् ।

यत्तु वामनेन 'उपमानाक्षेपः' इत्युपमानतिरस्कार आक्षेपोऽलङ्कार उक्तः तन्न । तस्य प्रतीपभेदेऽन्तर्भावात् ।

अब आक्षेप नामक अलंकारमें व्यङ्ग्यकी अप्राधानता बतलाते हैं-आक्षेप इति । आक्षेपालंकारमें भी व्यङ्ग्य विशेषका आकर्षक होनेपर भी प्रस्तुत वाक्यार्थके विषय में आक्षेपात्मक कथनसे सहृदयको वाच्यार्थकी ही रमणीयता मुख्य रूपसे प्रतीत होती है। 'व्यङ्ग्य विशेषको द्योतित करनेके लिये अत्यन्त आवश्यक कहने योग्य इष्ट वस्तुके निषेधको' आक्षेपालंकार कहते हैं, जैसे एक व्यक्ति अपने मित्रसे कहता है—हे सखे ! कामदेवके बाणोंसे अत्यन्त पीडित तुम्हारी प्रेयसीके विषयमें तुझसे मैं कुछ कहना चाहता हूँ, फिर कुछ रुक कर कहता है—अथवा तुम्हारे जैसे कठोर व्यक्तिको कह कर ही क्या होगा, अर्थात् कहना ही व्यर्थ है। यहाँ पर आक्षेपात्मक वचन-निषेध रूप वाच्यार्थ ही अत्यन्त आवश्यक इष्ट वस्तुके कथनके प्रस्तावसे निषेधाभास ( नहीं निषेध सा ) में परिणत होता हुआ, अवश्य वक्तव्य नायिकाकी दयनीय दशारूप व्यङ्ग्य विशेषसे परिपुष्ट होकर प्रधान रूपसे चमत्कारशाली प्रतीत होता है।

तत्र हेतुमाह—तथाहि—

**तत्र शब्दोपारूढरूपो विशेषाभिधानेच्छया प्रतिषेधरूपो य आक्षेपः स एव व्यङ्ग्यविशेषमाक्षिपन्मुख्यं काव्यशरीरम् ।**

SANSKRIT LIBRARY BOOK NO. NAGARJUNA UNIVERSITY (A.P.)-522 510.

तत्राक्षेपालंकारे। शब्दादुपारूढं प्रकटीभूतं रूपं यस्य, सः निषेधात्मको य आक्षेपः- स निषेधरूपो वाच्य एव न तु व्यङ्ग्यः, व्यङ्ग्यविशेषं स्वान्वयबोधोपपत्तय आक्षिपन्नध्याहरन्, काव्यस्य वाच्यवाचकवपुषः, मुख्यं चमत्कारिव्यङ्ग्यप्रसाधितत्वात् प्रधानं शरीरम् अस्तीति शेषः। आक्षेपे वाच्येनेष्टनिषेधेन बाध्यमानेन स्वोपपादकतयाऽङ्गभूत एव व्यङ्ग्य आक्षिप्यत इति तत्रापि व्यङ्ग्यस्य गुणीभूतत्वान्न ध्वनेरन्तर्भाव इत्यभिसन्धिः।

क्योंकि उक्त व्यङ्ग्य विशेषके कथनके तात्पर्यसे शब्दद्वारा प्रतिपादित वाच्यरूप इष्टनिषेधात्मक आक्षेपालंकार ही अनुपपन्न होकर, अपनी उपपत्तिके लिए अवश्य वक्तव्यरूप व्यङ्ग्य विशेषका आकर्षण कर, प्रधान रूपसे काव्यका अङ्गी प्रतीत होता है, उक्त व्यङ्ग्य तो उसका उत्पादक होनेसे अङ्ग ही है, इसलिए व्यङ्ग्यके गौण होनेसे इसमें ध्वनिका अन्तर्भाव नहीं हो सका। क्योंकि व्याङ्ग्यार्थके प्राधान्य होने पर ही ध्वनिका व्यवहार होता है।

ननु तत्र वाच्यस्यैव कुतः प्राधान्यमित्यत आह—

**चारुत्वोत्कर्षनिबन्धना हि वाच्यव्यङ्ग्ययोः प्राधान्यविवक्षा।**

हि यतो यत्र वाच्ये चारुत्वस्योत्कर्षं आधिक्यम्, तत्र वाच्यस्य प्राधान्यम्। तत्र च व्यङ्ग्ये तदुत्कर्षः, तत्र तस्यैव प्राधान्यं विवक्षितं भवति, विवक्षायास्तन्मूलकत्वात्-प्रकृते निषेधाभासतया पर्यवसानाद्वाच्यस्य निषेधस्यैव तदुत्कर्षं इति प्राधान्यं बोध्यम्।

उक्त स्थलमें वाच्यकी ही प्रधानतामें युक्ति बतलाते हैं—चारुत्वेति। अर्थात् जहां वाच्यमें अधिक रमणीयता रहती है, वहां वाच्यकी ही प्रधानता विवक्षित होती है, और जहाँ व्यङ्ग्यमें अधिक मनोहरता रहती हैं वहाँ व्यङ्ग्यकी ही मुख्यता विवक्षित होती है, प्रकृतिमें तो निषेधाभासरूपमें परिणत होनेसे निषेधात्मक उक्त वाच्य ही अत्यन्त मञ्जुल मालूम पड़ रहा है, इसलिए वही प्रधान है।

तत्र निदर्शनं दर्शयति—

**यथा–'अनुरागवती संध्या दिवसस्तत्पुरःसरः।**
**अहो दैवगतिः कीदृक्तथापि न समागमः॥'**

यद्यपि सन्ध्या नायिका च, अनुरागवती लौहित्यभाक् प्रेमवती च, अस्तीति शेषः। दिवसो नायकश्च, तस्याः पुरस्सरोऽग्रगामी सम्मुखश्चास्ति। अहो आश्चर्यम्, कीदृग् विलक्षणाऽचिन्त्या, दैवस्य विधेः, गतिरस्ति, यत् तथापि तयोः समागमः सम्मेलनं सम्भोगश्च न भवतीत्यर्थः। इह प्रस्तुतेऽर्थेऽभिधाया नियन्त्रणाद-

परार्थस्य व्यङ्ग्यतया न श्लेषः, किन्तु श्लिष्टविशेषणमहिम्ना नायकयोर्वृत्तस्यावगतिरिति समासोक्तिरेव । नायकरूपव्यङ्ग्यापेक्षयाऽऽरोपिततद्वृत्तसन्ध्यादिवसात्मकवाच्यस्यैव चमत्कारिता ॥

दृष्टांत द्वारा उक्त बातको पुष्ट करते हैं—यथेति । यद्यपि यह संध्या भी रक्तिमासे भरी हुई है और दिन भी उसके आगे-आगे जाता है, तो भी दोनों का मेल नहीं हो पाता, अहो ! विधाताका अत्यन्त ही आश्चर्यजनक विधान है। यहां पर अत्यन्त उत्कण्ठित नायिका और सरस नायकके विद्यमान होने पर भी दोनोंके असमागममें गुरुजनोंके पारतन्त्र्यादि कारणका व्यञ्जन द्वारा, द्व्यर्थक विशेषणोंसे नायक-नायिकाका व्यवहार प्रकट हो रहा है, परन्तु व्यङ्ग्य नायक-नायिकाकी अपेक्षा दिवस-सन्ध्यामें गूढ तद्व्यवहार समारोप द्वारा दिवस-सन्ध्यारूप वाच्यार्थ ही विदग्धोंको अधिक चमत्कारजनक मालूम पड़ता है।

तदाह वृत्तिकृत्—

**अत्र सत्यामपि व्यङ्ग्यप्रतीतौ वाच्यस्यैव चारुत्वमुत्कर्षवदिति तस्यैव प्राधान्यविवक्षा ।**

व्याख्यातम् । श्लोकेऽस्मिन् वामनमतेनाक्षेपः, भामहमतेन तु समासोक्तिरित्येकत्रोभयोः समावेशमालोक्योदाजहार ग्रन्थकृदिति लोचने स्फुटम् ॥

वृत्तिकार उक्त बातको स्फुट करते हैं—अत्रेति । यहाँ उक्त व्यङ्ग्यकी प्रतीति होने पर भी वाच्यार्थ ही अधिक रमणीय प्रतीत होता है, इसलिये उसीका प्राधान्य विवक्षित है। उक्त श्लोकमें वामनके मतसे आक्षेप और भामहके मतसे समासोक्ति है अतः दोनोंके समावेशार्थ ग्रन्थकारने कहा है, अर्थात् समासोक्ति हो या आक्षेप हो, अलंकार स्थलमें वाच्यकी अपेक्षा व्यङ्ग्य गौण ही रहता है अतः इनमें ध्वनिको गतार्थ नहीं कर सकते।

प्राधान्यविवक्षां व्यपदेशबीजत्वेन व्यवस्थापयन् दृष्टान्तमाचष्टे—

**यथा च दीपकापह्नुत्यादौ व्यङ्ग्यत्वेनोपमायाः प्रतीतावपि प्राधान्येनाविवक्षितत्वान्न तया व्यपदेशस्तद्वदत्रापि द्रष्टव्यम् ।**

'सकृद्वृत्तिस्तु धर्मस्य प्रकृताप्रकृतात्मनाम् ।
सैव क्रियासु बह्वीषु कारकस्येति दीपकम् ॥'

इति मम्मटलक्षितस्य दीपकालङ्कारस्य—

'सञ्जहार शरत्कालः कदम्बकुसुमश्रियः ॥
प्रेयोवियोगिनीनां च निश्शेषसुखसम्पदः ॥' इत्युदाहरणे,

'प्रकृतस्य निषेधेन यदन्यत्वप्रकल्पनम् ॥
साम्यादपह्नुतिः' इति पीयूषवर्षलक्षिताया अपह्नुतेः ।
'एतद्धि न तपः सत्यमिदं हालाहलं विषम् ।
विशेषतः शशिकला-कोमलानां भवादृशाम् ॥' ॥ इत्युदाहरणे च,

यथा कदम्बकुसुमश्री-वियोगिनीसुखसम्पदां तपोहालाहलयोश्चोपमा व्यज्यते, किन्तु तदपेक्षयैकधर्मान्वितप्रस्तुताप्रस्तुतधर्मिरूपस्य, उपमेयापह्नवोपमानस्थापनात्मकस्य च वाच्यस्यैव चमत्कारितया प्राधान्यात् तेनैव व्यवहारः, न तूपमया । सा तु भित्तिभूतैवान्यत्रातिशयोक्तिवत् । तदुक्तं चित्रमीमांसायाम्—

'उपमैका शैलूषी सम्प्राप्ता चित्रभूमिकाभेदान् ॥
रञ्जयति काव्यरङ्गे नृत्यन्ती तद्विदां चेतः ॥' इति ।

तथाऽऽक्षेपेऽपि व्यङ्ग्यसत्त्वेऽप्यतिसुन्दरेण वाच्येनैव व्यपदेश इति भावः ॥

वस्तुमात्र की प्राधान्यविवक्षाको, जो कि व्यवहारका मूल रहस्य है, दृष्टांत द्वारा कहते हैं—यथेति । जैसे दीपक-अपह्नुति आदिमें व्यङ्ग्यरूपसे उपमाकी प्रतीति होने पर भी मुख्यरूपसे विवक्षा न होनेसे उसका व्यवहार नहीं होता, वैसे ही आक्षेपमें व्यङ्ग्यके रहनेपर भी अत्यन्त मनोरम वाच्यका ही मुख्य व्यवहार होता है । 'एक धर्मका जहां अनेक धर्मीमें अन्वय हो, उसे दीपक कहते हैं' जैसे—शरत्कालने, कदम्बफूलोंकी शोभा और प्रिय-प्रेयसीकी सारी सुखसम्पदाओंको नष्ट कर डाला । यहाँ पर एक ही शरत्काल या संहरण क्रियाका कदम्बकुसुम-शोभा और वियोगिनी-सुख-सम्पतिमें अन्वय होता है । एवं 'प्रस्तुत वस्तुको छिपाकर तत्सदृश अन्य वस्तुका जहां स्थापन हो' उसे अपह्नुति कहते हैं जैसे—चांदनीके समान मनोरम विशेषकर आप जैसे सुकुमार व्यक्तिके लिये निश्चय ही यह तप नहीं है बल्कि हालाहल विष है । यहां प्रस्तुत तपका अपलापकर तद्वत् दुःखजनक होने से विष ही स्थापित किया गया है । इन दोनों स्थलोंमें कदम्ब-पुष्पश्री एवं वियोगिनी-सुखसम्पदा, और तप एवं हालाहलमें उपमानोपमेयभाव रूप व्यङ्ग्य रहनेपर भी उक्त दीपक-अपह्नुति रूप वाच्यार्थ ही आह्लादजनक होनेसे मुख्यतया व्यवहृत होता है ।

अथानुक्तनिमित्तविशेषोक्तौ व्यङ्ग्याप्राधान्यमाह—

**अनुक्तनिमित्तायामपि विशेषोक्तौ—**

'यत्सामग्र्येऽपि हेतूनां फलानुत्पत्तिबन्धनम् ।
विशेषस्याभिधित्सातस्तद्विशेषोक्तिरुच्यते ॥'

इत्युद्भटेन लक्षिता विशेषोक्तिः, सामग्रीसत्त्वेऽपि कार्यानुत्पत्तिप्रयोजकोपादानानुपादानाभ्यां द्विधा ।

केचित्तु निमित्तस्याचिन्त्यत्वेन तृतीयमप्यस्याः प्रकारं वदन्ति । परे तु द्वितीयभेद एव तमन्तर्भावयन्ति, तत्रोक्तनिमित्तायां तस्यां निमित्तस्य वाच्यतैव । अचिन्त्यनिमित्तायां तस्य व्यङ्ग्यत्वेऽपि निगूढत्वम्, तेन 'नास्यां व्यङ्ग्यस्य सद्भावः' इति लोचने व्यङ्ग्यपदं चमत्कारिव्यङ्ग्यपरमवगन्तव्यम् । अनुक्तनिमित्तायान्तु व्यङ्ग्यस्य सद्भावेऽपि नैव प्राधान्यम् ।

अब अनुक्त निमित्तक विशेषोक्तिमें व्यङ्ग्यका अप्राधान्य बतलाते हैं-अनुक्तेति । जहां 'सामग्री रहनेपर भी कोई विशेषता सूचनार्थं, कार्योत्पत्ति न दर्शायी जाय' उसे विशेषोक्ति कहते हैं । कार्याभाव प्रयोजकके उपादान एवं अनुपादानसे यह द्वो प्रकारकी है ।

तत्रोक्तनिमित्ताचिन्त्यनिमित्तप्रकारयोः—

'कर्पूर इव दग्धोऽपि शक्तिमान् यो जने जने ।
नमोऽस्त्ववार्यवीर्याय तस्मै मकरकेतवे ॥' इति ।

'स एकस्त्रीणि जयति जगन्ति कुसुमायुधः ।
हरताऽपि तनुं यस्य शम्भुना न हृतं बलम् ॥'

इति च क्रमेणोदाहरणे अप्रासङ्गिकत्वाऽनुक्तनिमित्तां तामुदाहरति—

'आहूतोऽपि सहायैरेमीत्युक्त्वा विमुक्तनिद्रोऽपि ।
गन्तुमना अपि पथिकः सङ्कोचं नैव शिथिलयति ॥'

सहायैः सहचरैः, सह गन्तुमाहूत आकारितोऽपि, एम्यागच्छामीत्युक्त्वा विमुक्ता निद्रा येन तादृशोऽपि, तथा गन्तुमनाः प्रस्थातुकामोपि, पथिकः, सङ्कोचं नेत्रगात्राकुञ्चनं, नैव शिथिलयति नैवापनयतीत्यर्थः ॥

उनमें अनुक्तनिमित्तक विशेषोक्तिका जहाँ कि निमित्तरूप व्यङ्ग्यकी प्रधानता नहीं है, उदाहरण देते हैं—आहूत इति । मित्रों द्वारा साथ चलनेकेलिये बुलाये जाने पर भी आता हूँ ऐसा कह कर नींद तोड़ने पर भी, प्रस्थनार्थ इच्छुक होने पर भी, वह पथिक नेत्र शरीरादिसंकोच ( सिकुड़ना ) को नहीं छोड़ता ।

प्रकृतोक्तिसङ्गतिमाह—

इत्यादौ व्यङ्ग्यस्य प्रकरणसामर्थ्यात्प्रतीतिमात्रम् । न तु तत्प्रतीतिनिमित्ता काचिच्चारुत्वविच्छित्तिरिति न प्राधान्यम् ।

इह सहचरकृताह्वानादिहेतूनां सत्त्वेऽपि, सङ्कोचशिथिलीकरणरूपकार्य्याभाव-प्रयोजकस्य, निमित्तस्य उद्भटमते शीतकृतार्त्तेः, रुय्यकमते प्रियतमास्वप्नसमागमानुध्यानस्य यद्यपि व्यङ्ग्यतयैव प्रतीतिः, किन्तु तदपेक्षयाऽपि तदुपपादितस्य सङ्कोचशिथिलीकरणाभावरूपवाच्यस्यैव चारुत्वेन प्राधान्यमिति नात्र ध्वनेरन्तर्भावः।

यहां पर आह्वान आदि कारणोंके रहने पर भी संकोचत्यागरूप कार्यके न होने से प्रकरणवश अतिशैत्यसे गम्यमान आलस्यादि, या प्रियतमाके स्वप्नदर्शनादिकी अपेक्षा उक्तवाच्यार्थमें ही प्रधानरूपसे रमणीयताकी प्रतीति होती है, इसलिये व्यङ्ग्यके अप्राधान्य होनेसे इसमें भी ध्वनिका अन्तर्भाव नहीं हुआ।

अथ पर्य्यायोक्ते ध्वनेरन्तर्भावं दर्शयति—

**पर्यायोक्तेऽपि यदि प्राधान्येन व्यङ्ग्यत्वं, तद्भवतु नाम तस्य ध्वनावन्तर्भावः। न तु ध्वनेस्तत्रान्तर्भावः। तस्य महाविषयत्वेनाङ्गित्वेन च प्रतिपिपादयिष्यमाणत्वात्। न पुनः पर्यायोक्ते भामहोदाहृतसदृशे व्यङ्ग्यस्यैव प्राधान्यम्। वाच्यस्य तत्रापसर्जनीभावेनाविवक्षितत्वात्।**

'गम्यस्यापि भङ्ग्यन्तरेणाभिधानं पर्य्यायोक्तम्'

इति रुय्यकलक्षितस्य पर्य्यायोक्तस्य—

'चक्राभिघातप्रसभाज्ञयैव चकार यो राहुवधूगणस्य।
आलिंगनोद्दामविलासबन्ध्यं रतोत्सवं चुम्बनमात्रशेषम्॥

इत्युदाहरणे राहुशिरश्छेदात्मनो व्यङ्ग्यस्य कारणस्य नैव तादृशी चारुता, यादृशी वाच्यस्य तत्कार्यस्येति न ध्वनेस्तत्रान्तर्भावः, वाच्यस्याप्राधान्येनाविवक्षणात्।

यैस्तु लक्षणघटकमभिधानपदं प्रत्यायनपरमेव नत्वभिधाप्रयोज्यबोधजननपरं गृहीत्वा 'निःशेषच्युतचन्दनं स्तनतटम्' इत्यादौ प्रतीयमानप्राधान्ये स्थापितेऽपि, पर्यायोक्ते ध्वनिरन्तर्भाव्यते, तैः पुनरिदं विचारणीयम्, वाक्यार्थप्राधान्यमलङ्कारत्वं चेति विरुद्धौ धर्मौ। प्रकृते व्यङ्ग्यस्य यदि प्राधान्यम्, तदा नालङ्कारता, अथालङ्कारता, न तर्हि प्राधान्यमिति। आस्तां वा कथञ्चिदुभयमपि, तथाऽपि पर्यायोक्तापेक्षया बृहदाकारो ध्वनिस्तत्र नान्तर्भवितुमर्हति सुमेरुरिव सूचीसुषिरे। अपि तु तदेवात्र प्रविशेत्, सुरधुनीस्रोत इव सरस्वती। इदमुद्भटाक्षेपसमाधानम्।

वस्तुतस्तु पर्यायोक्ते व्यङ्ग्यस्य प्राधान्यमेव नास्तीति का चिन्ता तत्रान्तर्भावस्य, आलङ्कारिकशेखरेण भामहेनोक्ते—

"गृहेष्वध्वसु वा नान्नं भुञ्ज्महे यदधीतिनः ।
विप्रा न भुञ्जते तच्च 'रसदाननिवृत्तये ॥"

इत्युदाहरणे, पर्यायेण रसदाननिषेधरूपव्यङ्ग्यस्याचारुतया व्यक्तत्वात् । अत एव तेनैव 'तच्च रसदाननिवृत्तये' इत्यनेन व्यङ्ग्यं स्फुटीकृतम् ।

अथ पर्यायोक्तमें ध्वनिका अनन्तर्भाव बतलाते हैं—पर्यायेति । पर्यायोक्तमें भी यदि व्यङ्ग्य प्रधानरूपसे कदाचित् भासित होता हो तो भले ही उस पर्यायोक्तका ध्वनिमें अन्तर्भाव हो जाय क्योंकि वह व्याप्य है, किन्तु उसमें ध्वनिका अन्तर्भाव नहीं हो सकता क्योंकि वह ( ध्वनि ) काव्यमात्रमें व्याप्त और अङ्गी है, इसलिये व्यापकका व्याप्यमें समावेश करना सम्भव नहीं । वास्तवमें तो भामह द्वारा उदाहृत पर्यायोक्तमें व्यङ्गकी प्रधानता ही नहीं है क्योंकि विशेषचमत्कारशाली होनेसे वाच्यार्थ ही प्रधानरूपसे विवक्षित है । इसलिये उसमें ध्वनिके अन्तर्भावकी बात ही नहीं रही । प्रतीयमान अर्थका भी दूसरे ढङ्गसे जहाँ कथन हो उसे पर्यायोक्त अलंकार कहते हैं, जैसे श्रीकृष्ण भगवान् शिशुपालको कहते हैं—'जिस अन्नको पढ़े लिखे ब्राह्मण नहीं खाते, उसको हम घर या बाहरमें ( कहीं भी ) नहीं खाते हैं । यहाँ पर वैद्य द्वारा जहर मिलाया हुआ अन्न हमको प्राप्त न हो, यही भगवान्का आशय सहृदयोंको प्रतीत हो रहा है और उसीको प्रकारान्तरसे कहा गया है, परन्तु तदपेक्षा प्रकरणवश लब्ध विद्वान् ब्राह्मणोंके खानेसे बचे हुए भोजनको ही हम खाते हैं यह वाच्यार्थ ही विशेष रमणीय प्रतीत होता है ।

अपह्नुतिदीपकयोर्ध्वनिप्रवेशं निरस्यति—

**अपह्नुतिदीपकयोः पुनर्वाच्यस्य प्राधान्यं व्यङ्ग्यस्यानुयायित्वं प्रसिद्धमेव ।**

तयोर्वाच्यस्यैव प्राधान्यम्, उपमारूपव्यङ्ग्यस्य यथाऽप्राधान्यम् , तथा प्रागेव दर्शितम् ॥

अपह्नुति और दीपकमें वाच्यकी प्रधानता एवं उपमान उपमेयभावरूप व्यङ्ग्यकी अप्रधानताको पहले ही हम कह चुके हैं ।

अथ ध्वनेः सङ्करान्तर्भावे वाच्ये, प्रथममादिमभेदे तदाह—

**संकरालंकारेऽपि यदालङ्कारोऽलङ्कारान्तरच्छायामनुगृह्णाति, तदा व्यङ्ग्यस्य प्राधान्येनाविवक्षितत्वान्न ध्वनिविषयत्वम् ।**

छायाऽनुग्रहः शोभाजननम् । विषयता लक्ष्यत्वम् ।

'नीरक्षीरनयाद्यत्र सम्बन्धः स्यात् परस्परम् ।
अलङ्कृतीनामेतासां, संकरः स उदाहृतः' ॥

इति विद्यानाथोक्तलक्षणो दुग्धजलन्यायेनालंकाराणां मिथस्समावेशः संकरः। स चोद्भटमते चतुर्धा। तत्र

'अविश्रान्तिजुषामात्मन्यंगांगित्वं तु संकरः'

इत्ति मम्मटोक्तेरलब्धस्वातन्त्र्याणामेषामनुग्राह्यानुग्राहकभावे प्रथमः प्रकारो कुमारसम्भवे—

'प्रवातनीलोत्पलनिर्विशेषमधीरविप्रेक्षितमायताक्ष्या: ॥
तया गृहीतं नु मृगांगनाभ्यस्ततो गृहीतं नु मृगांगनाभि:'

इत्यत्र पार्वती-मृगीविलोकनयोर्व्यंज्यमानोपमा वाच्यस्य ससन्देहस्य सुषमान्तनोतीत्यंगमेव, न तु प्रधानम्। अतो न ध्वनेस्तत्र प्रवेशः सम्भवति ॥

संकरालंकारमें भी ध्वनिका अन्तर्भाव नहीं हो सकता यह बतलाते हैं—संकर इति। संकरालंकारमें अलंकारोंके अङ्गाङ्गिभाव द्वारा परस्पर में शोभाजनन होनेसे व्यङ्ग्यकी प्रधानतारूपसे विवक्षा न होनेसे ध्वनिकी विषयता नहीं रहती। जहाँ दूध पानी की भांति अलंकारोंका आपसमें मेल हो जाय वहाँ संकरालंकार होता है। इसके चार भेद हैं, उनमें जहाँ अलंकारोंका परस्परमें उपकार्य-उपकारक भाव हो वहाँ अङ्गाङ्गिभाव नामका संकरालंकार होता है, जैसे—जोरोंकी हवासे डोलते हुए नील कमलकी भांति चञ्चलाक्षी पार्वतीने अत्यन्त चञ्चलतापूर्वक देखना क्या हरिणियोंसे सीखा ? या हरिणियोंने ही उनसे सीख लिया ? यहाँ पर यद्यपि हरिणी और पार्वतीके विलोकनका उपमान उपमेयभाव व्यक्त होता है तथापि वह ( व्यङ्ग्योपमा ) संदेहालंकार रूप वाच्यकी ही सुषमा बढ़ानेसे अङ्ग ही है, प्रधान नहीं, इसलिये इसमें भी ध्वनि का अन्तर्भाव नहीं हो सकता।

द्वितीयेऽपि तद्भेदे ध्वनेः प्रवेशं निरस्यति—

**अलंकारद्वयसंभावनायां तु वाच्यव्यङ्ग्ययोः समं प्राधान्यम्।**

'एकस्य च ग्रहे न्यायदोषाभावादनिश्चयः' इति मम्मटोक्तेरलङ्काराणामेकतमपरिग्रहे साधकबाधकप्रमाणविरहात्समवाये सन्देहरूपो द्वितीयः संकरप्रकारः।

यथा—'नयनानन्ददायीन्दोर्बिम्बमेतत्प्रसीदति।
अधुनाऽपि निरुद्धाशमविशीर्णमिदं तमः॥'

इत्यत्र कामोद्दीपकः कालोऽयं वर्तते किमति पर्यायोक्तम्, वदनमिन्दुबिम्बतयाऽध्यवसितमित्यतिशयोक्तिर्वा, अथवैतदिति निर्दिष्टेवदनइन्दुबिम्बत्वारोपाद्रूपकम्, किमुत तयो समुच्चयविवक्षया दीपकम्, इत्येवं नानाऽलङ्कारसंकरे गुणप्रधानभावयोर्वाच्यव्यंग्ययतयोश्च निश्चेतुमशक्यत्वे कथं ध्वनेरन्तर्भावः।

यत्रापि वाच्यालङ्काराणामेकवाचकानुप्रवेशलक्षणस्तृतीयः, शब्दार्थालङ्काराणामेकत्र समावेशरूपश्चतुर्थश्च सङ्करप्रकारस्तेनैव निरदेशि, तयोस्तु सर्वथा प्रतीयमानप्राधान्यासम्भवान्न ध्वनिप्रवेशसम्भावनाऽपि । नव्यास्तु चतुर्थं प्रकारं संसृष्टावन्तर्भावयन्तस्त्रैविध्यमेव सङ्करस्य मन्यते । तदुक्तं दर्पणे—

'अङ्गाङ्गित्वेऽलङ्कृतीनां तद्वदेकाश्रयस्थितौ ।
सन्दिग्धत्वे च भवति, सङ्करस्त्रिविधः पुनः ॥ इति ।

संदेहसंकरमें भी ध्वनि समावेशका खण्डन करते हैं—अलंकारेति । एकके निश्चय करनेमें किसी भी साधक या बाधक प्रमाणके न होनेसे तुल्य-युक्त्या दोनोंका ही संदेहसंकरालंकार हो जाता है, जैसे-नयनानन्ददजनक चन्द्रका यह बिम्ब अत्यन्त आह्लादित हो रहा है, अभी भी दिशाओंको ढांकनेवाला यह अन्धेरा दूर क्यों नहीं होता ? यहाँ क्या कामोद्दीपक यह समय है ? या किसी नायिकाके मुखको चन्द्रका बिम्ब मान लिया गया है ? इसतरह पर्यायोक्त—अतिशयोक्ति आदि अलंकारोंके संदेह संकरसे वाच्य और व्यङ्ग्यमें गौणमुख्यके निश्चय न हो सकनेके कारण ध्वनिका इसमें अन्तर्भाव नहीं हो सकता ।

ननु—'होई ण गुणाणुराओ जड़ाण णवरं पसिद्धिसरणाणं ।
किर पह्नवइ ससिमणी चन्दे ण पिआमुहे दिट्ठे ॥

भवति न गुणानुरागो जडानां केवलं प्रसिद्धिशरणानाम् ।
किल प्रस्नौति शशिमणिश्चन्द्रे न प्रियामुखे दृष्टे ॥ इतिच्छाया ।

इत्यत्र सङ्करेऽपि प्रस्तुतत्वाद्वाच्योऽर्थान्तरन्यासोऽङ्गताम्, व्यतिरेकापह्नुती त्वतिचारुतया प्रतीयमाने अङ्गितामेव वहत इति व्यङ्ग्यप्राधान्यात्र कथं ध्वनेः प्रवेश इत्यत आह—

**अथ वाच्योपसर्जनीभावेन व्यङ्ग्यस्य तत्रापि व्यवस्थानं, तदा सोऽपि ध्वनिविषयोऽस्तु, न तु स एव ध्वनिरिति वक्तुं शक्यम् । पर्यायोक्तनिर्दिष्टन्यायात् ।**

अथेति यद्यर्थे । उपसर्जनीभावोऽप्राधान्यम् । तत्र संकरे । अयमर्थः—यदि संकरे व्यङ्ग्यप्राधान्यं क्वचिदस्ति, तदा, तस्यापि ध्वनावेवान्तर्भावोऽस्तु । यथा ध्वनेर्महाविषयतया पर्यायोक्ते नान्तर्भावः, किन्तु तदेवालंकारध्वनिप्रसङ्गे ध्वनावन्तर्भावितम्, तद्वदत्रापि तादृशसंकरस्यैव ध्वनौ प्रवेशः स्वीक्रियताम् ।

यदि संकरमें भी कहीं वाक्यका अप्राधान्य और व्यङ्ग्यका प्राधान्य हो तो उसका भी भले ही ध्वनिमें अन्तर्भाव हो जाय, किन्तु उसमें ध्वनिका अन्तर्भाव नहीं हो सकता, क्योंकि ध्वनिके व्यापक विषय होनेसे पर्यायोक्तकी भांति व्यापकका व्याप्यमें अन्तर्भाव नहीं होता। जैसे—वस्तुतत्त्वको नहीं जानकर केवल प्रसिद्धिके पीछे अन्धाधुन्ध दौड़नेवाले जड़ोंका गुणोंके प्रति पक्षपात नहीं होता, देखो, चन्द्रको देखकर चन्द्रकान्त मणि पिघलता है और प्रिया-मुखको देखकर नहीं पिघलता, यदि चन्द्रकान्तमणि गुणग्राही होता तो, प्रिया मुखदर्शनसे क्यों द्रवित नहीं होता, यहाँ वाच्यरूप अर्थान्तरन्यासका अप्राधान्य और चन्द्रकी अपेक्षा प्रिया मुखके अधिक गुणवत्त्वव्यञ्जन द्वारा विशेष चमत्कारजनक होनेसे व्यतिरेकालंकार, एवं यह चन्द्र नहीं है, अपितु प्रिया मुख ही चंद्र है इसतरह विशेष चमत्कार जनक द्वारा अपह्नुतिरूप व्यङ्ग्यके प्राधान्य होने पर भी ध्वनिका इन दोनोंमें अन्तर्भाव नहीं हुआ।

सामान्यतया संकरे पुनर्ध्वनेरप्रदेशं व्याहरति—

**अपि च संकरालंकारस्य संकरोक्तिरेव ध्वनिसंभावनां निराकरोति।**

नीरक्षीरवदलंकारमिश्रणे हि संकरः, न च मिश्रणे कस्यचिन्मुख्यत्वमपरस्य गुणत्वं वा शक्यमवगन्तुम्, व्यङ्ग्यप्राधान्यानवधारणे च कुतो ध्वनेः सम्भावनेति सारम्। इहार्थानुरोधेन, 'व्यङ्ग्यसम्भावनानिरासप्रकारम्' इति लोचनलेखेन च निरेत्यधिकं पाठे कल्पितम्।

अब सामान्यरूपसे ही संकरमें ध्वनि प्रवेशका खण्डन करते हैं—अपि चेति। पानी-दुग्धके मिश्रणवत् अलंकारोंके मिश्रणसे ही संकर होता है, और मिश्रण होनेसे किसीके भी प्राधान्य-अप्राधान्यका निश्चय नहीं हो पाता, और व्यङ्ग्यके प्राधान्यका निश्चय नहीं होनेसे इसमें भी ध्वनि प्रवेशका सम्भव नहीं है।

संकरालंकारादौ' इत्यादिपदगृहीतायामप्रस्तुतप्रशंसायां सम्भावितं ध्वनेरन्तर्भावं निराकरोति—

**अप्रस्तुतप्रशंसायामपि यदा सामान्यविशेषभावान्निमित्तनिमित्तिभावाद्वाऽभिधीयमानस्याप्रस्तुतस्य प्रतीयमानेन प्रस्तुतेनाभिसम्बन्धः, तदाऽभिधीयमानप्रतीयमानयोः सममेव प्राधान्यम्।**

'अप्रस्तुतात् सामान्यविशेषभावे, कार्यकारणभावे, सारूप्ये च प्रस्तुतप्रतीतावप्रस्तुतप्रशंसा' इति सम्यक्लक्षिताया अप्रस्तुतप्रशंसायाः प्रकारपञ्चकम्। तत्राप्रस्तुतात्सामान्याद्वाच्यात् प्रस्तुतस्य विशेषस्य व्यङ्ग्यत्वे प्रथमो यथा—

'पादाहतं यदुत्थाय मूर्धानमधिरोहित । स्वस्थादेवापमानेऽपि देहिनस्तद्वरं रजः ।'

इत्यत्र प्रस्तुतादपमानेपि स्वस्थात्सामान्याद् विशेषस्य प्रस्तुतस्य स्वस्य गम्यत्वम् ।

द्वितीयो यथा--

'अङ्काधिरोपितमृगश्चन्द्रमा मृगलाञ्छनः । केसरी निष्ठुरक्षिप्तमृगयूथो मृगाधिपः ।।'

इत्यत्र केसरिणो मृगाधिपत्याद्विशेषात् सामान्यस्य क्रूरप्रभुत्वस्य गम्यत्वम् ।।'

तृतीयो यथा--

'नितरां परुषा सरोजमाला न मृणालानि विचारपेशलानि ।
यदि कोमलता तवांगकानामथ का नाम कथाऽपि पल्लवानाम् ।।

इत्यत्र सरोजमालादितिरस्कारात्मनः कार्यान्नायिकाऽङ्गमार्दवविशेषस्य कारणस्य गम्यत्वम् । कार्यकारणभावस्त्वत्र प्रतीतिद्वारको बोध्यः ।

तुरीयो यथा--

'आनम्य वल्गुवचनैर्विनिवारितेऽपि रोषात् प्रयातुमुदिते मयि दूरदेशम् ।।
बाला कराङ्गुलिनिदेशवशंवदेन, क्रीडाविडालशिशुनाऽऽशु रुरोध मार्गम् ।।'

इत्यत्र मार्गरोधनात्कारणात् प्रवासान्निवृत्तेः कार्यस्य गम्यत्वम् । पञ्चमः प्रकारस्त्वग्र उदाहरिष्यते । उदाहृतप्रकारचतुष्टये न ध्वनिरन्तर्भवितुमर्हति, व्यङ्ग्यस्यवाच्यानतिशायित्वात् । अत एवाह जगन्नाथः-'कार्यकारणसामान्यविशेषभावमूलास्तु चत्वारः प्रकारा गुणीभूतव्यङ्ग्यस्यैव भेदाः, अभिधादिलेशशून्यस्य केवलागूरणमात्रस्य ध्वनित्वप्रयोजकत्वात्' इति ।।

एवं अप्रस्तुतप्रशंसामें भी ध्वनि प्रवेशका खण्डन करते हैं--अप्रस्तुतेति । अप्रस्तुतप्रशंसामें भी जब सामान्य-विशेष या कार्य-कारणभावसे शब्दों द्वारा प्रतिपाद्यमान वाच्यभूत अप्रस्तुत (अप्राकरणिक) का प्रतीयमान प्रस्तुत (प्राकरणिक) के साथ सम्बन्ध हो तब वाच्य और व्यङ्ग्य दोनोंका समान ही प्राधान्य रहता है। 'सामान्य, विशेष, काय, कारण और सारूप्य' ये पांच भेद इसके माने गये हैं। उसमें जहाँ सामान्य अप्रस्तुत (अप्राकरणिक), विशेष प्रस्तुत (प्रकृतोपयोगी) का आक्षेप करता है वहाँ पहला भेद समझना चहिये। जैसे--कितने भी अपमानित होने पर रुष्ट नहीं होनेवाले प्राणीकी अपेक्षा वह धूलि ही अच्छी है, जो कि, पैरके लगने मात्रसे ही तुरत मस्तक पर चढ़ जाती है। यहाँ पर अपमान दशामें भी स्वस्थ रहनेवाले अप्रस्तुत प्राणी रूप वाच्यसे प्रस्तुत निज-

रूप व्यङ्ग्य विशेषका बोध होता है। ऐसी स्थितिमें सामान्यसे विशेष अतिरिक्त पदार्थ नहीं है, अर्थात् सामान्यसे विशेष व्याप्त है, इसलिये व्यङ्ग्य विशेषवत् वाच्यरूप सामान्यका भी प्राधान्य है, क्योंकि सामान्य—विशेषके एक साथ प्राधान्य होनेमें कोई विरोध नहीं है। एवं विशेषरूप अप्रस्तुत, सामान्यात्मक प्रस्तुतका जहाँ आक्षेप करता है, वहाँ दूसरा भेद समझना चाहिये, जैसे—हरिणको अपनी गोदमें रखनेसे चन्द्रमा मृगलाञ्छन कहा जाता है, और क्रूरतापूर्वक मृग झुण्डको मारनेवाला सिंह 'मृगेन्द्र' कहा जाता है। यहाँ पर सिंहके अप्राकरणिक मृगाधिपत्य रूप विशेषसे क्रूर प्रभुत्वरूप सामान्यका बोध होता है, किन्तु उक्त युक्तिसे दोनोंकी ही प्रधानता रहती है।

नन्वत्र प्रस्तुताप्रस्तुतयोः कथं तुल्यं प्राधान्यमित्यत आह—

**यदा तावत्सामान्यस्याप्रस्तुतस्याभिधीयमानस्य प्राकरणिकेन विशेषेण प्रतीयमानेन संबन्धस्तदा विशेषप्रतीतौ सत्यामपि प्राधान्येन तस्य सामान्येनाविनाभावात्सामान्यस्यापि प्राधान्यम्।**

अविनाभावो व्याप्तिः। यदि वाच्यात्सामान्याद् व्यङ्ग्यस्य विशेषस्य प्रस्तुतत्वात् प्राधान्येन प्रतीतिः, तर्हि सामान्यस्याप्रस्तुतस्यापि प्राधान्येनैव प्रतीतिः, सामान्यविशेषयोर्व्याप्तेः। तथाहि—न खलु विशेषाधिकरणे सामन्याभावः प्रतीयते।

अब प्रस्तुत—अप्रस्तुत, दोनोंके प्राधान्य होनेका रहस्य बतलाते हैं—यदेति। जब सामान्यात्मक अप्रस्तुत वाच्यका विशेषात्मक प्रस्तुत व्यङ्ग्यके साथ सम्बन्ध प्रतीत होता है, तब प्रधान रूपमे विशेषकी प्रतीति होने पर भी परस्परमें व्याप्यव्यापकभाव होनेसे सामान्यकी भी प्रधानरूपसे ही प्रतीति होती है, क्योंकि व्याप्यकी प्रतीति होने पर अवश्य ही व्यापककी भी प्रतीति होती है, जैसे—धूमकी प्रतीति स्थलमें अग्निकी प्रतीति सर्वानुभव सिद्ध है।

**यदाऽपि विशेषस्य सामान्यनिष्ठत्वं तदाऽपि सामान्यस्य प्राधान्येव सामान्ये सर्वविशेषाणामन्तर्भावाद्विशेषस्यापि प्राधान्यम्।**

सामान्ये निष्ठा पर्यवसानं यस्य तत्सामान्यनिष्ठं तस्य भावस्तत्त्वं सामान्यव्यञ्जकत्वमित्यर्थः। सामान्यं हि विशेषात्मकमेव। अत एव सामान्याभावस्य विशेषाभावकूटप्रयोज्यत्वम्। एवञ्च सामान्यस्य प्राधान्ये विशेषस्यापि प्राधान्यमर्थादापतितमितिकेवलव्यङ्ग्यस्यैव प्राधान्याभावान्न ध्वनिप्रवेशः।

एवं जहाँ अप्रस्तुत विशेषरूप वाच्यसे प्रस्तुत सामान्यरूप व्यङ्ग्यका आक्षेप होता है, वहाँ भी सामान्यात्मक व्यङ्ग्यका मुख्यरूपसे भान होने पर विशेषात्मक

वाच्यका भी प्राधान्य होना स्वाभाविक है, क्योंकि विशेषोंके अलावा सामान्य कोई वस्तु ही अलग नहीं प्रतीत होती, अर्थात् सामान्यके अन्दर विशेष भी आजाता है, अतः केवल व्यङ्ग्यका प्राधान्य न होनेसे इसमें भी ध्वनिका समावेश नहीं हुआ।

कार्यकारणभावे चायमेव न्यायः।

सत्कार्यवादसिद्धान्ते कार्यकारणयोस्तदात्म्यांगीकारात्कार्यस्य प्राधान्ये कारणस्यापि प्राधान्यम्, एवं कारणस्य प्राधान्ये कार्यस्यापि तत्त्वं स्वतः सिद्धमिति पूर्ववन्न ध्वनिप्रवेशस्तत्रापि ॥

एवं कार्य-कारणरूप अप्रस्तुत प्रशंसामें भी सत्कार्यवादके सिद्धान्तानुसार कारण ही अपने सूक्ष्म कलेवरको बदलकर, विशाल काय धारण द्वारा कार्य रूपमें परिणत हो जाता है, इस दशामें कार्यकी प्रधानतावत् कारणकी भी प्रधानता माननी होगी, तथा जब कार्य ही विशालरूपको छोड़कर, सूक्ष्मरूप धारण द्वारा कारण रूपमें परिणत हो जाता है, तब कारणवत् कार्यका भी प्राधान्य मानना आवश्यक होगा, क्योंकि दोनों वस्तु एक हैं, इसलिए किसी भी एकमात्रकी प्राधानता न होनेसे ध्वनिका इसमें अन्तर्भाव नहीं हुआ।

'अथ पञ्चमेऽपि प्रकारे ध्वनेरप्रवेशं दर्शयति—

यदा तु सारूप्यमात्रवशेनाप्रस्तुतप्रशंसायामप्रकृतप्रकृतयोः संबन्धस्तदाऽप्यप्रस्तुतस्य सरूपस्याभिधीयमानस्य प्राधान्येनाविवक्षायां ध्वनावेवान्तःपातः। इतरथा त्वलंकारत्वमेव।

मात्रशब्दः सामान्यविशेष्यभावादि व्यवच्छिनत्ति।

आबद्धकृत्रिमसटाजटिलांसभित्तिरारोपितो मृगपतेः पदवीं यदि श्वा।
मत्तेभकुम्भतटपाटनलम्पटस्य, नादं करिष्यति कथं हरिणाधिपस्य ॥'

इत्यत्राप्रस्तुतस्य वाच्यस्य शुनो निन्दया विद्वद्वरेण्यत्वं वेषव्यवहारैरभिनयतो वैधेयस्य प्राकरणिकस्य गर्हा गम्यते। सारूप्यं चोभयोः सम्बन्धः। तत्र यदि वाच्यस्याप्रस्तुतत्वात्स्वचनाप्राधान्यम्, व्यङ्ग्यस्य च प्राकरणिकत्वेन प्राधान्यमनुभूयेत, तदा तस्यैव ध्वनौ प्रवेशः। किन्तु न ध्वनेर्विपुलाकारस्य तत्र प्रवेशः। एवं वाच्यव्यङ्ग्ययोः प्रस्तुतत्वेऽपि बोध्यम्। नचात्र वाच्यप्रस्तुतत्वप्रसिद्धम्, खलतिरस्कृतस्य गुणिनः चञ्चरीकावहेलितस्य चाम्पेयकस्य च सन्निधाने कानने केनचिदुक्ते—

'यन्नाहतस्त्वमलिना मलिनाशयेन, किन्तेन चम्पक ! विषादमुरीकरोषि।
विश्वाभिरामनवनीरदनीलवेशाः, केशाः कुशेशयदृशां कुशलीभवन्तु ॥'

इत्यत्र वाच्यप्रतीयमानयोश्चम्पकगुणिनोः प्रस्तुतत्वस्य स्फुटत्वात् । नन्वत्र वाच्यस्य प्रस्तुतत्वेऽप्रस्तुतप्रशंसालक्षमेव न समन्वियादिति चेत्, न, मुख्यतात्पर्यविषयीभूतार्थभिन्नार्थस्य विवक्षिततताया एवात्राप्रस्तुतशब्दार्थत्वेन विवक्षणात् ।

ननु तर्हि ध्वनेरप्रस्तुतप्रशंसायाः को भेदः ? व्यङ्ग्यस्य प्राधान्ये, नैव कश्चिद् भेदः । अप्राधान्ये तु तदेव ध्वनेरिमां व्यतिरेचयति । तदाह–इतरथेत्यादि । इतरथा प्रस्तुतस्य व्यङ्ग्यस्य विच्छित्त्यजनकत्वादप्राधान्येन, अलङ्कारत्वमेव, न ध्वनित्वम्, व्यङ्ग्याप्राधान्यात् । 'अलङ्कारान्तरमेव' इति पाठे तु इतरथा प्रतीयमानस्याप्यप्रस्तुतत्वेलंकारान्तरमन्योऽलंकारो नत्वप्रस्तुतप्रशंसैवेति कथञ्चन योजना विधेया । इत्थमेव व्याजस्तुतिपरिकरप्रभृतिषु व्यङ्ग्यसंस्पर्श्यलंकारेषु ध्वनेरप्रवेशोऽवसेयः ॥

अब अप्रस्तुतप्रशंसाके सारूप्यात्मक पञ्चम प्रकारमें भी ध्वनि समावेशका खण्डन करते हैं—यदा तु इति । जहाँ सारूप्यमात्रवश अप्रस्तुत प्रशंसामें प्रस्तुत-अप्रस्तुत दोनोंका सम्बन्ध प्रतीत होता है, वहाँ भी यदि सरूपवाच्यका अप्राकरणिक होनेसे अप्राधान्य और व्यङ्ग्यका प्राकरणिक होनेसे प्राधान्य प्रतीत होता हो तो उसका भी ध्वनिमें ही अन्तर्भाव हो जायगा, किन्तु विशाल क्षेत्र होनेसे ध्वनिका उसमें अन्तर्भाव नहीं होगा, जैसे–'बनावटी केसरिया बालोंको, कन्धे पर बांधकर, कुत्तेको शेर जैसा बना देने पर भी दिग्गज हाथीके मस्तकको फाड़नेवाले सिंह जैसा क्या कभी गरज सकता है ? यहाँ अप्राकरणिक कुत्तेकी निन्दासे प्रतीयमान, विद्वान्के वेष ( पोशाक ) को धारण करनेवाले मूर्खकी निन्दा ही विशेष चमत्कार जनक प्रतीत हो रही है, इसलिये इसका ध्वनिमें ही अन्तर्भाव हो गया । परन्तु जहाँ अप्रस्तुत-वाच्यार्थ ही चमत्कार जनक प्रतीत होता है, प्रस्तुत व्यङ्ग्य तो उसका मुख ताकनेवाला हो रहता है, वहाँ अप्रस्तुत-प्रशंसालंकार ही माना जाता है ।

उक्तं निगमयति—

**तदयमत्र संक्षेपः—**

**'व्यङ्ग्यस्य यत्राप्राधान्यं वाच्यमात्रानुयायिनः ।**
**समासोक्त्यादयस्तत्र वाच्यालंकृतयः स्फुटाः ॥ १४ ॥'**
**'व्यङ्ग्यस्य प्रतिभामात्रे वाच्यार्थानुगमेऽपि वा ।**
**न ध्वनिर्यत्र वा तस्य प्राधान्यं न प्रतीयते ॥ १५ ॥**

यत्र काव्ये वाच्यमात्रानुयायिनो वाच्यमेवोपकुर्वन्तो व्यङ्ग्यस्याप्राधान्यम्, तत्र समासोक्त्यादयोऽलङ्कृतयः स्फुटा इति, व्यङ्ग्यस्योपमादाविव, प्रतिभामात्रे केवलाभासे न तु प्ररोहे प्ररोहेऽपि वा समासोक्त्यादाविव वाच्यार्थस्यानुगमेऽनुसरणे सति वा, यत्र व्यङ्ग्यस्य प्राधान्यं न प्रतीयते तत्र न ध्वनिरिति चार्थः। कारिकाद्वयमिदमग्रिमा च कारिका वृत्तिग्रन्थ इति केचित्।

अत्र संक्षेपमें सबका उपसंहार करते हैं—व्यङ्ग्यस्येति। जिस काव्यमें वाच्यमात्र के उपकारक होनेसे व्यङ्ग्य अप्रधान है उसमें समासोक्ति आदि अलंकार स्फुट रूपसे प्रतीत होते हैं, या जहाँ पर व्यङ्ग्यकी झलक सी होती है, स्फुटता नहीं है, अथवा स्फुटता होने पर भी वाच्यव्यङ्ग्य दोनोंकी प्रधानता प्रतीत होती है, वहाँ ध्वनि नहीं होती।

तर्हि क्व ध्वनेर्विषय इत्याकाङ्क्षायामाह—

(18) 'तत्परावेव शब्दार्थौ यत्र व्यङ्ग्यं प्रस्थितौ।
ध्वनेः स एव विषयो मन्तव्यः संकरोज्झितः॥ १६॥'

यत्र काव्ये तत्परावेव व्यङ्ग्यप्रत्यायनतात्पर्येणैवोपात्तौ, शब्दार्थौ, व्यङ्ग्यं प्रति स्थितौ तदुपकारकतया तदुन्मुखौ स्तः। स एव, नत्वप्रधानव्यङ्ग्यः संकरेणालंकारमिश्रणेनोज्झितो रहितः शुद्ध इति यावत्। ध्वनेर्विषयो मन्तव्य इत्यर्थः॥

जिस काव्यमें व्यङ्ग्यार्थको अवगत करानेके तात्पर्यसे ही प्रतिपादित वाच्य-वाचक, व्यङ्ग्यपरायण मालूम होते हों वहीं पर अलंकार मिश्रण रहित ध्वनिका शुद्ध विषय समझना चाहिये।

पर्यवसितमाह—

तस्मान्न ध्वनेरन्यत्रान्तर्भावः।

तस्मादुक्तहेतोः, अन्यत्रालंकारेषु॥

इस लिये अलंकारादिमें ध्वनिका अन्तर्भाव नहीं हुआ।

अलंकारादौ ध्वनेरप्रवेशस्य हेत्वन्तरमभिधत्ते—

इतश्च नान्तर्भावः। यतः काव्यविशेषोऽङ्गी ध्वनिरिति कथितः। तस्य पुनरङ्गानि—अलङ्कारा गुणा वृत्तयश्चेति प्रतिपादयिष्यन्ते।

इतश्चास्मादप्युच्यमानाद्धेतोः, न पुनरुक्तेभ्य एव हेतुभ्यः। यस्माद् ध्वनिरङ्गी मुख्यः, अलंकारश्शब्दार्थस्वभावत्वाद् गुणा वृत्तयश्च तद्धर्मात्मत्वात्, तस्याङ्गान्यु-

पस्कर्तारो यतः प्रतिपादयिष्यन्ते, तस्मात् पृथग्भूतकरादिशरीरयोरिवाङ्गाङ्गिनोरलंकारादिध्वन्योस्तादात्म्यं न सम्भवति ॥

विद्वानोंने चमत्कार जनक काव्यविशेष ध्वनिको ही मुख्य अङ्गी माना है, गुण अलंकार, रीति तो उसके अङ्ग ही हैं, इसलिये राजा-भृत्यकी भांति अङ्ग-अङ्गीमें गुण प्रधान भाव रहनेसे दोनों एक नहीं हो सकते।

तदेवाह—

**न चावयव एव पृथग्भूतोऽवयवीति प्रसिद्धः।**

स्फुटम् ॥

पृथक्-पृथक् भासमान हाथ, पैर, एक एक अवयव ही शरीर नहीं हैं, अपितु उनसे अतिरिक्त ही एक अवयवी शरीर अलग प्रतीत होता है।

ननु तर्ह्यपृथग्भूतमङ्गमेवाङ्गितां लभेतेत्याशंकामपाकरोति—

**अपृथग्भावे तु तदङ्गत्वं तस्य। न तु तत्त्वमेव।**

यदा करादिषु समवेतं शरीरं, तदैव तेषामङ्गत्वम्। अथ च यथा करादीनामङ्गत्वेऽपि न शरीरत्वम्, तथाऽलंकारादीनामपि न ध्वनित्वम्, ननु कराद्यवयवातिरिक्तस्य वपुषोऽनुपलम्भादङ्गानामेवाङ्गितेति चेत्, मैवम्, न्यायनयेऽवयविनः पार्थक्यस्य 'एको घटः' इत्यादिप्रतीतिबलेन व्यक्तं व्यवस्थापितत्वात्। अपृथग्भावे तूपकारकत्वविरहात्समवायाभावाच्च कथमङ्गत्वमिति चिन्त्यमेव ॥

यद्यपि करचरणादि अवयवोंके सिवा, शरीर, एक अतिरिक्त वस्तु नहीं दिखाई देती, तथापि अवयवोंका समुदाय एक अलग ही मानना होगा। क्योंकि घटसे होनेवाला कार्य इसके अवयवसे नहीं होता, इसलिये समुदायके अन्दर प्रत्येकके होनेपर भी प्रत्येक, समुदायका अङ्ग ही है, अङ्गी तो उससे एक भिन्न ही है, वैसे ही अलंकारादि प्रत्येक पदार्थ ध्वनि नहीं हो सकता किन्तु अलंकारादिसे भिन्न एक विलक्षण ही ध्वनि माननी होगी।

ननु तदाऽप्रस्तुतप्रशंसापञ्चमप्रकारादौ कथं ध्वनेस्तादात्म्यमित्यत्राह—

**यत्रापि वा तत्त्वम्, तत्रापि ध्वनेर्महाविषयत्वान्न तन्निष्ठत्वमेव।**

अलंकाराणामेव ध्वन्यन्तःपातो ननु ध्वनेस्तन्निष्ठत्वं तत्तादात्म्यमिति बोध्यम्।

अप्रस्तुतप्रशंसाके पञ्चम प्रकारमें जो व्यङ्ग्यका प्राधान्य कहा गया है उसको भी ध्वनिके व्यापक होनेसे ध्वनिमें ही अन्तर्गत कर सकते हैं, लेकिन ध्वनि उसके अन्तर्गत नहीं हो सकती, क्योंकि उसका महान व्यापक विषय है।

ध्वनिलक्षणकारिकाऽवयवमुपयोगाय व्याचष्टे—

**'सूरिभिः कथितः' इति विद्वदुपज्ञेयमुक्तिः, न तु यथाकथञ्चित्प्रवृत्तेति प्रतिपाद्यते ।**

विद्वद्भ्य उपज्ञा प्रथम उपक्रमो यस्याः सेति बहुव्रीहिः । तत्पुरुषे तु 'उपज्ञोपक्रमं तदाद्याचिख्यासायाम्' इत्यनेन पाणिनिसूत्रेण क्लीबत्वं स्यात् । अमूलकत्वे हि प्रमत्त-वाक्यवदुपेक्ष्येत ॥

अत्यन्त प्राचीन विद्वानोंने ही सबसे पहले उक्त ध्वनिका निर्वचन किया है, न कि आधुनिक किसी नगण्य व्यक्तिकी वह (ध्वनि) कपोल कल्पित वस्तु है, अतः उन्मत्त वचन की तरह उसकी उपेक्षा नहीं हो सकती ।

ध्वनिसञ्ज्ञाव्यपदेशक्रमं दर्शयितुं गौरवाय व्यपदेशकर्तॄन् स्तौति—

**प्रथमे हि विद्वांसो वैयाकरणाः, व्याकरणमूलत्वात्सर्वविद्यानाम् ।**

प्रथमे मुख्याः, सर्वविद्यामूलभूतशब्दब्रह्मवित्त्वात् । शब्दब्रह्मणा हि जगदेव व्याप्तम्, किं पुनश्चतुर्दशाष्टादश वा विद्याः ।

सबसे पहले वैयाकरणोंके द्वारा ही ध्वनि शब्दको व्यवहृत करनेका मूलरहस्य बतलाते हैं—प्रथम इति । सब विद्याओंका मूल व्याकरण है इसलिए व्याकरण ज्ञाता, विद्वानोंमें प्रधान गिने जाते हैं ।

**ते च श्रूयमाणेषु वर्णेषु ध्वनिरिति व्यवहरन्ति ।**

ते शाब्दिकाः श्रवणेन्द्रियगोचरीक्रियमाणेषु ध्वनिरितिव्यपदेशं कुर्वन्ति । तथा हि—'अथवा प्रतीतपदार्थको लोके ध्वनिश्शब्द उच्यते' इति व्याकरणमहाभाष्यम् ।

'यः सय्योगवियोगाभ्यां करणैरुपजन्यते ॥
स स्फोटश्शब्दजश्शब्दो ध्वनिरित्युच्यते बुधैः ॥
प्रत्ययैरनुपाख्येयैर्ग्रहणानुग्रहैस्तथा ।
ध्वनिप्रकाशिते शब्दे स्वरूपमवधार्यते ॥
अल्पीयसाऽपि यत्नेन शब्दमुच्चारितं मतिः ।
यदि या नैव गृह्णाति वर्णं वा सकलं स्फुटम् ॥
शब्दस्योर्ध्वमभिव्यक्तेर्वृत्तिभेदास्तु वैकृताः ।
ध्वनयः समुपोहन्ते स्फोटात्मा तैर्न भिद्यते ॥'

इति वाक्यपदीयं च । प्रतीतो ज्ञातः पदार्थो यस्मादिति व्युत्पत्तिर्वर्णात्मक एव शब्दे सङ्गच्छते ।

अयमाशयः—समग्रपदप्रत्यक्षमन्तरेण शाब्दबोधो न सम्भवति । वर्णानामाविर्भावतिरोभावयोराशुभावित्वेन कदाऽनेकवर्णात्मकपदप्रत्यक्षं तु दुर्घटम् । तस्मान्मध्यमानादाभिव्यङ्ग्यं नित्यमखण्डात्मकं शब्दस्वरूपं शाब्दबोधोपयोगिनं स्फोटं तद्व्यञ्जकं मध्यमानादरूपञ्च ध्वनिं शाब्दिकाः पूर्वमवोचन् । पश्चात्तदनुयायिन आलङ्कारिकाश्चमत्कारि व्यङ्ग्यार्थव्यञ्जकं शब्दार्थोभयं ध्वनिमाहुरिति नेयमपूर्वाऽसम्भविनी कल्पनेति नास्तीह भूयः परीक्षाप्रयोजनम् ।

वे प्रसिद्ध वैयाकरण श्रूयमाण शब्दोंमें ध्वनिका व्यवहार करते हैं, अर्थात् पद-प्रत्यक्षके बिना शब्दबोध नहीं हो सकता है, यदि वर्णात्मक शब्द अनित्य हो तो, क्षणमात्रमें विनष्ट होनेवाले वर्णोंका एक साथ मेल न होनेसे पद प्रत्यक्ष ही न होगा, अतः मध्यमानादसे व्यङ्ग्य स्फोटात्मक अखण्ड शब्दको उन्होंने नित्य माना है और मध्यमा नादमें ध्वनिका व्यवहार किया है ।

तदाह—

**तथैवान्यैस्तन्मतानुसारिभिः सूरिभिः काव्यतत्त्वार्थदर्शिभिर्वाच्यवाचकसम्मिश्रः शब्दात्मा काव्यमिति व्यपदेश्यो व्यञ्जकत्वसाम्याद् ध्वनिरित्युक्तः ।**

तद्वद्व्यञ्जनादिस्वीकारे शाब्दिकसरणिमनुसरद्भिरालङ्कारिकैर्वाच्यवाचकाभ्यामर्थशब्दाभ्यां, सम्मिश्रो मिलितः, शब्दात्मा शब्दस्य प्रथमं बुद्धिविषयत्वात्तत्प्रधानः, काव्यमिति व्यवहरणीयो व्यञ्जकत्वसाधर्म्येण मध्यमानादतुल्यो ध्वनिरित्युक्त इत्यर्थः ।

इह 'वाच्यवाचकसहितः सम्मिश्र' इति मध्यमपदलोपी समासः । 'गामश्वं पुरुषं पशुम्' इतिवत् समुच्चयोऽत्र चकारेण विनाऽपि । तेन वाच्योऽपि ध्वनिः, वाचकोऽपि शब्दो ध्वनिः, द्वयोर्व्यञ्जकत्वं ध्वनित्वसाम्यात् । सम्मिश्रिते विभावानुभावसंवलनच्छाययेति व्यङ्ग्योऽपि ध्वनिः, ध्वन्यत इति कृत्वा । शब्दनं शब्दः शब्दव्यापारः, न चासावभिधाऽऽदिरूपः, अपितु आत्मभूतः, सोऽपि ध्वननाद् ध्वनिः । 'काव्यमिति व्यपदेश्यश्च योऽर्थः सोऽपि ध्वनिः' इति लोचनमालोचनीयम् ॥

बादमें तन्मयतानुयायी काव्यतत्त्वार्थद्रष्टा आलंकारिकोंने व्यङ्ग्यव्यञ्जक भाव होनेसे चमत्कार जनक वाच्य, वाचक, व्यङ्ग्य और काव्य-व्यवहार-योग्य जो अर्थ, उन सबको ध्वनि शब्दसे व्यवहृत किया है ।

'वाग्विकल्पानामानन्त्यात्' इत्यादिनोपक्षिप्तां ध्वनेः क्षोदिष्ठतां निःक्षिपति—

**न चैवंविधस्य ध्वनेर्वक्ष्यमाणप्रभेदतद्भेदसङ्कलनया महाविषयस्य यत्प्र-**

काशनम्, तदत्र प्रसिद्धालङ्कारविशेषमात्रप्रतिपादनेन तुल्यमिति तद्भावितचेतसां युक्त एवात्र संरम्भः। न च तेषु कथञ्चिदीर्ष्यया कलुषितशेमुषोकत्वमाविष्करणीयम्।

वक्ष्यमाणा ये प्रभेदा अविवक्षितवाच्यत्वादयः, तद्भेदा अर्थान्तरसंक्रमितवाच्यत्वादयश्च, तेषां सङ्कलनया गणनया, महाविषयस्य कात्स्न्र्येनावधारयितुमशक्यत्वाद् व्यापकस्य, ध्वनेर्यत्प्रकाशनम्, तद् अप्रसिद्धानां परिमिताकारतया सर्वथाऽप्रख्यातानाम्, अलंकारमात्राणामशेषालंकाराणाम्, प्रतिपादनेन च न तुल्यम्, इति तयोरतितारतम्याद्धेतोः, तद्भावितचेतसामलंकारवासितमनसां ध्वनिवासनापूर्णचेतसां वा संरम्भः स्वपक्षन्यूनताख्यातिजन्मा क्रोधः, अत्रास्मिन् ध्वनिसविशेषनिरूपणलक्षणे ध्वन्याक्षेपलक्षणे वा विषये, युक्त एव। अतः, तेषु ईर्ष्यया कलुषितशेमुषीकत्वमक्षमया दूषितमतित्वम्, कथञ्चित्, नाविष्करणीयं न प्रकाशनीयमित्यर्थः।

इदमुक्तं—भवति—'अलक्षविषयत्वाद् ध्वनिर्नास्त्येव, 'सन्नपि क्षोदीयस्तया ज्ञातुमशक्य एव' इति यदुक्तम् तदुभयमपि ध्वनेर्महाविषयत्वप्रकाशनेन निरस्तम्। अतो महीयसो ध्वनेर्मुष्टिमेयैरलंकारैर्भावो वोढुं न पार्यत इत्यस्माभिः काव्ये ध्वनिरेव मूर्धन्यतयाऽवधार्यते। तत्रालंकारमात्राभिनिविष्टबुद्धीनामभीष्टसिद्धिव्याघाताद् रोषः समुचित एवेति तत्रास्माभिः क्षमैव विधेया, नतु प्रतिरोषः कार्यः। यद्वा ध्वन्यसदृशालंकारसादृश्योपन्यासदर्शनेन ध्वनिभावितचेतसामेव कोप उचित इति तेभ्य आलंकारिकैरेव न प्रतिकोपनीयम्॥

वक्ष्यमाण अविवक्षितवाच्य और विवक्षितान्यपरवाच्यरूप भेद, एवं अर्थान्तरसंक्रमितवाच्य और अत्यन्ततिरस्कृतवाच्य, तथा असंलक्ष्यक्रम व्यङ्ग्य, और संलक्ष्यक्रम व्यङ्ग्यादि उपभेदकी गणनासे अत्यन्त व्यापक विषयवाले ध्वनिका निरूपण, परम सीमित अप्रसिद्ध अलंकार मात्रका प्रतिपादन जैसा नहीं है, इसलिये अलंकार पक्षपातियोंका अपने पक्षकी न्यूनता होनेसे क्रोध होना उचित ही है किन्तु, ध्वनिवादियोंको उसकी प्रतिक्रियाके लिये कलुषित विचार नहीं कर, क्षमा करना ही अच्छा होगा।

उपसंहरति—

तदेवं ध्वनेस्तावदभाववादिनः प्रयुक्ताः।

एवमुक्तैः प्रकारैः, तावदादौ, ध्वनेरभाववादिनः, प्रयुक्ताः प्रत्याख्याता इत्यर्थः। ध्वनिस्थापकप्रमाणाद्युपक्षेपेण तन्मतं निरस्तमिति भावः।

इस तरह ध्वनि के स्थापक दृढ प्रमाणोंसे ध्वनिका अभाव माननेवाले परास्त हो गये।

पर्य्यवसितमुपन्यस्यति—

अस्ति ध्वनिः।

अस्त्येव, नतु विपक्षाक्षेपैरपाकृत इत्याशयः, आचार्यास्तु पूर्ववच्छब्द–तदर्थ–व्यापार–व्यङ्ग्य–समुदाय–रूपं ध्वनिपदप्रतिपाद्यपञ्चकमिहापि व्याचख्युः॥

उक्त रीतिसे वाच्य, वाचक, ध्वननात्मक, व्यापार, व्यङ्ग्य और काव्य-व्यवहार योग्य अर्थ, ये सभी व्यञ्जक होनेसे ध्वनिपदसे लिये जाते हैं।

द्वितीयोद्द्योतारम्भे ध्वनिप्रभेदनिरूपणस्यासङ्गतिं दवयितुं तद्भेदावुद्दिशति—

**स चासावविवक्षितवाच्यो विवक्षितान्यपरवाच्यश्चेति द्विविधः सामान्येन।**

सामान्येन, नतु वक्ष्यमाणविशेषैः। अन्यथा द्वैविध्यमेव न स्यात्। ननु भक्तित्वाक्षेपनिरासानुक्तेर्विप्रतिपन्नमतनिराकृतौ सावशेषायां मध्ये ध्वनिप्रकारनिरूपणमसाम्प्रतमिति चेत्, सत्यम्, लक्षणोदाहरणाभ्यां ध्वनौ सामान्यतया निरूपित एव भाक्तत्वाद्याक्षेप–तत्समाधाने सौकर्यं लभेते इति प्रागेव प्रकारनिरूपणं कृतम्।

उपस्थितिकालेऽन्वयबाधस्य जागरूकतयाऽविवक्षितो वाच्यजात्यादिरूपेणान्वयबोधविषयतयाऽनपेक्षितो वाच्यो यत्र, सोऽविवक्षितवाच्यः प्रथमो लक्षणामूलः, विवक्षितो वाच्यताऽवच्छेदकरूपेणान्वयबोधविषयत्वेनापेक्षितोऽन्यपरो व्यङ्ग्योपसर्जनीभूतो वाच्यो यत्र, स विवक्षितान्यपरवाच्योऽभिधामूलो द्वितीयश्च ध्वनेः प्रकारोऽवगन्तव्यः। तत्र विवक्षितान्यपरवाच्येऽभिधामूलतयोपजीव्ये प्राङ्निरूपयितुमर्हेऽपि, सूचीकटाहन्यायेन लक्षणामूलस्याविवक्षितवाच्यस्य ध्वनेर्निरूपणमिह विहितम्॥

उक्त ध्वनिके सामान्यरूपसे 'अविवक्षितवाच्य' और 'विवक्षितान्यपरवाच्य' ये दो भेद हैं। उनमें प्रथम लक्षणामूलक ध्वनि और द्वितीय अभिधामूलक ध्वनि कही जाती है।

अविवक्षितवाच्यध्वनिमुदाहरति—

सुवर्णपुष्पां पृथिवीं चिन्वन्ति पुरुषास्त्रयः।
शूरश्च कृतविद्यश्च यश्च जानाति सेवितुम्॥

यः शूरः यः कृतविद्यो विद्वान्, यश्च सेवितुं प्रभुं परिचरितुं जानाति। ते त्रयः पुरुषाः, पृथिवीं सुवर्णपुष्पं चिन्वन्तीत्यर्थः। चिञो द्विकर्मकत्वात्पृथिव्या अपि कर्मत्वम्

'सुवर्णपुष्पाम्' इति पाठे सुवर्णमेव पुष्पं यस्या इति बहुव्रीहिः। सुवर्णानि पुष्यतीति सुवर्णपुष्पेति विग्रहश्चिन्त्यः, पुष्यतेरकर्मकत्वात्। अन्तर्भावितण्यर्थत्वेऽप्यणन्तत्वेन ङीपो दुर्वारत्वात्। अजादिगणपाठकल्पना त्वगतिकगतिः। शूरसूरिसेवनचतुरा एवानायासेन धनं विपुलमुपार्जयन्ति तात्पर्यम्।

इह पृथिव्याः सुवर्णपुष्पस्य तच्चयनस्य चाप्रसिद्धेः 'सुवर्णपुष्पम्' 'चिन्वन्ति' इति-पदयोर्वाच्यार्थबाधे विपुलधनानायासोपार्जनयोर्लक्षणायास्तत्प्रकर्षः प्राधान्येन व्यज्यत-इति वाच्याविवक्षया वाक्ये ध्वनिप्रथमप्रकारता; दीपकं तुल्ययोगिता वाऽलङ्कारश्च॥

उनमें अविवक्षित वाच्य ध्वनिका उदाहरण बतलाते हैं—सुवर्णमिति। अत्यन्त पराक्रमी, विद्वान् और चतुर परिचारक, ये तीन पुरुष, पृथ्वीसे सुवर्णपुष्पको चुनते हैं। यहाँ पर शूर, विद्वान् और चतुर सेवक, अनायास ही पुष्कल धनका उपार्जन कर लेते हैं, यह भाव व्यक्त होता है, क्योंकि पृथ्वीसे सुवर्णपुष्पके चयन-का असंभव होने से उक्त पदोंके वाच्यार्थके बाधसे लक्षणाद्वारा विना आयास पर्याप्त धनका उत्तम उपार्जन, व्यञ्जना द्वारा प्रतीत होता है।

विवक्षितान्यपरवाच्यध्वनिमुदाहरति—

द्वितीयस्यापि—

उदाहरणमिति शेषः॥ चाटुकृत् कान्तः प्रेयसीं ब्रूते—

**शिखरिणि क्व नु नाम कियच्चिरं किमभिधानमसावकरोत्तपः।**
**सुमुखि! येन तवाधरपाटलं दशति बिम्बफलं शुकशावकः॥**

हे सुमुखि! असावचिन्त्यभाग्यमहिमा, शुकस्य शावकः शिशुः, क्व नु नाम शिखरिणि कस्मिन् पर्वते, कियच्चिरम्, किमभिधानं किन्नामकम्, तपः अकरोत्? येन तव अधरवत् पाटलं श्वेतरक्तम्, बिम्बस्य तुण्डिकेर्याः फलं दशत्यास्वादय-तीत्यर्थः।

इह श्रीघ्रसिद्धिदानि श्रीशैलादिप्रदेश—देवशरत्सहस्रसमय—पञ्चाग्निप्रभृतिउग्रत-पांसि विना यदा त्वदधरसदृशबिम्बफलस्याप्यास्वादो दुर्लभः, तर्हि का कथा त्वद-धरस्येति व्यङ्ग्यं प्रति वाच्यार्थं उपसर्जनीभूत इति विवक्षितान्यपरवाच्यो ध्वनिः। दंशनमिह निरन्तरास्वादनमात्रम्, नतूदरम्भरिव्यापारः, तावताऽपि तस्य तपोऽति-रेकेण परिणता रसज्ञता, 'कामिनामधरास्वादः सुरतादतिरिच्यते' इत्युक्तेश्चाटुकृतो-ऽधरास्वादसमीहा च पुनः सूच्यते।

युष्मच्छब्दस्य समासघटकत्वे स्वातन्त्र्येण दशनक्रियाऽन्वयिपदार्थोपस्थापकता-विरहाद्विच्छित्तिर्विच्छित्तिमापद्येत। तेन वृत्तौ त्वदादेशे च्छन्दोभङ्गप्रसङ्गः स्यादित्येतावन्मात्रं समासाभावहेतुमिह व्याहरन्तो निरस्ताः।

विवक्षितान्यपरवाच्यध्वनिका उदाहरण देते हैं-शिखरिणीति। खुश मदी नायक प्रेयसीसे कहता है-हे सुमुखि! अत्यन्त भाग्यशाली तोतेके बच्चेने किस पहाड़ पर कितने वर्षों तक कौनसा तप किया, जिससे तेरे अधर जैसे अत्यन्त लाल मीठे बिम्ब फलको बड़ी चावसे चख रहा है। यहाँ पर 'जब तीव्रसे तीव्र तपके बिना तेरे अधरवत् बिम्बफलका भी रसास्वाद दुर्लभ है, तब तेरे अधर पानकी तो बात क्या? अर्थात् पूर्वजन्मका अतिशय पुण्यशाली व्यक्ति ही तेरे अधरपानका सौभाग्यशाली हो सकता है, इस व्यङ्ग्यके सामने उक्त वाच्यार्थका कोई विशेष महत्त्व नहीं रहनेसे गौणत्व हो जाता है।

इत्थं सामान्यनिरूपणानन्तरमापादितपूर्वं ध्वनेर्भाक्तत्वं निराकर्तुमाह—

यदप्युक्तम् 'भक्तिर्ध्वनिरिति, तत्प्रतिसमाधीयते।

शङ्कायाः प्रतिसमाधानं निराकरणम्। ननु पूर्वं 'भाक्तमाहुस्तमन्ये' इत्यनेन ध्वनेर्भाक्तत्वमुक्तम्, नतु भक्तित्वम्, इदानीं पुनरन्यथा कथमनूद्य खण्डयत इति-चेत्, उच्यते, व्युत्पत्तिभेदेन ध्वनिशब्दो हि नानाऽर्थकः। तत्र यदा व्यङ्ग्यार्थकः, तदा भक्तेस्तल्लक्षणतोपलगते क्रमेण प्रदर्श्य 'अतिव्याप्तेरथाव्याप्तेः' इत्यादिनाऽनुपदं खण्डयिष्यते, यदा पुनर्ध्वननव्यापारार्थकः, तदा यद्भक्तितादात्म्यमापादितम्, तदेतत्खण्डयते। तदाचार्यैरप्युक्तम्—'भाक्तश्च ध्वनिश्चेतितादूप्यं लक्षणमुपलक्षण-मिति त्रिविधमपि मतं दूषयति। किं पर्यायवत्ताद्रूप्यम्, अथ पृथिवीत्वमिव पृथिव्या अन्यतोव्यावर्तकधर्मरूपतया लक्षणम्, उत काक इव देवदत्तगृहस्य सम्भव-मात्रादुपलक्षणम्' इति॥

जो भी विद्वान् लक्षणामें ही ध्वनिको गतार्थ करते हैं, वे क्या लक्षणाको ध्वनि का घट-कलशवत् पर्याय मानते, या पृथिवीमें गन्धवत् असाधारण धर्म मानते, या सम्भवमात्रसे परिचायक मानते हैं? इनमें क्रमशः तीनों पक्षका खण्डन करते हैं।

तत्र ताद्रूप्यं खण्डयति—

**भक्त्या बिभर्ति नैकत्वं रूपभेदादयं ध्वनिः।**

विवृणोति वृत्तिकृत्—

**अयमुक्तप्रकारो ध्वनिर्भक्त्या नैकत्वं बिभर्त्ति।**

उक्तप्रकारोऽयं ध्वनिर्भक्त्या भक्तेरेकत्वं ताद्रूप्यं भक्त्या सह वा ताद्रूप्यं न बिभर्ति 'वृद्धो यूना' इत्यादिनिर्देशात्सहशब्दाप्रयोगेऽपि तृतीया। तत्र हेतुमाह—

भिन्नरूपत्वात्।

रूपभेद एव हि घटादीनां पटादिभ्यो भेदक इत्याकूतम्॥

ध्वनिके विलक्षणरूप होनेसे लक्षणा ध्वनि नहीं हो सकती क्योंकि लक्षणासे ध्वनिका स्वरूप ही भिन्न है, और स्वरूपभेद ही एक पदार्थको दूसरे पदार्थसे भिन्न करनेवाला होता है, इसलिये लक्षणा ध्वनि नहीं है।

तमेव रूपभेदं दर्शयितुमादौ ध्वनेः स्वरूपमनुवदति—

**वाच्यवाचकव्यतिरिक्तस्यार्थस्य वाच्यवाचकाभ्यां तात्पर्येण प्रकाशनं यत्र व्यङ्ग्यप्राधान्ये, स ध्वनिः।**

व्यतिरिक्तस्य भिन्नस्य। अर्थस्य व्यङ्ग्यस्य। तात्पर्येण प्रयोजनत्वेन बुबोधयिषया। प्रकाशनं व्यञ्जनया द्योतनम्। अन्यत्स्फुटम्। 'अर्थप्रकाशन' मितिपाठस्त्वर्थशब्दस्य द्विरुपादानादन्वयानुपपत्त्याऽनुपपन्नः॥

जिस व्यङ्ग्य प्रधान काव्यमें वाच्य-वाचकसे अत्यन्त विलक्षण व्यङ्ग्यरूप अर्थका वाच्य-वाचक द्वारा व्यञ्जनावृत्तिसे प्रकाशन हो उसे ध्वनि कहते हैं।

ततो भक्तेःस्वरूपं दर्शयति—

**उपचारमात्रं तु भक्तिः।**

उपचारः शक्यताऽवच्छेदकप्रकारक आरोपो लक्षणा गुणवृत्तिरिति यावत्। तुना ध्वनेर्भेदः, मात्रशब्देन लक्षणाप्रयोजनीभूतव्यङ्ग्यस्याप्राधान्यं च सूच्यते।

यद्यप्युपचारशब्देनाग्रे सादृश्यसम्बन्धमूलिकैव गुणवृत्तिर्ग्रहीष्यते। अन्यत्रापि 'उपचारो नामात्यन्तविशकलितयोः पदार्थयोः सादृश्यातिशयमहिम्ना भेदप्रतीतिस्थगनम्' इत्यनेन गौणलक्षणैवोक्ता। तथापि खण्डनप्रकरणानुरोधेन लक्षणासामान्यपरतयैव तद्व्याख्यानं बोध्यम्। अनेन भक्तेर्व्यङ्ग्यव्यञ्जनातादात्म्यं खण्डितम्, व्यञ्जना तादात्म्यन्तु विस्तरेण तृतीयोद्द्योतेऽपि खण्डयिष्यते॥

लक्षणा तो उपचारमात्र अर्थात् एक आरोपित गौणी वृत्ति है, इस तरह दोनोंका स्वरूप ही भिन्न है, अतः दोनोंकी एकता नहीं हो सकती।

ननु भक्तेस्ताद्रूप्यासम्भवे तल्लक्षणत्वमेव स्वीक्रियेतेति द्वितीयं विकल्पं निराकर्तुं कारिकामवतारयति—

मा चैतत् स्याद् भक्तिर्लक्षणं ध्वनेरित्याह—

**अतिव्याप्तेरथाव्याप्तेर्न चासौ लक्ष्यते तया। १७ ॥**

अतिव्याप्तेरव्याप्तेश्च दोषात्, तया भक्त्या, असौ ध्वनिर्न लक्ष्यत इत्यर्थः ॥

एवं वक्ष्यमाण प्रकार अतिव्याप्ति-अव्याप्ति दोष लगनेसे लक्षणा को ध्वनिका असाधारण लक्षण ( चिह्न ) भी नहीं कह सकते।

क्रमेण विवृणोति वृत्तिकृत्—

**न च भक्त्या ध्वनिर्लक्ष्यते ।**

प्रतिज्ञानिर्देशोऽयम् ॥

वृत्तिकार उक्त बातको स्पष्ट करते हैं—न चेति। लक्षणासे ध्वनि लक्षित नहीं हो सकती।

तत्र हेतुं पृच्छति—

**कथम् ॥**

उत्तरयति—

**अतिव्याप्तेरव्याप्तेश्च ॥**

क्योंकि अतिव्याप्ति और अव्याप्ति दोष लगता है।

उद्देशानुसारं पूर्वमतिव्याप्तिं दर्शयति—

**तत्रातिव्याप्तिः, ध्वनिव्यतिरिक्तेऽपि विषये भक्तेः सम्भवात् ।**

तत्र तयोर्मध्ये अतिव्याप्तिर्लक्षणस्य लक्ष्यताऽवच्छेदकसामानाधिकरण्यविशिष्ट-लक्ष्यताऽवच्छेदकावच्छिन्नप्रतियोगिताकभेदसामानाधिकरण्यम् । सा च ध्वन्यविषये वक्ष्यमाणलक्ष्ये ध्वनिलक्षणतयाऽभिमताया भक्तेः सम्भवात्समन्वयाद् बोध्या ॥

केवल लक्ष्यमात्रमें रहनेवाला धर्म ही निर्दुष्ट लक्षण होता है, परन्तु लक्षणा तो ध्वनिसे भिन्न विषयमें भी देखी जाती है, इसलिये अलक्ष्यमें भी रहनेसे ध्वनि लक्षणके तात्पर्यसे अभिमत लक्षणामें अतिव्याप्ति दोष स्पष्ट प्रतीत होता है।

तामेवोपपादयति—

**यत्र हि व्यङ्ग्यकृतं महत् सौष्ठवं नास्ति, तत्राप्युपचरितशब्दवृत्त्या प्रसिद्ध्यनुरोधप्रवर्तितव्यवहाराः कवयो दृश्यन्ते ।**

हि यतः, यत्र येषु वक्ष्यमाणभक्त्युदाहरणेषु, व्यङ्ग्यकृतं महत् सौष्ठवं चारुत्वं नास्ति। तत्रापि, उपचरिताऽऽरोपिता या शब्दवृत्तिर्लक्षणा, तया, प्रसिद्धेः रूढेः

अनुरोधेन, प्रवर्तितो व्यवहारश्शब्दप्रयोगरूपव्यापारो यैस्तादृशाः, कवयो दृश्यन्ते, तस्माद्भक्तिर्न ध्वनेर्लक्षणमित्यन्वयः ।

इदमुक्तम्भवति—

'नान्ध्रीपयोधर इवातितरां प्रकाशो, नो गुर्जरीस्तन इवातितरां निगूढः ।।

अर्थो गिरामपिहितः पिहितश्च शश्वत्, सौभाग्यमेति मरहट्ठवधूकुचाभः ।।

इत्यभियुक्तोक्तेरीषद्गूढस्यैव व्यङ्ग्यस्य चारुतानिर्धारणेऽपि चमत्कारिणं व्यङ्ग्यं व्यङ्ग्यसामान्यं वाऽनपेक्ष्य रूढिमात्रमनुरुन्धानैः कविभिः प्रयुज्यमानेषु 'कलिङ्गः साहसिकः' श्वेतो धावति' 'मञ्चाः क्रोशन्ति' इत्यादिषु ध्वनेरलक्ष्येष्वपि गुणवृत्ते-रुपलम्भादतिव्याप्तेर्जागरूकतया नैव गुणवृत्तिः कदाचन ध्वनेर्लक्षणम् ।

वृत्तिकार उसीको व्यक्त करते हैं—यत्रेति । 'मञ्चाः क्रोशन्ति' 'कलिङ्गः साह-सिकः' श्वेतो धावति' इत्यादि स्थलोंमें व्यङ्ग्यार्थ कृत चारुत्व नहीं होने पर भी प्रसिद्धिवश आरोपित शब्दवृत्तिलक्षण द्वारा मञ्चस्थ पुरुष आदि बोधनार्थ, प्रयुक्त कवियोंके वाक्यसे अतिव्याप्ति लगनेके कारण लक्षणा ध्वनिका लक्षण नहीं है ।

अथ भक्त्युदाहरणानि स्वपक्षं द्रढयितुं दर्शयति—

यथा—'परिम्लानं पीनस्तनजघनसङ्गादुभयत-
स्तनोर्मध्यस्यान्तः परिमलनमप्राप्य हरितम् ।
इदं व्यस्तन्यासं श्लथभुजलताऽऽक्षेपवलनैः,
कृशांगयाः सन्तापं वदति बिसिनीपत्रशयनम् ।।'

कृशाङ्ग्या वियोगव्यलीकेन तनुगात्र्याः, पीनस्य पीवरस्य, स्तनजघनस्य कुचयोः श्रोणिपुरोभागस्य, च सङ्गात् सम्पर्कात्, उभयत ऊर्ध्वमधश्च स्थानद्वये, परि-म्लानं तदीयतापभाराभ्यामतिम्लानम्, तथा तनोः कृशस्य, मध्यस्यावलग्नस्य परिम-लनं धारणं गाढसम्बन्धमिति यावत्, अन्तर्मध्ये, अप्राप्य, हरितं पालाशवर्णम्, तथा श्लथयोः सन्तापातिशयेन शिथिलयोः भुजलतयोः, आक्षेपाणां वेदनाधिक्यादितस्ततो न्यासानां, वलनैर्विधानैः, व्यस्तो विपर्यस्तो न्यासो रचना यस्य, तत्, इदं पुरोवर्त्ति, बिसिनीपत्रशयनं नलिनीदलतल्पम्, ( तस्याः ) सन्तापं वदति स्फुटीकरोतीत्यर्थः ।

इह धारणार्थकान्मलधातोर्ल्युटि मलनमिति । मिलतेः कुटादित्वाभावान्मिलन-मिति पाठस्त्वसंगतः । तल्पस्य व्यक्तवागुच्चारणकर्तृत्वासम्भवाद्वदतेः स्फुटीकरणे ल-क्षणा । सा च प्रयोजनविरहाद् रूढिमूलकैव । प्रयोजनस्य कल्पने तत्कल्पनेऽप्यचमत्का-

रितया न ध्वनिः किन्तु भक्तिरेवेति न तयोर्लक्ष्यलक्षणभावः। एवमेवोदाहरणान्तरेष्वपि बोध्यम्।

ध्वनि पक्षके दार्ढ्यार्थ मुख्य व्यङ्ग्य रहित लक्षणाका उदाहरण देते हैं—यथेति। अत्यन्त स्थूल कुच और नितम्ब-भारके सम्पर्कसे ऊपर-नीचे परिमर्दित होने पर भी पतली कमरके हलकेपनसे बीच भागमें नहीं दबा हुआ कुछ हरा सा और अधिक वेदनावश शिथिल भुजलताओंके इधर-उधर विक्षेपसे अस्त-व्यस्त बिखरा हुआ कमलिनी-पत्तोंका शयनास्तरण ही विरहिणीकी विरह वेदनाको कह रहा है, यहाँ-पर अचेतन शय्याके कथनका बोध होनेसे 'वद' धातु स्फुट अर्थमें लाक्षणिक समझा जाता है। व्यङ्ग्यकी कुछ झलक सी होने पर भी मुख्यतया रमणीयता नहीं प्रतीत होती, अतः इसे (लक्षणाको) ध्वनिके साथ लक्ष्यलक्षण भाव नहीं हो सकता।

द्वितीयमुदाहरण दर्शयति—

तथा—'चुम्बिज्जइ सअहुत्तं अवरुन्धिज्जइ सहस्सहुत्तम्मि।
विरमिअ पुणो रमिज्जइ पिओ जणो णत्थि पुनरुत्तम्॥'

'चुम्ब्यते शतकृत्वोऽवरुध्यते सहस्रकृत्वः॥
विरम्य पुना रम्यते प्रियो जनो नास्ति पुनरुक्तम्॥' इतिच्छाया।

प्रियो जनः, शतकृत्वः शतं वारान्, प्रियेण जनेन, चुम्बयते, सहस्रकृत्वोऽवरुध्यत उपगूह्यते, विरम्य विश्रम्य, पुनः सुरतानन्तरमपि, रम्यते। (तत्र) पुनरुक्तं पिष्टपेषणवत्कृतकरणं नास्तीत्यर्थः। शब्दस्यैवोक्तिकर्मत्वाच्चुम्बनादिक्रियासु पुनरुक्तत्वासम्भवात्पुनरुक्तपदस्य पुनः कृते लक्षणा।

दूसरा उदाहरण बतलाते हैं—तथेति। रसिक नायक, सरस नायिकाको सैकड़ों बार चूमता है, हजारों बार आलिङ्गन करता है, बीचमें रुक-रुककर बार-बार संभोग करता, फिर भी पुनरुक्त (चर्वित-चर्वण) जैसा फीका और व्यर्थ नहीं मालूम पड़ता, बल्कि उत्तरोत्तर रसास्वाद ही होता है। जहाँ पर शब्दके ही उच्चारणका कर्म होनेसे बार-बार उच्चारणार्थ पुनरुक्त पद चुम्बनादिमें बाधित होकर पुनः पुनः करना अर्थमें लाक्षणिक माना गया है, और अधिक फलशालित्व रूप व्यङ्ग्यकी चारुता प्रतीत नहीं होती है, अतः लक्षणासे बिलकुल परे ही ध्वनिका विषय जान पड़ता है।

तृतीयमुदाहरणं दर्शयति—

तथा—'कुविआओ पसन्नाओ ओरण्णमुहीओ विहसमाणाओ।
जह गहिओ तह हिअअं हरन्ति उच्छिन्तमहिलाओ॥'

'कुपिताः प्रसन्ना अवरुदितमुख्यो विहसन्त्यः ॥
यथा गृहीतास्तथा हृदयं हरन्ति स्वैरिण्यो महिलाः ॥' इतिच्छाया ।

स्वैरिण्यः पुंश्चल्यो महिलाः कुपिताः क्रुद्धाः, प्रसन्ना हृष्टाः, अवरुदितमुख्यः सरुदितवदनाः, यथा कुपितत्वादिना येन प्रकारेण, गृहीता ज्ञाता विलोकिता इति यावत्, तथा हृदयं विलोकयितुर्मनः हरन्ति वशीकुर्वन्तीत्यर्थः ।

इह हरतेर्वशीकृतौ भक्तिर्मनसो मूर्त्यभावेन हरणकर्मत्वासम्भवात् । यत्तु कश्चिदाह—'ग्रहणेनोपादानं लक्ष्यते' इति, तन्न, गृह्णातेरुपादानेऽभिधाया एव सत्त्वात्, उपादानरूपार्थस्यात्राविवक्षितत्वाच्च ॥

लक्षणाका तीसरा उदाहरण देते हैं—तथेति । स्वैरिणी महिलायें कुपित हों या प्रसन्न, रोती जैसी हों या हँसती हुई हों, किसी भी रूपमें देखी जाने पर युवजनके मन को हाव-भाव द्वारा वशमें कर लेती हैं । यहां पर मनका कोई ठोस (स्थूल) रूप नहीं होनेसे हरण नहीं हो सकता, अतः वशीकरण अर्थमें हृधातुकी लक्षणा की गयी है और वाच्यकी अपेक्षा अत्यन्त विवशतारूप व्यङ्ग्यार्थ सहृदयोंको श्लाघनीय नहीं प्रतीत होता है ।

चतुर्थमुदाहरणं दर्शयति—

तथा—'अज्जाएँ पहारो णवलदाए दिण्णो पिएण थणवट्टे ।
मिउओ वि दूसहो च्चिअ जाओ हिअए सवत्तीणम् ॥'

'कनिष्ठभार्यायाः प्रहारो नवलतया दत्तः प्रियेण स्तनपृष्ठे ।
मृदुकोऽपि दुस्सह इव जातो हृदये सपत्नीनाम् ॥' इतिच्छाया ॥

कनिष्ठा चासौ भार्या कनिष्ठभार्या, तस्या यवीयःपत्न्याः, स्तनपृष्ठे कुचोपरि प्रियेण, नवलतया, मृदुकोऽप्यल्पतया सुसहोऽपि, दत्तो विहितः, प्रहार आघातः सपत्नीनां हृदये दुस्सह इव जात इत्यर्थः ।

इह कनिष्ठत्वं वयसैव विवक्षितं नतु प्रेम्णा । यवीयस्यां प्रेमप्रकर्षसूचकतया प्रहारस्य सपत्नीहृदयदुस्सहत्वम् । स्वसत्त्वनिवृत्तिपूर्वकपरसत्त्वोत्पत्त्यनुकूलव्यापारस्य ददातेर्मुख्यार्थस्य बाधितत्वाद् विधाने लक्षणा । व्यङ्ग्यार्थादपि विभावना-विशेषोक्ति-सङ्करासङ्गत्युत्प्रेक्षाणां वाच्यालङ्काराणामेव चमत्कारितया प्राधान्यम् ॥

चौथा उदाहरण बतलाते हैं—तथेति । प्रियनायकने अपनी छोटी प्रेयसीके स्तन पर हास्यरस क्रीडामें हलकासा कोमल प्रहार किया, किन्तु, वह कोमल प्रहार भी सौतके दिलमें असह्यरूपसे खटका । यहां पर दा धातुसे प्रहार दान

अर्थ के बाध होनेसे कृतार्थ करना अर्थ लक्षित होता है और सुखोपभोगात्मक व्यङ्ग्यकी अपेक्षा, आहत व्यक्तिसे भिन्न व्यक्तिको ही चोट लगना, मृदु होनेपर भी दुस्सह सौतको बिना प्रहारके चोट लगना, प्रेयसीको प्रहार करने पर भी चोट न लगना, इत्यादि विलक्षण अर्थोंके बोधसे असंगति-विरोध-विभावना-विशेषोक्ति-उत्प्रेक्षा रूप वाच्यालंकार ही विदग्धजनोंको अधिक चमत्कारशाली प्रतीत होते हैं।

पञ्चममुदाहरणमाह—

तथा—'परार्थे यः पीडामनुभवति भङ्गेऽपि मधुरो
यदीयः सर्वेषामिह खलु विकारोऽप्यभिमतः।
न सम्प्राप्तो वृद्धिं यदि स भृशमक्षेत्रपतितः
किमिक्षोर्दोषोऽयं न पुनरगुणाया मरुभुवः॥

यो भङ्गे खण्डने पराभवेऽपि च मधुरो माधुर्यगुणमाग्रम्यशीलश्च, परार्थे परेषां प्रयोजनं उपकारे च, पीडां यन्त्रनिष्पीडनं क्लेशं च अनुभवति लभते प्रत्यक्षीकरोति च। यदीयो विकारो वैकृतं गुडादिहानिश्च, इह खलु सर्वेषामभिमतः प्रियो भवति। स इक्षुः सज्जनश्च, अक्षेत्र ऊषरकेदारे कुस्थाने च, पतितः प्राप्तः, यदि वृद्धिं पुष्टिमुन्नतिञ्च न सम्प्राप्तः तर्हि, असौ किम् ? इक्षोः सज्जनस्य च दोषः, अगुणाया गुणशून्यायाः, मरुभुवो दुरास्पदस्य च पुनर्न दोषः अपितु तदीय एव दोष इत्यर्थः।

अत्राप्रस्तुतेक्षुप्रशंसामनुबध्नता कविना प्रस्तुतसज्जनबुबोधयिषयोपात्तस्यानुभवस्य जड इक्षावन्वयबाधाल्लाभे वहने वाऽनुभवतेर्लक्षणा॥

पाचवाँ उदाहरण देते हैं—तथेति। जो ईख (गन्ना) परोपकारार्थ यन्त्रद्वारा कुचले जानेपर अत्यन्त पीडाका अनुभव करता हुआ भी मिठास नहीं छोड़ता, और जिसका गुड़ आदि विकार भी सर्वप्रिय होता है, वह यदि ऊसरभूमिमें पड़कर उन्नत नहीं हो पाता तो इसमें उसका क्या दोष है, यह तो मरुभूमिका ही दोष है, एवं जो महान् पुरुष, परोपकारार्थ कष्ट झेलते हुए पराभवमें भी मधुर ही बने रहते और जिनकी हानि भी बहुतोंको अच्छी ही लगती है, वे (महान् पुरुष) यदि कुसङ्गतिसे उन्नति नहीं कर पाते तो, इसमें उनका क्या दोष है, यह तो कुसङ्गति का ही दोष है, यहाँ पर अचेतन ईखमें दुःख-पीडानुभव बाधित होकर मर्दन-प्राप्ति अर्थको लक्षित करता है। अप्रस्तुत-प्रशंसाद्वारा महात्मामें अनुभवके अबाधित होने पर भी ईखमें लक्षणा बिना निर्वाह नहीं हो सकता।

तदाह—

इत्यत्रेक्षुपक्षेऽनुभवतिशब्दः ।

लाक्षणिक इति शेषः ।

उक्त उदाहरणमें ईख पक्षमें 'अनुभवति' शब्द मर्दन प्राप्ति अर्थमें लाक्षणिक माना गया है ।

नन्वेतादृशस्थले सप्रयोजनाया अपि लक्षणायाः सम्भवाद् व्यङ्ग्यसद्भावान्न कथं ध्वनिरित्यतोऽभिधत्ते—

**न चैवंविधः कदाचिदपि ध्वनेर्विषयोऽभिमतः ।**

इन पूर्वोक्त स्थलोंमें चमत्कारजनक अत्यन्त रमणीय वाच्यार्थकी अपेक्षा रमणीय व्यङ्ग्यार्थके न होनेसे किसी भी तरह ध्वनि व्यवहारका विषय नहीं प्रतीत होता है ।

तत्र हेतुमाह —

यतः—

(१८) **उक्त्यन्तरेणाशक्यं यत् तच्चारुत्वं प्रकाशयन् ।**
**शब्दो व्यञ्जकतां बिभ्रद् ध्वन्युक्तेर्विषयीभवेत् ॥ १८ ॥**

यच्चारुत्वं चमत्कारः, उक्त्यन्तरेण ध्वन्यतिरिक्तशब्देन, अशक्यं प्रकाशयितुमिति शेषः तच्चारुत्वं प्रकाशयन् शब्दः शब्दनाख्यव्यापारभाक् पूर्वोक्तः शब्दादिः- ध्वन्युक्तेर्विषयीभवेद् ध्वनिशब्दवाच्यः स्यादित्यर्थः ।

क्योंकि जिस अलौकिक रमणीयताको प्रकट करनेमें ध्वनिसे भिन्न शब्द बिलकुल समर्थ न हो, उस (अलौकिक रमणीयता) को द्योतित करनेवाला कोई निराला ही विरल शब्द व्यञ्जक रूपमें ध्वनिपदसे व्यवहृत होता है ।

कारिकार्थं प्रकृत उपयोजयति—

**अत्र चोदाहृते विषये नोक्त्यान्तराशक्यचारुत्वव्यक्तिहेतुः शब्दः ।**

यत उक्तोदाहरणघटका वदतीत्यादिशब्दा अगूढत्वादनादरणीयं व्यङ्ग्यं तादृशमेव प्रकाशयन्ति, यादृशं तद्वाक्यघटकोऽपरोऽपि शब्दः प्रकाशयितुं शक्नुयात्, अतो व्यङ्ग्यस्य तत्र चारिमप्रकर्षाभावान्न ध्वनिविषयतेत्याशयः ॥

उक्त उदाहरणोंमें शब्दान्तरसे अगम्य अनिर्वचनीय आह्लादका व्यञ्जक शब्द नहीं है, क्योंकि, कामिनीकुचकलशवत् किञ्चित् गूढ अगूढ व्यङ्ग्य ही अधिक चमत्कारजनक होता है । प्रकृतमें तो उक्त व्यङ्ग्यार्थके अत्यन्त प्रकट होनेसे श्लाघ-

नीयत्व प्रतीत नहीं होता और उसको 'वदति' आदिके समान अन्य शब्द भी प्रकाशित कर सकता है।

एवं सप्रयोजनलक्षणास्थलाद्ध्वनिं निरस्य, रूढिहेतुकलक्षणास्थलादपि निरसितुमाचष्टे—

किञ्च—

(१९) **रूढा ये विषयेऽन्यत्र शब्दाः स्वविषयादपि।**
**लावण्याद्याः प्रयुक्तास्ते न भवन्ति पदं ध्वनेः॥ १९॥**

ये लावण्याद्या लावण्य–सब्रह्मचारि–सोदर–प्रभृतयः, शब्दाः स्वविषयादात्मवाच्यर्थाल्लवणभाव–समानशाखाऽध्यायि–समानोदरकादिरूपाद्, अन्यत्रान्यस्मिन्, द्युतिविशेषतुल्यादिरूपे विषयेऽर्थे लक्ष्ये रूढाः प्रसिद्धाः प्रयुक्ताः, ते ध्वनेः पदमाश्रयो न भवन्तीत्यर्थः

ध्वनिपदमिह चमत्कारातिशयशालिव्यङ्ग्यपरम्। तद्विरहादेव ध्वनित्वाभावः।

उक्त रीतिसे प्रयोजनमूलक लक्षणास्थलमें, प्रयोजनरूप व्यङ्ग्यके होने पर भी चमत्कारजनक नहीं होनेसे ध्वनि विषयका खण्डन कर, रूढिमूलक लक्षणास्थलमें भी ध्वनि विषयका खण्डन करते हैं—किञ्चेति। जो भी लावण्यादि शब्द, लवणत्वादि वाच्यार्थसे भिन्न, अनुपम सौन्दर्य (कान्ति) अर्थमें रूढिमूलक लक्षणा द्वारा प्रयुक्त हुए हैं, वे भी ध्वनिके विषय नहीं हो सकते, क्योंकि निरूढ लक्षणा में व्यङ्ग्य का लेशमात्र भी भान नहीं होता है।

नन्वेवम् 'लावण्यकान्तिपरिपूरितदिङ्मुखेऽस्मिन्, स्मेरेऽधुना तव तरलायताक्षि!
क्षोभं यदेति न मनागपि तेन मन्ये, सुव्यक्तमेव जलराशिरयं पयोधिः॥'

इत्यादौ लावण्यशब्दप्रयोगसद्भावाद्रूपकध्वनिर्न स्यादित आह—

**तथाविधे च विषये क्वचित् सम्भवन्नपि ध्वनिव्यवहारः प्रकारान्तरेण प्रवर्तते, न तु तथाविधशब्दमुखेन।**

क्वचिदुक्तपद्यादौ, तथाविधे लावण्यादिशब्दभाजि, विषये स्थले, सम्भवन्नपि ध्वनिव्यवहारो रूपकादिध्वनिव्यपदेशः, प्रकारान्तरेण रूपकव्यञ्जकवाच्यमहिम्ना प्रवर्त्तते, न तु तथाविधशब्दमुखेन लावण्यादिशब्दद्वारेणेत्यर्थः।

अन्वयव्यतिरेकविरहाल्लावण्यादिलाक्षणिकशब्दप्रयोज्यो न ध्वनिव्यपदेश इति सारम्॥

कहीं लावण्यादि प्रयोग स्थलमें रूपकादि ध्वनिका व्यवहार भी, रूपकालंकार-व्यन्जक वाच्यकी मर्यादासे ही होता है, लावण्यादि शब्द द्वारा नहीं होता, जैसे-एक नायक नायिकासे कहता है—हे प्रिये! लावण्य-कान्तिसे दिशा के भागको प्रकाशित करनेवाले, तुम्हारे मुख की मुस्कराहट होने पर भी जो वह समुद्र थोड़ा भी नहीं उछलता, इससे मैं मानता हूँ कि जल (जड) राशि होनेसे वास्तवमें जड ही है वह। यहाँ पर उक्त वाच्यकी महिमासे ही नायिकाके मुखमें चन्द्रत्वारोप और लकार-डकारमें एकत्व होनेसे समुद्रमें जड पुरुषत्वारोप द्वारा ही ध्वनि प्रतीत होती है, लावण्य शब्दसे नहीं।

लक्षणासामग्रीविरहादपि गुणवृत्तिर्व्यङ्ग्यमवगमयितुं न प्रभवतीत्याह—

अपिच—

(20) **मुख्यां वृत्तिं परित्यज्य गुणवृत्त्याऽर्थदर्शनम्।**
**यदुद्दिश्य फलं, तत्र शब्दो नैव स्खलद्गतिः॥ २०॥**

यद्व्यङ्ग्यं, फलं प्रयोजनम्, उद्दिश्याभिप्रेत्य बोधयितुमिति शेषः, मुख्यामभिधां-वृत्तिं परित्यज्य विहाय परिसमाप्य वा, गुणवृत्त्या लक्षणया, अर्थस्य लक्ष्यस्य दर्शनं प्रकाशनं विधियते। प्रयोजने बोधनीये शब्दः स्खलद्गतिर्बोधनासमर्थो नैवेत्यर्थः।

लक्षणा स्वसामग्री (मुख्यार्थबाध)के अभाव होनेसे भी ध्वनिको नहीं कह सकती क्योंकि जिस व्यङ्ग्य प्रतीतिके लिए अभिधाको त्यागकर लक्षणासे लक्ष्यार्थका बोध किया जाता है, उस व्यङ्ग्यके बोधके लिए प्रयुक्त शब्द बाधित नहीं देखा गया है, अर्थात् मुख्यार्थका बाध ही लक्षणाका बीज है, उसके बिना लक्षणा नहीं होती, किन्तु ध्वनिस्थलमें मुख्यार्थ बाधके बिना भी व्यङ्ग्यका बोध होता है, जैसे 'गंगामें झोपड़ी' कहनेसे लक्ष्यार्थ तटकी अपेक्षा ही बाध प्रतीत होता है, शैत्यपावनत्वादि व्यङ्ग्यकी अपेक्षा वाच्यार्थका बाध प्रतीत नहीं होता, और दोनों (लक्षणा और व्यन्जना)के 'तट-शैत्य-पावनत्वादि' भिन्न-भिन्न विषय होनेसे भी पार्थक्य सिद्ध है।

तदाह वृत्तिकृत्—

**तत्र हि चारुत्वातिशयविशिष्टार्थप्रकाशनलक्षणे प्रयोजने कर्तव्ये यदि शब्दस्यामुख्यता, तदा तस्य प्रयोगे दुष्टतैव स्यात्।**

तत्र चारुत्वातिशयविशिष्टस्य व्यङ्ग्यस्यार्थस्य, प्रकाशनलक्षणे बोधजननरूपे प्रयोजने कार्ये, यदि शब्दस्य, अमुख्यता गौणता बाधितार्थत्वमिति यावत् स्यात्, तदा तस्य शब्दस्य प्रयोगे दुष्टतैव दोषएव स्यादित्यर्थः॥

यदि अतिशय चमत्कारशाली व्यङ्ग्यार्थ बोध जननार्थ, बाधितार्थक लाक्षणिक शब्द प्रयुक्त हों तो, तदर्थ उसका प्रयोग करना ही व्यर्थ हो जाय, क्योंकि उक्त युक्तिसे बाधितार्थक शब्द, व्यङ्ग्यार्थका बोध नहीं करा सकता।

वक्तव्यमभिधत्ते—

न चैवम्। तस्मात्।

एवं व्यङ्ग्यार्थे बोधनीये मुख्यार्थबाधो यतो नैव भवति। तस्मात्सामग्रीविरहा-ल्लक्षणा नैव ध्वनेर्लक्षणमित्यर्थः।

वाच्यार्थबाधो वाच्यार्थसम्बन्धो रूढिप्रयोजनान्यतरच्चेति त्रितयस्य—

'मुख्यार्थबाधो तद्योगे रूढितोऽथ प्रयोजनात्।
अन्योऽर्थो लक्ष्यते यत्सा लक्षणाऽऽरोपिता क्रिया॥'

इतिमम्मटेन कारणत्वे 'गङ्गायां घोषः' इत्यादौ लक्ष्ये तीर एव बोधनीये वाक्यान्वयबाधः, नतु शैत्यातिशयलक्षणे व्यङ्ग्ये प्रयोजने बोधनीये। तस्मात् प्रयोजनबुबोधयिषायामुक्तसामग्रीविरहान्न लक्षणा प्रसरतीति ध्वनिः कुतो लक्षणया लक्ष्येतेत्याकूतम्॥

क्योंकि व्यङ्ग्यार्थ बोधस्थलमें मुख्यार्थका बाध नहीं रहता है, इसलिये स्वसामग्री–विरहसे भी लक्षणा ध्वनिका लक्षण नहीं हो सकती।

भक्तेर्ध्वनिलक्षणत्वं पुनरन्यथा खण्डयति—

(२१) **वाचकत्वाश्रयेणैव गुणवृत्तिर्व्यवस्थिता।**
**व्यञ्जकत्वैकमूलस्य ध्वनेः स्याल्लक्षणं कथम्॥ २१॥**

वाचकत्वाश्रयेणैव व्यवस्थिताऽभिधापुच्छभूतत्वात्तामेवावलम्ब्योदिता गुणवृत्तिर्लक्षणा व्यञ्जकत्वैकमूलस्य व्यञ्जनामात्रगम्यस्य ध्वनेर्लक्षणं बोधकारणं कथं स्यादित्यर्थः।

व्यञ्जनैव व्यङ्ग्यं बोधयितुमीष्टे नतु लक्षणा, सा तु स्वयमेवाभिधाऽऽश्रितत्वा-दस्वतन्त्रेत्यभिप्रायः। तथा चोक्तम्—'अभिधेयाविनाभूतप्रतीतिर्लक्षणोच्यते' इति॥

दूसरे ढङ्गसे भी लक्षणामें ध्वनि लक्षणत्वका खण्डन करते हैं—वाचकेति। अभिधाका आलम्बन कर व्यवस्थित होनेवाली लक्षणावृत्ति, व्यञ्जनावृत्ति मात्रगम्य ध्वनिका लक्षण कैसे हो सकती है? क्योंकि वह स्वयं ही अभिधाके आश्रित होनेसे परतन्त्र है इसलिये व्यञ्जना ही व्यङ्ग्य बोधजननमें समर्थ है, लक्षणा नहीं।

पर्यवसितमाह—

तस्मादन्यो ध्वनिरन्या च गुणवृत्तिः।

तस्मात्स्वरूपसामग्रीकार्यादिभेदाद्ध्वनेर्भक्त्या भेद इत्यर्थः ।।

इसलिये लक्षणा और ध्वनि अलग अलग वस्तु है।

भक्तेर्ध्वनिलक्षणत्वं निरस्यन्नेवमतिव्याप्तिं प्रदर्श्याव्याप्तिं प्रदर्शयति—

**अव्याप्तिरप्यस्य लक्षणस्य ।**

भक्तेर्ध्वनिलक्षणत्वे 'लक्ष्यताऽवच्छेदकसामानाधिकरण्यविशिष्ट-लक्ष्यताऽवच्छेदकसमानाधिकरणात्यन्ताभावप्रतियोगित्वरूपा'ऽव्याप्तिरप्यापद्येत । अपिरतिव्याप्तिमपि सङ्गृह्णाति ।

लक्षणाको ध्वनिका लक्षण माननेमें निम्न प्रकार अव्याप्ति दोष भी लगता है।

तामेवोपपादयति—

**नहि ध्वनिप्रभेदो विवक्षितान्यपरवाच्यलक्षणः, अन्ये च बहवस्तद्भेदप्रकारा भक्त्या व्याप्यन्ते ।**

सन्दर्भशुद्धेरभावेऽपि कथञ्चिद्व्याख्यायते—ध्वनेर्विवक्षितान्यपरवाच्यलक्षणः प्रकारः, अन्ये च बहवस्तद्भेदप्रकारा असंलक्ष्यक्रमभेदप्रभेदा रसभावादिध्वनयः, नहि भक्त्या व्याप्यन्त इत्यन्वयः ।

भक्तिर्नाम ध्वनेर्लक्षणं तदा स्यात्, यदि सर्वत्र ध्वनिभेदेषु भक्तिस्तिष्ठेत् । तदेव तु नास्ति, तथाहि-केवलमविवक्षितवाच्ये ध्वनिभेदे वाच्याविवक्षया भक्तेः सञ्चारेऽपि, विवक्षितान्यपरवाच्यादावसम्भवादव्याप्तिः स्फुटैवेत्यभिसन्धिः ।।

पृथिवीमें गन्धकी भाँति लक्ष्यमात्रमें रहनेवाला धर्म ही निर्दुष्ट लक्षण होता है इसलिए अभिधामूलक विवक्षितान्यपरवाच्य एवं तद्विशेष असंलक्ष्यक्रमव्यङ्ग्यादि ध्वनि विशेषमें लक्षणाका संचार नहीं होनेसे लक्ष्यैकदेशमें अवृत्तित्वरूप अव्याप्ति दोष लगता है।

अनुगमयति—

**तस्माद्भक्तिरलक्षणम् ।**

तस्मादतिव्याप्त्यव्याप्तिदोषापाताद् भक्तिर्ध्वनेः, अलक्षणम् । लक्षणं नेत्युचितम्, प्रसज्यप्रतिषेधीयनञ एव क्रियान्वयिप्रधानाभावबोधकत्वनियमात्, समासे पर्युदासत्वसम्भवाच्च । तदुक्तम्—

> 'अप्राधान्यं विधेर्यत्र प्रतिषेधे प्रधानता ।
> प्रसज्यप्रतिषेधोऽसौ क्रियया सह यत्र नञ् ।।'

'प्रधानत्वं विधेर्यत्र प्रतिषेधेऽप्रधानता ।
पर्युदासः स विज्ञेयो यत्रोत्तरपदेन नञ् ॥' इति ॥

उक्त-अतिव्याप्ति अव्याप्ति दोष लग जानेसे लक्षणा ध्वनिका असाधारण धर्म रूप लक्षण नहीं हो सकती है ।

इदानीं भक्तेर्ध्वनितादात्म्यलक्षणत्वे निरस्य, तदुपलक्षणत्वमपि निरसितुं सम्भावयति-

**कस्यचिद् ध्वनिभेदस्य सा तु स्यादुपलक्षणम् ।**

कस्यचिदविवक्षितवाच्यस्य ( न तु सर्वस्य ) ध्वनिभेदस्य, उपलक्षणं काक इव-देवदत्तमन्दिरस्य कादाचित्कबोधकारणं, तु सा गुणवृत्तिः स्यात् सम्भाव्येतेत्यर्थः ॥

लक्षणाको ध्वनिका उपलक्षण माननेमें ध्वनि पक्षका खण्डन न होनेसे, इष्टापत्ति द्वारा उसका समर्थन करते हैं-कस्यचिदिति । यदि देवदत्त गृहके परिचायक काकके समान, अविवक्षितवाच्यात्मकलक्षणामूलक ध्वनि विशेषका, सम्भवमात्रसे लक्षणा उपलक्षण भी हो तो, प्रकृतमें कोई क्षति नहीं होती, क्योंकि लक्षणाको उक्त, ध्वनि-विशेषका पहचानमात्र होनेसे ध्वनि लक्षणासे गतार्थ नहीं हो सकती ।

विवृणोति वृत्तिकृत्—

**सा पुनर्भक्तिर्वक्ष्यमाणप्रभेदमध्यादन्यतमस्य भेदस्य यदि नामोपल-क्षणतया सम्भाव्येत ।**

तदाऽपि न ध्वनिपक्षावलम्बिनां काचनक्षतिरिति योजनीयम् । यदि नाम भक्ति-रविवक्षितवाच्यरूपध्वनिभेदस्य बोधं जनयेत्, तर्हि जनयतु, न तावता भक्तिः कृतार्था, व्यञ्जना वा गतार्था, भक्तेस्तदितरभेदबोधजनकत्वाभावादित्याशयः ॥

जैसे देवदत्त गृहका उपलक्षण होने पर भी कौआ गृहमात्रका साधारण लक्षण नहीं होता, वैसे ही ध्वनि विशेषके उपलक्षक होने पर भी लक्षणा, ध्वनिमात्रकी बोधक नहीं हो सकती, क्योंकि उपलक्षणात्मक वस्तु लक्ष्यमात्रमें नहीं रहनेसे तन्मात्रबोधक नहीं होती है ।

ननूपलक्षणात्मकभक्तिद्वारेणैव सर्वेषां ध्वनिप्रकाराणामवगमः स्यात्, किन्तल्लक्षण-विधानेनेत्याक्षेपं क्षपयति—

**यदि च गुणवृत्त्यैव ध्वनिर्लक्ष्यत इत्युच्यते, तदभिधाव्यापारेणैव तदितरोऽलङ्कारवर्गः समग्र एव लक्ष्यत इति प्रत्येकमलङ्काराणां लक्षणक-रणे वैयर्थ्यप्रसङ्गः ।**

असुसङ्गतोऽपि सन्दर्भः कथञ्चिद्व्याख्यायते। प्राचीनमतश्रद्धाजाड्येन भक्तिर्यदि ध्वनिलक्षणं स्वीक्रियते, तदाऽपि न निर्वाहः। नैव सा सर्वान्ध्वनीनवगमयितुमीष्टे, न वा व्यञ्जनाकार्यभारं वोढुम्। इतरथाऽलंकारसामान्यवाचकपदादेवाभिधया सर्वेषामलंकारत्वसामान्येनावगमे जाते, तत्तदलंकारविशेषाणामपि लक्षणविधानमेवमेव वृथा स्यात्। सामान्यतयाऽवगतस्यापि विशेषेणावगमाय लक्षणं विधीयते। नहि प्रमेयत्वेनावगतं घटं घटत्वेनावगमयितुं कम्बुग्रीवादिमत्त्वात्मकं तल्लक्षणं न कुर्वन्ति तस्माद्भक्तिर्न ध्वनिरूपा, न वा ध्वनेर्लक्षणम्, न च वोपलक्षणमित्याकूतम्। परमार्थतस्त्वविवक्षितवाच्येऽपि ध्वनौ भक्त्या लक्ष्यार्थ एव बोध्यते, नतु प्रयोजनीभूतप्रतीतिगोचरो व्यङ्ग्यार्थः—

'यस्य प्रतीतिमाधातुं लक्षणा समुपास्यते।

फले शब्दैकगम्येऽत्र व्यञ्जनान्नापरा क्रिया॥' इति मम्मटोक्तेः॥

यदि ध्वनिविशेषके उपलक्षणात्मक लक्षणासे सारी ध्वनि लक्षित मानी जाय तो, अलङ्कार सामान्य वाचक शब्द से ही अभिधा द्वारा सामान्य रूपसे अलङ्कारमात्र का बोध मान कर, तत्तत् अलङ्कारोंका विशेष लक्षणपूर्वक निर्वचन करना ही व्यर्थ हो जाय, इसलिये सामान्य रूपसे ज्ञात वस्तुको भी विशेष रूप से जानने के लिये लक्षण करनेकी आवश्यकता होनेसे ध्वनिका भी विशेष निर्वचन करना आवश्यक है। वास्तवमें तो अविवक्षित वाच्य ध्वनि स्थलमें भी लक्षणासे लक्ष्यार्थ ही ज्ञात होता है, प्रयोजनात्मक व्यङ्ग्य तो व्यञ्जना वृत्तिसे ही जाना जाता है, अतः किसी भी तरह लक्षणासे ध्वनि गतार्थ नहीं हो सकती।

'तुष्यतु दुर्जनः' इति न्यायेन भक्तेर्ध्वनिलक्षणत्वमभ्युपगत्यापि ध्वनिपक्षं द्रढयति—

(२२) **लक्षणेऽन्यैः कृते चास्य पक्षसंसिद्धिरेव नः॥ २२॥**

अन्यैः प्राचीनैर्भक्तिवादिभिः, अस्य ध्वनेः, लक्षणे कृते च, नोऽस्माकं ध्वनिवादिनामेव, नतु तेषाम्, पक्षस्य साधनीयार्थस्य सम्यगनायासेन सिद्धिर्निष्पत्तिरित्यर्थः।

यद्यपि प्राचीन आचार्योंने ही ध्वनिका लक्षणपूर्वक निर्वचन कर दिया है, दुबारा उसका निर्वचन करना व्यर्थ है, तथापि उससे ध्वनिवादियोंका ही पक्ष आपसे आप (स्वयं) सिद्ध हो जाता है।

तदाह वृत्तिकारः—

कृतेऽपि वा पूर्वमेवान्यैर्ध्वनिलक्षणे पक्षसंसिद्धिरेव नः।

यदि भक्तिरेव ध्वनेर्लक्षणम्, सा च प्राचीनैरेव व्याकृतेत्युच्यते, तदाऽपि ध्वनि-वादिनामस्माकमेवेष्टसिद्धिरित्यभिसन्धिः ॥

वृत्तिकार उक्त बातको ही स्फुट करते हैं-कृतेऽपीति । अत्यन्त प्राचीन आचार्य पहले ही यद्यपि ध्वनिका लक्षण कर चुके हैं, तो भी उससे ध्वनिवादका ही समर्थन होता है ।

कुत इत्यत आह—

यस्माद् ध्वनिरस्तीति नः पक्षः । स च प्रागेव संसिद्ध इत्ययत्न-सम्पन्नसमीहितार्थाः सम्पन्नाः स्म ।

यतो ध्वनेः सत्त्वमेवास्माकं साधनीयम् । तच्च यद्यस्मत्प्रयासात्पूर्वत एव संसिद्ध-मस्ति, तर्हि प्रयत्नं विनैव सिद्धेष्टार्था वयमभूमेत्यस्माकं महांल्लाभ इति सारम् ।

क्योंकि ध्वनिको स्थापित करना ही ध्वनिवादियोंका सिद्धान्त है, इसलिये वह पहले ही यदि आपसे आप ( स्वयं ) सिद्ध हो जाती है, तो इससे बढ़कर उनकी विजय हो ही क्या सकती है ?

निरस्तचरीमपि ध्वनेरनिर्वचनीयतामनूद्य निगदेन खण्डयति—

येऽपि सहृदयहृदयसंवेद्यमनाख्येयमेव ध्वनेरात्मानमाम्नासिषुः तेऽपि न परीक्ष्यवादिनः, यत उक्तया नीत्या वक्ष्यमाणया च ध्वनेः सामान्यविशेषलक्षणे प्रतिपादितेऽपि, यद्यनाख्येयत्वम्, तत्सर्वेषामेव वस्तूनां तत्प्रसक्तम् ।

ये पराक्षेपप्रतिक्षेपाक्षमतया ध्वनिलक्षणकरणाद्विमुखा ध्वनेस्तत्त्वं स्वरूपम्, अनाख्येयमनिर्वचनीयम्, सहृदयहृदयसंवेद्यं तत्प्रतीतिगोचरमात्रम्, आम्नासिषुरवोचन् । तेऽपि न परीक्ष्य वादिनो विविच्य वक्तारः सन्तीति शेषः, यतः 'यत्रार्थः शब्दो वा' इत्यादिनोक्तया, अर्थान्तरे संक्रमितमत्यन्तं वा तिरस्कृतम्' इत्यादिना वक्ष्यमाणया च नीत्या न्यायेन रीत्येति यावत, ध्वनेः सामान्यलक्षणे विशेषलक्षणे च प्रतिपादिते कथितेऽपि, यद्यनाख्येयत्वमेव तस्य, तदा सर्वेषां कृतलक्षणानां पदार्थानां, तदनाख्येयत्वं प्रसक्तमापन्नमित्यर्थः ।

निरुक्तावप्यनिर्वचनीयत्वं ध्वनेर्दुर्वचमिति तदनिर्वचनीयतावादोऽपि वचनीयता-गोचर एवेत्यभिप्रायः ॥

अब अनिर्वचनीयतावादके खण्डनका उपसंहार करते हैं-येपीऽति । सरस विवे- [illegible] भी पूर्ण

विवेचक नहीं मालूम होते, क्योंकि उक्त एवं वक्ष्यमाणयुक्तियोंसे ध्वनिके सामान्य-विशेष रूपसे निर्वचन करने पर भी यदि वह (ध्वनि) अनिर्वचनीय ही हो तो, सभी वस्तुएँ ही अनिर्वचनीय हो जायँ।

अनिर्वाच्यतावादिनोऽपि स्वनये प्रवेशयन्नुद्द्योतमुपसंहरति —

यदि पुनर्ध्वनेरतिशयोक्त्याऽनया, काव्यान्तरातिशायिस्वरूपमाख्यायते, तत्तेऽपि युक्ताभिधायिन एव ॥

इति राजानकानन्दवर्धनाचार्यविरचिते ध्वन्यालोके

प्रथम उद्द्योतः ॥

काव्यमाला ।

पण्डितराजश्रीजगन्नाथविरचितो

# रसगङ्गाधरः ।

नागेशभट्टकृतया गुरुमर्मप्रकाशाख्यव्याख्यया मञ्जुनाथ-
कृतया सरलया च समेतः ।

---

## प्रथममाननम् ।

स्मृतापि तरुणातपं[1] करुणया हरन्ती नृणा-
मभङ्गुरतनुत्विषां वलयिता शतैर्विद्युताम् ।
कलिन्दगिरिनन्दिनीतटसुरद्रुमालम्बिनी
मदीयमतिचुम्बिनी भवतु कापि कादम्बिनी ॥

---

नत्वा गङ्गाधरं मर्मप्रकाशं तनुते गुरुम् ।
रसगङ्गाधरमणेरतिगूढार्थसंविदे ॥

याचकानां कल्पतरोररिकक्षहुताशनात् ।
नागेशः श्रृङ्गवेरेशरामतो लब्धजीविकः ॥

प्रारिप्सितप्रतिबन्धकदुरितशमनाय श्रृङ्गारालम्बनादिविभावतया तद्देवतात्वेन च समुचितस्वेष्टदेवतावस्तुनिर्देशरूपं मङ्गलमाचरञ्शिष्यशिक्षायै व्याख्यातृश्रोतॄणामनुषङ्गतो मङ्गलाय च निबध्नाति—स्मृतापीति । कादम्बिनी मेघपङ्क्तित्वेनाध्यवसिता कृष्णमूर्तिः । विलक्षणश्यामत्वात्सकलमेघकार्यकरत्वाच्च । अत एव मेघत्वेनाध्यासः । कापीत्यनेनात्र तद्धर्मसत्त्वेऽपि ततोऽधिककार्यकारित्वेन प्रसिद्धकादम्बिनीतो व्यतिरेकस्तत्र बोध्यते । मतिचुम्बिनी मतिविषयः । भवत्विति प्रार्थने लोट् । व्यतिरेकपोषकं विशेषणत्रयम् । प्रसिद्धा सा तु दृष्टा वर्षणद्वारा स्पृष्टा वा स्वाभाव्याद्वृषस्थभान्वातपाज्यतापं केषांचिन्न तु सर्वेषां भूतभविष्यद्वर्तमानभेदेन हृतवती । इयं तु स्मृतापि । दृष्टादिसमुच्चायकोऽपिः । तरुणातपम् । तमपि करुणया न तु यथाकथंचित् । नृणां सर्वेषां न तु केषांचित् । हरन्ती न तु जहार हरिष्यति वा । किं च सा भङ्गशीलतनुकान्तिविद्युता वलयिता वेष्टिता ।

---

गणनाथे नतिमयता मथुरानाथेन मञ्जुनाथेन ।
गङ्गाधराध्वतरला सरला परिलाप्यते सेयम् ॥

---

१ तरुणं प्रचण्डम् आतपम् ।

श्रीमज्ज्ञानेन्द्रभिक्षोरधिगतसकलब्रह्मविद्याप्रपञ्चः
काणादीराक्षपादीरपि गहनगिरो यो महेन्द्रादवेदीत् ।
देवादेवाध्यगीष्ट स्मरहरनगरे शासनं जैमिनीयं
शेषाङ्कप्राप्तशेषामलभणितिरभूत्सर्वविद्याधरो यः ॥
पाषाणादपि पीयूषं स्यन्दते यस्य लीलया ।
तं वन्दे पेरुभट्टाख्यं लक्ष्मीकान्तं महागुरुम् ॥
निमग्नेन क्लेशैर्मननजलधेरन्तरुदरं
मयोन्नीतो लोके ललितरसगङ्गाधरमणिः ।

---

इयं तु चिरकालस्थायिशरीरकान्तीनां विद्युतां तत्त्वेनाध्यवसितानां गोपाङ्गनानां शतैर्न लेकद्वित्र्यादिभिर्वलयिता वेष्टिता । यद्वा 'धान्येन धनवान्' इतिवत्तृतीया । तदभिन्नसंजातवलया । कलिन्दाख्यमहीधरोत्पन्नयमुनातीरे सुरद्रुमा नीपाः । तेषां तत्त्वं तु हरिप्रियत्वात् । 'मणिद्वीपे नीपोपवनवति चिन्तामणिगृहे' इति लिङ्गाच्च बोध्यम् । यद्वा तीरमेव सुरद्रुमास्तत्त्वेन प्रसिद्धाः पञ्च, तदाश्रयिका । सा तु वियत्सरण्याश्रयिकेति भावः । यद्वा कादम्बिनीत्वेनाध्यवसिता काली । सा च कृष्णमूर्तिः, वृन्दावनाधिष्ठात्री देवता राधा वा । विद्युत्त्वेनाध्यवसितास्तत्परिचारकदेव्यः । तृतीयविशेषणार्थस्तु स्पष्ट एवेति बोध्यम् । अत्र व्यतिरेकरूपकातिशयोक्त्योरङ्गाङ्गिभावाख्यः संकरः ॥

स्वोक्तेः कल्पितत्वनिरासाय स्वविद्यायाः सांप्रदायिकत्वसूचनाय च गुरुनतिं द्वाभ्यामाह—**श्रीमदिति** । श्रीः सरस्वती ब्रह्मवर्चसं वा । ज्ञानेन्द्राख्ययतेः सकाशादित्यर्थः । पूर्वार्धे य इत्युभयत्रान्वेति । उत्तरार्धे य इति त्रिषु । प्रपञ्चे निखिललोक्त्या लेशतोऽपि तदत्यागः सूचितः । कणादाक्षपादाभ्यां प्रोक्ता गम्भीरवाण्यः । न्यायवैशेषिकशास्त्राणीति यावत् । देवादेव । एवः प्रसिद्धौ । खण्डदेवादेवेत्यर्थः । स्मरेति । काश्यां जैमिनिप्रोक्तं शास्त्रम् । शेष इत्यङ्क उपनाम यस्य तस्माद्वीरेश्वरपण्डितात्प्राप्ता शेषस्य पतञ्जलेरमला भणितिर्महाभाष्यरूपा येन तादृशः । उपसंहरति—**सर्वेति** । एतेन तदितरशास्त्रवेदादिज्ञातृत्वं सूचितम् । अत्र य इत्यस्य तमित्युत्तरश्लोकेनान्वयः ॥

**पाषाणादपीति** । यच्चेष्टाविशेषेण जडादप्यमृतस्रावश्चेतनादिति तु किमु वाच्यम् । इत्यनेन महामहिमशालिता वर्णिता । तेन तन्मुखश्रवणमात्रेण पाषाणतुल्यस्य स्वस्य सकलविद्याविर्भावोऽनायासेन सूचितः । लक्ष्मीति तत्पत्नीनाम । यद्वा लक्ष्मीकान्तं विष्णुस्वरूपम् । सर्वविद्यानामेकस्मादेव लाभात्तत्र महत्त्वम् ॥

ततः किमत आह—**निमग्नेनेति** । युक्तिहेतुकानुचिन्तनरूपोदध्युदरमध्ये न तु यत्र क्वचित् । क्लेशैर्न तु क्लेशेन । नितरां न तु यथाकथंचित् । मग्नेन मया जगन्नाथेन लोके भूलोक उन्नीत आनीतो ललितो रमणीयो रसगङ्गाधर एव मणिर्गुणवताम् । अनेन

हरन्नन्तर्ध्वान्तं हृदयमधिरूढो गुणवता-
मलंकारान्सर्वानपि गलितगर्वान्रचयतु ॥
परिष्कुर्वन्त्वर्थान्सहृदयधुरीणाः कतिपये
तथापि क्लेशो मे कथमपि गतार्थो न भविता ।
तिमीन्द्राः संक्षोभं विदधतु पयोधेः पुनरिमे
किमेतेनायासो भवति विफलो मन्दरगिरेः ॥
निर्माय नूतनमुदाहरणानुरूपं
काव्यं मयात्र निहितं न परस्य किंचित् ।
किं सेव्यते सुमनसां मनसापि गन्धः
कस्तूरिकाजननशक्तिभृता मृगेण ॥

---

तद्रहितानामनादरेऽपि न क्षतिरिति सूचितम् । हृदयमधिरूढः स्वान्तं प्रविष्टः । असाधारणधर्ममाह—अन्तरिति । ग्रन्थपक्षे साहित्यविषयमज्ञानम् । मणिपक्षे तु स्पष्टमेव । अलंकारान्भूषणानि तच्छास्त्राणि वा । सर्वानपि न तु कांश्चित् । गलितः स्वयमेव च्युतो नष्टो गर्वो येषां तान्रचयतु । करोत्वित्यर्थः ॥

ननु तादृशार्षग्रन्थेनैव निर्वाहे किमित्यपूर्वोऽयं ग्रन्थोऽत आह—**परीति** । केचन काव्यवासनावासितान्तःकरणश्रेष्ठा अर्थानार्थानलंकारादीन्परिष्कुर्वन्तु, तथापि तैस्तथा कृतेऽपि मे क्लेशो रसगङ्गाधररचनरूपः कथमपि स्वल्पतोऽपि गतार्थश्चरितार्थो न भविता । भविष्यतीति वाच्ये भवितेत्यनेनेदं सूचितम्—स्वग्रन्थकरणकाले स्वतुल्यपण्डितसत्त्वेन तेषां गतार्थत्वेऽप्यग्रिमाणामल्पबुद्धीनां न गतार्थत्वम् । अत एव केचन सहृदयधुरीणा इत्युक्तमिति । उक्तमर्थमर्थान्तरोपन्यासेन द्रढयति—तिमीन्द्रा मत्स्यविशेषश्रेष्ठाः पुनर्भूयः सम्यङ् न तु यथाकथंचित्क्षोभमालोडनं कुर्वन्तु । एतेन तत्कर्तृकेन तेन मन्दराचलप्रयासो विफलो निष्फलः किं भवति । अपि तु नेति । तिमीन्द्राणां तत्रत्यरत्नालाभेऽपि देवानां तल्लाभात्तत्कारणेन साफल्यमिति भावः ॥

इतरग्रन्थतो विशेषान्तरमाह—**निर्मायेति** । उदेति । तत्तदलंकारादिलक्ष्यत्वयोग्यं काव्यं भामिनीविलासाख्यम्[1] । अत्र रसगङ्गाधरग्रन्थे । लेशतोऽपि परकीयत्वाभावायाह—न परस्येति । निहितमित्यस्यानुषङ्गः । पूर्ववदाह—किमिति । सुमनसां पुष्पाणाम् । गन्धः आमोदः । कस्तूरिकावतेति वाच्ये जननशक्तेत्यनेन सूचितम्—कदापि परकीयग्रहणं न, तज्जननशक्तिसत्त्वेन यावदपेक्षितोत्पादनसंभवादिति ॥

---

१ स्थूला बुद्धिरियम् । काव्यपदेन रमणीयार्थप्रतिपादकं मुक्तकपद्यमेवात्र विवक्षितम्, न प्रबन्धात्मकमिदम् । एतदन्तर्निधाने तस्य तन्नाम्ना व्यपदेशासंभवात् । उपशतश्लोकात्मकेन तेन प्रायो नवशतश्लोकात्मकस्यास्य पूर्तेरसंभवाच्च ।

मननतरितीर्णविद्यार्णवो जगन्नाथपण्डितनरेन्द्रः।
रसगङ्गाधरनाम्नीं करोति कुतुकेन काव्यमीमांसाम् ॥
रसगङ्गाधरनामा संदर्भोऽयं चिरं जयतु।
किं च कुलानि कवीनां निसर्गसम्यञ्चि रञ्जयतु ॥

तत्र कीर्ति-परमाह्लाद-गुरुराजदेवताप्रसादाद्यनेकप्रयोजनकस्य काव्यस्य व्युत्पत्तेः कविसहृदययोरावश्यकतया गुणालंकारादिभिर्निरूपणीये तस्मिन्विशेष्यतावच्छेदकं तदितरभेदबुद्धौ साधनं च तल्लक्षणं तावन्निरूप्यते—

**रमणीयार्थप्रतिपादकः शब्दः काव्यम् ॥**

रमणीयता च लोकोत्तराह्लादजनकज्ञानगोचरता। लोकोत्तरत्वं चा-

---

प्रतिजानीते—**मननेति**। मननरूपनौकापारंगतविद्यारूपोदधिर्जगन्नाथाख्यपण्डितश्रेष्ठः, पण्डितो नरेन्द्रः पृथ्वीशो येन वा। नरेन्द्रस्य पण्डित इति वा। पण्डितश्चासौ नरेन्द्रश्च तत्तुल्यत्वादिति वा। वस्तुतस्तु जगन्नाथपण्डितराज इति पृथ्वीपतिदत्तनामाभिलापोऽयम्। कुतुकेनेत्यनेन स्वस्य ग्रन्थकरणे क्लेशाभावः सूचितः। मीमांसा विचारः ॥

प्रार्थयते—**रसेति**। अयं बुद्धिस्थः संदर्भः पञ्चाङ्गकं वाक्यं चिरं चिरकालं जयतु सर्वोत्कर्षेण वर्तताम्। किं च स एव निसर्गसम्यञ्चि स्वभावरमणीयानि। एतेन कृत्रिमरमणीयनिरासः। कवीनां कुलानि वंशान्समूहान्वा रञ्जयत्वनुरक्तान्करोतु ॥

तत्र करणीये ग्रन्थे। परमाह्लादो विगलितवेद्यान्तरानन्दः। आदिना द्रव्यलाभादिः। कविः काव्यकर्ता। सहृदयस्तदनुभववान्। कवेरनुभवश्चेत्सहृदयत्वेनैव न तु कवित्वेन। गुणेति। विशेषणैरित्यर्थः। आदिना रसादिपरिग्रहः। तस्मिन्काव्ये। निष्ठत्वं सप्तम्यर्थः। तस्य विशेष्यतायामन्वयः। तल्लक्षणं काव्यलक्षणम्। इष्टतावच्छेदकं च तदेव। तत्प्रकारकज्ञानस्य प्रवर्तकत्वादिति बोध्यम्। तावदादौ। **रमणीयेति**। कटाक्षादिवारणाय शब्द इति। व्यङ्ग्यादिसंग्रहाय वाचक इत्यनुक्त्वा प्रतिपादक इत्युक्तम्। रमणीयशब्दप्रतिपादके व्याकरणादिरूपेऽतिव्याप्तिवारणायार्थेति। 'घटमानय' इत्यादिवाक्यवारणाय रमणीयेति। ननु रमणीयस्याननुगतत्वात्तत्रापि तत्त्वमस्त्येवेत्यत आह—**रमणीयता चेति**। ननु लोकोत्तरत्वं यथाकथंचिच्चेदुक्तदोषः, आत्यन्तिकं चेद्ब्रह्मानन्द एवात आह—**लोकोत्तरत्वं चेति**। अनुभवसाक्षिक इत्यनेन तदन्यप्रमाणनिरासः। स

---

१ काव्यं हि गुणालंकाररसादिभिर्विशिष्टं भवति। ततश्च गुणालंकारादिभिर्विशेषणैर्विशेष्यतया बोधनीये तस्मिन् ( काव्ये ) विशेष्यतावच्छेदकम् ( गुणालंकारादिविशेषणानां विशेष्यं यत्काव्यं तस्य विशेष्यतावच्छेदकम् ) अर्थात्काव्यत्वम् तदेव तदितरस्मात् काव्येतरस्मात् ( अर्थात् अकाव्यात् ) काव्यस्य भेदबोधने साधनं भवतीति काव्यलक्षणं निरूप्यत इत्याशयः।

२ लोको[illegible]रो य आह्लादस्तज्जनकं यज् ज्ञानम् ( भावना ) तद्गोचरता तद्विषयीभूततेत्यर्थः।

चमत्कारत्ववत्त्वमेव[1] वा काव्यत्वमिति फलितम्। यत्तु प्राञ्चः 'अदोषौ सगुणौ सालंकारौ शब्दार्थौ काव्यम्' इत्याहुः, तत्र विचार्यते—शब्दार्थयुगलं न काव्यशब्दवाच्यम्, मानाभावात्। काव्यमुच्चैः पठ्यते, काव्यादर्थोऽवगम्यते, काव्यं श्रुतमर्थो न ज्ञातः, इत्यादिविश्वजनीनव्यवहारतः प्रत्युत शब्दविशेषस्यैव काव्यपदार्थत्वप्रतिपत्तेश्च। व्यवहारः शब्दमात्रे लक्षणयोपपादनीय इति चेत्, स्यादप्येवम्, यदि काव्यपदार्थतया पराभिमते शब्दार्थयुगले काव्यशब्दशक्तेः प्रमापकं दृढतरं किमपि प्रमाणं स्यात्। तदेव तु न पश्यामः। विमतवाक्यं त्वश्रद्धेयमेव। इत्थं चासति काव्यशब्दस्य शब्दार्थयुगलशक्तिग्राहके प्रमाणे प्रागुक्ताद्व्यवहारतः शब्दविशेषे सिद्ध्यन्तीं शक्तिं को नाम निवारयितुमीष्टे। एतेन विनिगमनाभावादुभयत्र शक्तिरिति प्रत्युक्तम्। तदेवं शब्दविशेषस्यैव काव्यपदार्थत्वे सिद्धे तस्यैव लक्षणं वक्तुं युक्तम्, न तु स्वकल्पितस्य काव्यपदार्थस्य। एवैव च वेदपुराणादिलक्षणेष्वपि गतिः। अन्यथा तत्रापीयं दुरवस्था स्यात्। यत्त्वास्वादोद्बोधकत्वमेव काव्यत्वप्रयोजकं तच्च शब्दे चार्थे चाविशिष्टमित्याहुः, तन्न। रागस्यापि रसव्यञ्जकताया ध्वनि-

---

व्यञ्जकत्वस्योभयत्राविशेष एव मानमत आह—**काव्यमिति**। प्रत्युत वैपरीत्येन। आदिना काव्यं पठितमित्यादिसंग्रहः। **इत्यादीति**। इत्यादिसार्वजनीनव्यवहारात्। सार्वविभक्तिकस्तसिः। विशेषपदेन प्रागुक्तार्थकत्वसूचनम्। एवमग्रेऽपि। एवेनार्थनिरासः। प्रतिपत्तेश्च निर्णयाच्चेत्यन्वयार्थौ। **परेति**। प्रकाशकृदादीत्यर्थः। प्रत्यायकं निश्चायकम्। **विमतेति**। प्रकाशकृदित्यर्थः। उपसंहरति—**इत्थं चेति**। तस्याश्रद्धेयत्वे चेत्यर्थः। शब्दस्येत्यस्योभयत्र शक्तावन्वयः। एतेन व्यवहाररूपविनिगमकसत्त्वेन। प्रकरणार्थमुपसंहरति—**तदेवमिति**। एवमुक्तप्रकारेण। तस्यैव शब्दविशेषरूपस्यैव। प्रासङ्गिकमाह—**एवैव चेति**। अन्यथा वेदत्वादेरुभयत्राङ्गीकारे। दुरवस्था व्यवहारोच्छेदापत्तिरूपा। **लक्षणीयत्वेति**। तथा च तत्रातिव्याप्तिरिति भावः। सर्वेषामपि चेष्टादी-

---

१ लघुभूतं लक्षणमाह—स्वविशिष्टजनकतेति०। अयं भावः—चमत्कारत्ववत्त्वमेव काव्यत्वम्। चमत्कारत्ववत्त्वं च स्वविशिष्टजनकतावच्छेदकार्थप्रतिपादकतासंसर्गेण ग्राह्यम्। अत्र स्वं चमत्कारत्वं तादृशचमत्कारत्वविशिष्टा विषयतासंबन्धावच्छिन्ना अर्थनिष्ठा या भावनानिष्ठजनकताऽवच्छेदकता तद्रूपेण संसर्गेणेत्याशयः। सर्वस्य लक्षणस्यायं निष्कर्षः—यादृशशब्दानुपूर्व्याः (शब्दपरम्परायाः) पुनःपुनरनुसंधानात्मकेन भावनाविशेषेण चमत्कारापरपर्यायस्य अलौकिकानन्दस्य जननं भवति तादृशशब्दानुपूर्वीमत्त्वं काव्यत्वमिति।

ह्लादगतश्चमत्कारत्वापरपर्यायोऽनुभवसाक्षिको जातिविशेषः । कारणं च तदवच्छिन्ने भावनाविशेषः पुनःपुनरनुसंधानात्मा । 'पुत्रस्ते जातः,' 'धनं ते दास्यामि' इति वाक्यार्थधीजन्यस्याह्लादस्य न लोकोत्तरत्वम् । अतो न तस्मिन्वाक्ये काव्यत्वप्रसक्तिः । इत्थं च चमत्कारजनकभावनाविषयार्थप्रतिपादकशब्दत्वम्[1], यत्प्रतिपादितार्थविषयकभावनात्वं चमत्कारजनकतावच्छेदकं तत्त्वम्[2], स्वविशिष्टजनकतावच्छेदकार्थप्रतिपादकतासंसर्गेण

---

चानुभवः सहृदयानामेव । एवं च नोक्तदोष इति भावः । ज्ञानं च भावनारूपमेव नान्यदित्याह—**कारणं चेति** । तदवच्छिन्ने चमत्कारत्वापरपर्यायलोकोत्तरत्वरूपजात्यवच्छिन्ने । विशेषो न तु सामान्यम् । अत एव तत्स्वरूपमाह—**पुनरिति** । लोकोत्तरेति विशेषणकृत्यमाह—**पुत्रस्ते इत्यादि** । अत्र वाक्यार्थद्वयम् । तथा सति परिष्कृतं लक्षणमाह—**इत्थं चेति** । उक्तार्थसिद्धौ चेत्यर्थः । फलितमित्यत्रान्वयः । यत्किंचिच्चमत्कारजनकज्ञाने समूहालम्बनविधया भासमानान्यार्थप्रतिपादकशब्दे काव्यत्ववारणाय ज्ञानेत्यपहाय भावनेत्युक्तम् । शब्दत्वमित्यस्य काव्यत्वमित्यत्रान्वयः । धारावाहिकसकलज्ञानविषयतादृशार्थप्रतिपादके वाक्येऽतिव्याप्तेराह—**यत्प्रतिपादितेति** । यादृशानुपूर्वीप्रतिपादितार्थविषयकत्वविशिष्टभावनात्वं तज्जनकतावच्छेदकं तादृशानुपूर्वीमत्त्वमित्यर्थः । तेन नोक्तदोषः । लाघवादाह—**स्वेति** । स्वं चमत्कारत्वम् । **जनकतावच्छेदकार्थेति** । अर्थे भावनानिष्ठजनकतावच्छेदकता विषयतासंबन्धेन बोध्या । लक्ष्यतावच्छेदकं चैतत्समानाधिकरणं काव्येत्याद्यनुगतव्यवहारेणास्वादजनकतया च सिद्धजातिविशेषरूपमुपाधिरूपं वा काव्यत्वं[3] बोध्यम् । प्राञ्चः प्रकाशकृदादयः । नन्वास्वाद-

---

१ चमत्कारजनिका या भावना तादृशभावनाया विषयीभूतो योऽर्थः तत्प्रतिपादकः शब्दः काव्यम्, तत्त्वं च काव्यत्वम् ।

२ येन यैर्वा शब्दैरुपस्थापितस्य (अर्थात् यादृशानुपूर्वीप्रतिपादितस्य) अर्थस्य भावनया (पुनःपुनरनुसंधानेन) चेतसि चमत्कारजननं भवति तादृशचमत्कारजनकताया अवच्छेदकं तादृशशब्दानुपूर्वीमत्त्वमेव काव्यत्वं भवतीत्याशयः । एवं सति सकलया आनुपूर्व्या यत्र चमत्कारो नोत्पद्यते किन्तु धारावाहिकरूपेणाऽन्यदपि (अचमत्कारोऽपि) प्रतीयते तत्स्थलस्य निरासः ।

३ एतल्लक्षणस्य हि लक्ष्यं काव्यम्, लक्ष्यतावच्छेदकं च काव्यत्वम् । तद्धि किंरूपमिति जिज्ञासायां सर्वेषु काव्येषु 'इदं काव्यम् इदं काव्यम्' इत्याद्यनुगतव्यवहारेण आस्वादोद्बोधकतया च काव्यत्वं जातिविशेषरूपमुपाधिरूपं वा सिध्यतीति नागेशाशयः ।

कारादिसकलालंकारिकसंमतत्वेन प्रकृते लक्षणीयत्वापत्तेः । किं बहुना नाट्याङ्गानां सर्वेषामपि प्रायशस्तथात्वेन तत्त्वापत्तिर्दुर्वारैव । एतेन रसोद्बोधसमर्थस्यैवात्र लक्ष्यत्वमित्यपि परास्तम् । अपि च काव्यपदप्रवृत्तिनिमित्तं शब्दार्थयोर्व्यासक्तम्, प्रत्येकपर्याप्तं वा ? नाद्यः । एको न द्वाविति व्यवहारस्येव श्लोकवाक्यं न काव्यमिति व्यवहारस्यापत्तेः । न द्वितीयः । एकस्मिन्पद्ये काव्यद्वयव्यवहारापत्तेः । तस्माद्वेदशास्त्रपुराणलक्षणस्येव काव्यलक्षणस्यापि शब्दनिष्ठतैवोचिता[3] ।

लक्षणे गुणालंकारादिनिवेशोऽपि न युक्तः । 'उदितं मण्डलं विधोः' इति काव्ये दूत्यभिसारिकाविरहिण्यादिसमुदीरितेऽभिसरण[2]विधिनिषेधजीवनाभावादिपरे 'गतोऽस्तमर्कः' इत्यादौ चाव्याप्त्यापत्तेः । न चेदमकाव्यमिति शक्यं वदितुम् । काव्यतया पराभिमतस्यापि तथा वक्तुं शक्यत्वात् । काव्यजीवितं चमत्कारित्वं चाविशिष्टमेव । गुणत्वालंकारत्वा-

नामपि । क्वचित्तदभावादाह—**प्रायश इति** । तथात्वेन रसव्यञ्जकत्वेन । तत्त्वापत्तिकाव्यत्वापत्तिः । मतत्रयसाधारणं दोषमाह—**अपि चेति** । व्यासक्तं व्यासज्यवृत्ति । **उचितेति** । यदि त्वास्वादव्यञ्जकत्वस्योभयत्राप्यविशेषाच्चमत्कारिबोधजनकज्ञानविषयःतावच्छेदकधर्मवत्त्वरूपस्यानुपहसनीयकाव्यलक्षणस्य प्रकाशाद्युक्तलक्ष्यतावच्छेदकस्योभयवृत्तित्वाच्च काव्यं पठितम्, श्रुतं काव्यम्, बुद्धं काव्यमित्युभयविधव्यवहारदर्शनाच्च काव्यपदप्रवृत्तिनिमित्तं व्यासज्यवृत्ति । अत एव वेदत्वादेरुभयवृत्तित्वप्रतिपादकः 'तदधीते' इत्यादिसूत्रस्थो भगवान्पतञ्जलिः संगच्छते । लक्षणयान्यतरस्मिन्नपि[3] तत्त्वादेको न द्वावितिवन्न तदापत्तिः । तेनानुपहसनीयकाव्यलक्षणं प्रकाशोक्तं निर्बाधम् । एवमास्वादादौ वैलक्षण्यनिवेशादुक्तलक्षणद्वयमपि निर्बाधमिति नान्यमतमपि दुष्टमित्युच्यते तर्ह्यस्तु तथा । सामान्यलक्षणं त्वदोषादिपदाघटितमेव तेषामपि मते । एवं च न कोऽपि दोष इति बोध्यम् । तदाह—**लक्षण इति** । काव्यसामान्यलक्षण इत्यर्थः । आदिना संख्यादिपरिग्रहः । यथासंख्यमन्वयः । आदिना पतिप्राप्त्यादिपरिग्रहः । इदं च मध्यमणिन्यायेनोभयान्वयि । **अव्याप्त्यापत्तेरिति** । गुणालंकारयोरभावादिति भावः । तथा **अकाव्यमितीति** । ननु काव्यजीवितं चमत्कारित्वं तत्रास्तीत्यत आह—**काव्येति** ।

१ आस्वादोद्बोधककाव्यत्वरूपम् ।

२ अभिसरणविधिर्दूत्याः, अभिसरणनिषेधोऽभिसारिकायाः, जीवनाभावो विरहिण्या इति बोध्यम् ।

३ शब्दार्थयुगले काव्यशब्दशक्तेर्दृढतरप्रमापकाभावान्न लक्षणेति स्पष्टं प्रत्याख्याता लक्षणा । आस्वादे वैलक्षण्यनिवेशोपि [ अर्थात् शब्दार्थबोधजनितो यो विलक्षण आस्वादस्तस्योद्बोधकस्यैव काव्यत्वम्, न रागादिजनितस्येति ] भेदकाभावाद् ग्रन्थकर्तुरननुमतः । एवं स्थितेपि 'अस्तु तथा [ अर्थात् अदुष्टत्वमस्तु ] इति टीकारूपेण ग्रन्थकर्तुर्मुखान्निःसार्यते इति धन्या सेयं वादशैली ।

देरन[1]नुगमाच्च । दुष्टं काव्यमिति व्यवहारस्य बाधकं विना लाक्षणिकत्वायोगाच्च । न च संयोगाभाववान्वृक्षः संयोगीतिवदंशभेदेन । दोषरहितं दुष्टमिति व्यवहारे बाधकं नास्तीति वाच्यम् । 'मूले महीरुहो विहंगमसंयोगी, न शाखायाम्' इति प्रतीतेरिवेदं पद्यं पूर्वार्धे काव्यमुत्तरार्धे तु न काव्यमिति स्वरसवाहिनो विश्वजनीनानुभवस्य विरहादव्याप्य[2]वृत्तिताया अपि तस्यायोगात् । शौर्यादिवदात्मधर्माणां गुणानाम्, हारादिवदुपस्कारकाणामलंकाराणां च शरीरघटकत्वानुप[3]पत्तेश्च । यत्तु 'रसवदेव काव्यम्'

---

ननु विलक्षणचमत्कारित्वं तत्रैवेति नोक्तदोषोऽत आह—**गुणत्वेति** । ननु काव्यधर्मत्वं रसधर्मत्वं वा गुणत्वम्, काव्यशोभाधायकत्वं काव्यधर्मत्वं वालंकारत्वमित्यनुगम एवेति चेत्सत्यम् । तथापि गुणालंकारादीत्यादिपदेनादोषाविति विशेषणमयुक्तमित्यभिमतम् । युक्तं चैतत् । दोषसामान्याभावनिवेशे काव्यव्यवहारस्य विरलविषयतापत्तेः । इदं काव्यं दुष्टमिति व्यवहारानापत्तेश्च । न चादोषपदेन स्फुटदोषराहित्यं विवक्षितम् । स्फुटत्वं च शाब्दबोधप्रतिबन्धकत्वम् । तेन निराकाङ्क्षत्वानासन्नत्वे गृह्येते । अन्यथा रसादिदोषाणां त्यागे बीजानापत्तिः । न ह्यदोषौ शब्दार्थावित्युक्ते रसादिदोषाभावः प्रतीयत इति वाच्यम् । अर्थशब्देन रसस्यापि ग्रहादिति भावः । तदाह—**दुष्टं काव्यमितीति** । एवं च तेषामपि मते तादृशकाव्यलक्षणेऽदोषाविति मात्रस्यानिवेश इति बोध्यम् । **स्वरसेति** । स्वारसिकस्येत्यर्थः । **विश्वेति** । सर्वजनीनेत्यर्थः । अपिः प्रागुक्तरीतिसमुच्चायकः । ननु सामान्यलक्षणस्यादोषपदाघटितत्वात्तथा व्यवहारोपपत्तिरत आह—**शौर्यादीति** । उत्कर्षाधायकत्वेन साम्यम् । एवं च विशेषल-

---

१ इमे इयन्तश्चेति स्वरूपसंख्यादेरनिश्चयादित्याशयः ।

२ अलक्ष्ये लक्षणगमनस्याऽभावो नास्ति, अपि तु अलक्ष्ये ( दुष्टेऽपि ) काव्यत्वं प्रसक्तम् ।

३ काशीस्था म. म. पं. गङ्गाधरशास्त्रिणस्त्वाहुः—प्रकाशादिकाव्यलक्षणेषु दोषाभावगुणालंकाराणां काव्यलक्षणोद्देश्यतावच्छेदककोटिप्रवेशो नास्ति । उद्देश्यता हि शब्दार्थयोर्द्वयोः, न पुनः केवले शब्दे, द्वयोरेव कविसंरम्भगोचरत्वात् । शब्दार्थानुगतकाव्यलक्षणं तु—कविकर्तृकरसविषयज्ञानौपयिकसामग्रीसंघटनविषयकज्ञानविषयत्वम्, अत एव च लास्याङ्गानां न काव्यत्वापत्तिः, तेषां कविकर्तृकनिरुक्तज्ञानविषयताया अभावात् । शब्दमात्रस्य काव्यत्वे तु तन्मात्रगतानां दोषगुणालंकारध्वनीनां निरूपणौचित्येन अर्थगतानां तेषां निरूपणस्योन्मत्तप्रलापत्वापत्तिः । ननु रसोपयोगितामात्रेण तेषामपि निबन्धनमुपपद्यत एवेति चेत्, काव्याङ्गनिरूपणं प्रतिज्ञाय तेषां निरूपणस्याऽसंगतत्वात् इति तदुक्तिसारः । विस्तरस्तु काशीमुद्रितपुस्तकाज्ज्ञेयः ।

इति साहित्यदर्पणे निर्णीतम्, तन्न । वस्त्वलंकारप्रधानानां काव्यानामकाव्यत्वापत्तेः । न चेष्टापत्तिः, महाकविसंप्रदायस्याकुलीभावप्रसङ्गात् । तथा च जलप्रवाहवेगनिपतनोत्पतनभ्रमणानि कविभिर्वर्णितानि कपिबालादिविलसितानि च । न च तत्रापि यथाकथंचित्परम्परया रसस्पर्शोऽस्त्येवेति वाच्यम् । ईदृशरसस्पर्शस्य 'गौश्चलति', 'मृगो धावति' इत्यादावतिप्रसक्तत्वेनाप्रयोजकत्वात् । अर्थमात्रस्य विभावानुभावव्यभिचार्यन्यतमत्वादिति दिक् ।

तस्य च कारणं कविगता केवला प्रतिभा । सा च काव्यघटनानुकूलशब्दार्थोपस्थितिः । तद्गतं च प्रतिभात्वं काव्यकारणतावच्छेदकतया सिद्धो जातिविशेष उपाधिरूपं वाखण्डम् । तस्याश्च हेतुः क्वचिद्देवतामहापुरुषप्रसादादिजन्यमदृष्टम् । क्वचिच्च विलक्षणव्युत्पत्तिकाव्यकरणाभ्यासौ । न तु त्रयमेव । बालादेस्तौ विनापि केवलान्महापुरुषप्रसादादपि

---

क्षणे तेषां निवेशेऽपि सामान्यलक्षणे तेषां न निवेश इति न कोऽपि दोष इति भावः । **वस्त्विति** । प्रधानपदस्योभयत्रान्वयः । **आकुलीति** । उच्छेदेत्यर्थः । संप्रदायमेवाह—**तथा चेति** । विलसितानि चेति वर्णितानीत्यस्यानुषङ्गः । न च तत्र रसोऽस्तीति भावः । यथाकथंचिदित्यस्यैव व्याख्या परम्परयेति । परम्परामेवाह—**अर्थेति** । सर्वस्यार्थस्येत्यर्थः ॥

तस्य च काव्यस्य । केवलेत्यनेन निपुणतादिव्यावृत्तिः । **शब्दार्थोपेति** । शब्दार्थोभयेत्यर्थः । **उपाधिर्वेति** । उपाधित्वपरित्यागेन तत्त्वाङ्गीकारे बीजमित्यर्थः । नीलघटत्वादिवत्सखण्डोपाधिरेवेति वार्थः । 'अखण्डम्' इति पाठस्तु चिन्त्य एव । तस्याः प्रतिभायाः । आदिना तपआदिपरिग्रहः । **व्युत्पत्तीति** । लोकशास्त्रादिविषयेत्यर्थः । **न तु त्रयमेवेति** । प्रतिभात्वावच्छिन्नं प्रति मिलितं त्रितयमेव कारणमिति नेत्यर्थः । एवकारेण क्वचित्त्रितयस्यापि कारणत्वमिति ध्वनयति । विलक्षणत्रितयजन्यप्रतिभा

---

१ प्रकृतरसरूपेण परिणंस्यमानरत्यादिविषयकसंस्कारोद्बोधकताया असार्वत्रिकत्वादियं प्रौढिः । विशिष्टवाक्यार्थानां रसतात्पर्यकत्वाभावे तत्सामग्रीघटकोद्बोधकताया अभावात् । यत्र त्वस्ति तत्तात्पर्यकत्वं तत्राक्षेपादिष्यत एव विशिष्टबोधजननमुखेन चमत्कारित्वम् । यथाह—'सद्भावश्चेद्विभावादेर्द्वयोरेकस्य वा भवेत् । झटित्यन्यसमाक्षेपे तदा दोषो न विद्यते ॥' एवं च जलप्रवाहादिवर्णनेऽप्युक्तरीत्या महावाक्यार्थधीद्वारा रसोद्बोधकत्वात्काव्यत्वस्य न क्षतिः । **इति म. म. गङ्गाधरशास्त्रिणः ।**

प्रतिभोत्पत्तेः। न च तत्र तयोर्जन्मान्तरीययोः कल्पनं वाच्यम्। गौरवान्मानाभावात्कार्यस्यान्यथाप्युपपत्तेश्च। लोके हि बलवता प्रमाणेनाऽऽगमादिना सति कारणतानिर्णये पश्चादुपस्थितस्य व्यभिचारस्य वारणाय जन्मान्तरीयमन्यथानुपपत्त्या कारणं धर्माधर्मादि कल्प्यते। अन्यथा तु व्यभिचारोपस्थित्या पूर्वधृत्तकारणतानिर्णये भ्रमत्वप्रतिपत्तिरेव जायते। नापि केवलमदृष्टमेव कारणमित्यपि शक्यं वदितुम्। कियन्तंचित्कालं काव्यं कर्तुमशक्नुवतः कथमपि संजातयोर्व्युत्पत्त्यभ्यासयोः प्रतिभायाः प्रादुर्भावस्य दर्शनात्। तत्राप्यदृष्टस्याङ्गीकारे प्रागपि ताभ्यां तस्याः प्रसक्तेः। न च तत्र प्रतिभायाः प्रतिबन्धकमदृष्टान्तरं कल्प्यमिति वाच्यम्। तादृशानेकस्थलगतादृष्टद्वयकल्पनापेक्षया क्लृप्तव्युत्पत्त्यभ्यासयोरेव प्रतिभाहेतुत्वकल्पने लाघवात्। अतः प्रागुक्तसरणिरेव ज्यायसी। तादृशादृष्टस्य तादृशव्युत्पत्त्यभ्यासयोश्च प्रतिभागतं वैलक्षण्यं कार्यतावच्छेदकम्, अतो न व्यभिचारः। प्रतिभात्वं च कविताया: कारणतावच्छेदकम्, प्रतिभागतवैलक्षण्यमेव वा विलक्षणकाव्यं प्रतीति नात्रापि सः। न च

---

चातिविलक्षणा। तज्जन्यं काव्यं चातिविलक्षणमेवेति न दोष इति दिक्। दोषान्तरमाह—**मानेति**। ननु कार्यान्यथानुपपत्तिरेव मानमत आह—**कार्येति**। केवलादृष्टादपीत्यर्थः। तदेव विशदयति—**लोके हीति**। लोकशब्दः प्रकृतेतरपरः। आगमः श्रुतिः। आदिना स्मृत्यादिपरिग्रहः। अत एव बलवत्त्वम्। अन्यथा तु बलवतागमादिना तदनिर्णये तु। एवेन प्रमात्वव्यावृत्त्या कार्यासाधकत्वं सूचितम्। केवलपदं स्पष्टार्थम्। प्रतिभां प्रतीति शेषः। कथमपि केनापि प्रकारेण। व्युत्पत्त्यभ्यासयोः सतोरिति शेषः। ताभ्यां व्युत्पत्त्यभ्यासाभ्याम्। तस्याः प्रतिभायाः। तत्र व्युत्पत्त्यभ्यासप्राक्कालिकादृष्टविषये। एवं च तदानीं सा न। अनन्तरं कथमपि प्रतिबन्धकनाशे सा भवत्येवेति भावः। **क्लृप्तेति**। प्रतिबन्धकादृष्टादिनाशकतयेति भावः। एतेनोक्तद्वयव्यावृत्तिः। नन्वेवं प्रतिभाकार्यककार्यकारणभावे व्यभिचारोऽत आह—**तादृशेति**। केवलेत्यर्थः। तथा च विजातीयप्रतिभां प्रति तत्कारणं विजातीयप्रतिभां प्रति ताविति न दोष इति भावः। नन्वेवमपि प्रतिभाकारणककार्यकारणभावे व्यभिचार एवात आह—**प्रतिभात्वं चेति**। प्रागुक्तं सामान्यरूपमित्यर्थः। नन्वेवमप्येकप्रतिभातोऽपरमपि काव्यं स्यादत आह—**प्रतिभागतेति**। **अत्रापीति**। द्वितीयकार्यकारणभावेऽपि न व्यभिचार इत्यर्थः। ननु वैलक्षण्यमदृष्टासहकृतत्वरूपमेवोक्तं तच्च तत्रास्त्येवेत्यत

सतोरपि व्युत्पत्त्यभ्यासयोर्यत्र न प्रतिभोत्पत्तिस्तत्रान्वयव्यभिचार इति वाच्यम् । तत्र तयोस्तादृशवैलक्षण्ये मानाभावेन कारणतावच्छेदकानवच्छिन्नत्वात् । पापविशेषस्य तत्र प्रतिबन्धकत्वकल्पनाद्वा न दोषः । प्रतिबन्धकाभावस्य च कारणता समुदितशक्त्यादित्रयहेतुतावादिनः शक्तिमात्रहेतुतावादिनश्चाविशिष्टा । प्रतिवादिना मन्त्रादिभिः कृते कतिपयदिवसव्यापिनि वाक्स्तम्भे विहितानेकप्रबन्धस्यापि कवेः काव्यानुदयस्य दर्शनात् ।

तच्चोत्तमोत्तमोत्तममध्यमाधमभेदाच्चतुर्धा ।

**शब्दार्थौ यत्र गुणीभावितात्मानौ कमप्यर्थमभिव्यङ्क्तस्तदाद्यम् ॥**

---

आह—**पापेति** । नन्वेवमिदमेव गौरवमत आह—**प्रतीति** । एवं च कार्यमात्रं प्रति प्रतिबन्धकाभावस्य कारणतायाः क्लृप्तत्वेन काव्यं प्रति यथोभाभ्यां स्वीक्रियते तथात्रापीति न मेऽधिककल्पनजगौरवमिति भावः । समुदितहेतुवादिमते तत्स्वीकार आवश्यक इत्याह— **प्रतिवादीति** । **विहितेति** । कृतानेककाव्यस्यापीत्यर्थः ॥

**तच्चेति** । काव्यं चेत्यर्थः । **शब्दार्थाविति** । गुणीभावितात्मानौ शब्दार्थौ यत्र कमप्यर्थमभिव्यङ्क्त इत्यन्वयः । भूमिं निदानम् । व्यङ्ग्यपदस्योभयत्र संबन्धः । एवमग्रे-

---

१ विशिष्टकाव्यं प्रति प्रतिभादित्रितयस्यैव कारणत्वमुपपद्यते । शक्तिर्हि द्विविधा, उत्पादिका व्युत्पादिका च । आद्यया पदसंघातस्य योजनेऽपि द्वितीयस्या अभावे विनेयसमवेतविलक्षणवाक्यार्थधियोऽसंभवेन लोकोत्तरवर्णनानैपुण्यस्य कविगतस्याभावाद्विशिष्टकविकर्मतायास्तत्सत्त्व एव संभवात् । तत्र द्वितीयैव निपुणता नाम । अभ्यासो लोकोत्तरत्वं प्रत्येवोपयुज्यते । तथा च लोकोत्तरवर्णनानिपुणताविशिष्टकविकर्मरूपकाव्यं प्रति त्रितयस्यैव कारणत्वमुचितम् इति म. म. गङ्गाधरशास्त्रिणः ।

एतदुपरि हिन्दीरसगङ्गाधरनिर्मातुः साहित्याचार्यपुरुषोत्तमचतुर्वेदस्य टिप्पनीसारः—सर्वेषामेव मतेन अलौकिकचमत्कारिण एव गुम्फनस्य नाम काव्यं न पुनश्छन्दोलयनिबन्धनमात्रस्य । अर्थात् भवन्मते यद्विशिष्टं काव्यं तदेव हि सामान्यतः काव्यम् । या व्युत्पादिका शक्तिरभ्युपेयते सा हि काव्यस्योत्पादिका तदैव भवेद् यदा सा विशिष्टकविकर्मोत्पादिका सिध्येत् । अत एव प्रकाशकारोऽपि अनुपहसनीयकाव्यनिर्माणशक्तिं प्रतिभामाह । अत एव विशिष्टकाव्यशक्तिरेव प्रतिभेति काव्यं प्रति तस्या एव कारणत्वम्, प्रतिभाविकासं प्रति च व्युत्पत्त्यभ्यासयोरिति ।

कमपीति चमत्कृतिभूमिम्। तेनातिगूढस्फुटव्यङ्ग्ययोर्निरासः। अपराङ्गवाच्यसिद्ध्यङ्गव्यङ्ग्यस्यापि चमत्कारितया तद्वारणाय गुणीभावितात्मानाविति स्वापेक्षया व्यङ्ग्यप्राधान्याभिप्रायकम्।

उदाहरणम्—

'शयिता सविधेऽप्यनीश्वरा सफलीकर्तुमहो मनोरथान्।
दयिता दयिताननाम्बुजं दरमीलन्नयना निरीक्षते॥'

अत्रालम्बनस्य नायकस्य, सविधशयनाक्षिप्तस्य रहःस्थानादेरुद्दीपनस्य च विभावस्य, तादृशनिरीक्षणादेरनुभावस्य, त्रपौत्सुक्यादेश्च व्यभिचारिणः, संयोगाद्रतिरभिव्यज्यते। आलम्बनादीनां स्वरूपं वक्ष्यते। न च यद्ययं शयितः स्यात्तदास्याननाम्बुजं चुम्बेयमिति नायिकेच्छाया एव व्यङ्ग्यत्वमत्रेति वाच्यम्। मनोरथान्सफलीकर्तुमसमर्थेत्यनेन मनोरथाः सर्वेऽस्या हृदि तिष्ठन्तीति प्रतीतेः स्वशब्देन मनोरथपदेन सामान्याकारेण तादृशेच्छाया अपि निवेदनात्। न च मनोरथपदेन मनोरथत्वाकारेण सामान्येच्छाया अभिधानेऽपि चुम्बेयमिति विषयविशेषविशिष्टेच्छात्वेन व्यङ्ग्यत्वे किं बाधकमिति वाच्यम्। चमत्कारो न स्यादित्यस्यैव बाधकत्वात्। न हि विशेषाकारेण व्यङ्ग्योऽपि सामान्याकारेणाभिहितोऽर्थः सहृदयानां चमत्कृतिमुत्पादयितुमीष्टे। कथमपि वाच्यवृत्त्य-

---

ऽपि। **निरास इति**। असुन्दरस्येत्यपि बोध्यम्। गुणीभावितात्मानावित्यनेनाप्यस्य निरास इति ध्वनयितुं द्वयोरेवोक्तिः। एवं संदिग्धप्राधान्यतुल्यप्राधान्यकाकाक्षिप्तानामपि बोध्यम्। स्वापेक्षया शब्दार्थापेक्षया। सविधेऽर्थाद्दयितस्य। कारणसत्त्वेऽपि कार्याभावादहो इत्याश्चर्ये। रह एकान्तम्। **त्रपौत्सुक्यादेरिति**। दरेत्यनेन त्रपा व्यङ्ग्या, निरीक्षणेन चौत्सुक्यमिति बोध्यम्। संयोगात्संबन्धात्। **रतिरिति**। नायिकाया इति शेषः। **शयित इति**। कर्तरि भूते क्तः। 'तदास्याननाम्बुजम्' इति पाठः। एव उक्तव्यवच्छेदे। स्वशब्देनेत्यस्य व्याख्या मनोरथेति। **सामान्येति**। मनोरथत्वेनेत्यर्थः। तथा च वाच्यस्याव्यङ्ग्यत्वमिति भावः। सामान्येत्यस्य व्याख्या मनोरथेति। यद्वा सामान्येनेच्छात्वेन। अवच्छिन्नत्वं तृतीयार्थः। चमत्काराभावे हेतुमाह—**न हीति**। तत्र हेतुमाह—**कथमपीति**। सामान्यरूपेण विशेषरूपेण चेत्यर्थः। एवं च ध्वनिविशेष एवैतद्बोध्यम्। स्पष्टश्चायमर्थो गूढाख्यगुणीभूतव्यङ्ग्यनिरूपणे पञ्चमोल्लासे रसदो-

नालिङ्गितस्यैव व्यङ्ग्यस्य चमत्कारित्वेनालंकारिकैः स्वीकारात् । चुम्बनेच्छाया रत्यनुभावतयैव सुन्दरत्वेन तदव्यञ्जने चुम्बमीति शब्दबलाचुम्बनेच्छावदचमत्कारित्वाच्च । एवं त्रपाया अपि न प्राधान्येन व्यङ्ग्यत्वम् । अनुवाद्यतावच्छेदकतया प्रतीतायां तस्यां मुख्यवाक्यार्थत्वायोगात् । न च दरमीलन्नयनात्वविशिष्टनिरीक्षणं विधेयमिति नानुवाद्यतावच्छेदकत्वं तस्या इति वाच्यम् । एवमपि नयनगतदरमीलनस्य तत्कार्यत्वेऽपि दरमीलन्नयनात्वविशिष्टनिरीक्षणस्य रतिमात्रकार्यत्वात् । त्रपाया एव मुख्यत्वेन व्यङ्ग्यत्वे निरीक्षणोक्तेरनतिप्रयोजनकत्वापत्तेः । वाच्यवृत्त्या रतेरनुभावे निरीक्षणे त्रपाया अनुभावस्य दरमीलनस्येव व्यञ्जनया तस्यां तस्या अपि गुणीभावप्रत्ययौचित्यात् ।

यथा वा—

'गुरुमध्यगता मया नताङ्गी निहता नीरजकोरकेण मन्दम् ।
दरकुण्डलताण्डवं नतभ्रूलतिकं मामवलोक्य घूर्णितासीत् ॥'

---

षनिरूपणे सप्तमोल्लासे च । व्यङ्ग्यस्य वाच्यीकरणे वमनाख्यदोष इति प्राञ्चः । नन्वत्र पक्षे यदेवोच्यते तदेव व्यङ्ग्यं यथा तु व्यङ्ग्यं न तथोच्यत इत्यादिपर्यायोक्तप्रकरणस्थमूलग्रन्थविरोधोऽत आह—**चुम्बनेच्छाया इति** । संशयालंकारनिरूपणे च स्फुटतरं निरूपयिष्यत एव ग्रन्थकृता । एवस्तदन्यथात्वेन तत्त्वव्यवच्छेदे । तदव्यञ्जने रत्यव्यञ्जने । एवमिच्छाया इव यथाकथंचित्तत्त्वसत्त्वादाह—**प्राधान्येनेति** । तस्यां त्रपायाम् । एवमग्रेऽपि । **मुख्येति** । मुख्यतया वाक्यतात्पर्यविषयत्वायोगादित्यर्थः । **तत्कार्येति** । त्रपाकार्येत्यर्थः । मात्रपदेन तदन्यव्यवच्छेदः । ननु मीलन्नयनात्वमेव विधेयमास्तामत आह—**त्रपाया इति** । त्रपाजनकतया निरीक्षणस्योपयोगादाह—**अनतीति** । ननु वैपरीत्येन निरीक्षणविशिष्टदरमीलन्नयनात्वमेव विधेयमास्तामत आह—**वाच्येति** । 'भावप्रधानमाख्यात'मिति सिद्धान्तादिति भावः । तस्यां रतौ । तस्यास्त्रपायाः । **गुरुमध्येति** । श्वश्र्वादिसमीपप्रदेशोपविष्टा । कमलमुकुलेन मन्दं नितरां हता । अत एव

---

१ दरमीलन्नयनेति विशेषणेन त्रपाभिव्यज्यते । विशेषणेन चानेन पूर्वसिद्धस्यार्थस्याऽनुवाद्यतैव प्रत्याय्यते, न त्वत्र विधानम् । ततश्च तादृशविशेषणोपस्थापिता त्रपाऽत्र प्रधानमिति न शक्यते वक्तुमित्याशयः ।

२ रतेरनुभावं निरीक्षणं प्रति त्रपाया अनुभावो दरमीलनं वाच्यवृत्त्या यथा गुणीभूतं स्वीक्रियते तथा व्यञ्जनावृत्त्या रतिं प्रति त्रपाया अपि गुणीभाव एवोचितः, न तु प्राधान्येन व्यङ्ग्यत्वमित्याशयः ।

अत्र घूर्णितासीदित्यनेनासमीक्ष्यकारिन्किमिदमनुचितं कृतवानसीत्यर्थसंवलितोऽमर्षश्चर्वणाविश्रान्तिधामत्वात्प्राधान्येन व्यज्यते । तत्र शब्दोऽर्थश्च गुणः ।

यथा वा—

'तल्पगतापि च सुतनुः श्वासासङ्गं न या सेहे ।
संप्रति सा हृदयगतं प्रियपाणिं मन्दमाक्षिपति ॥'

इदं च पद्यं मन्निर्मितप्रबन्धगतत्वेन पूर्वसाकाङ्क्षमिति दिङ्मात्रेण व्याख्यायते—या नववधूः पल्यङ्कशयिता श्वासस्यासङ्गमात्रेणापि संकुचदङ्गलतिकाभूत्सा संप्रति प्रस्थानपूर्वरजन्यां प्रवत्स्यत्पतिका प्रियेण सशङ्केन समर्पितं हृदि पाणिं नववधूजातिस्वाभाव्यादाक्षिपति, परं तु मन्दम् । अत्र शनैः स्वस्थानप्रापणात्मना मन्दाक्षेपेण रत्याख्यः स्थायी संलक्ष्यक्रमतया व्यज्यते । उपपादयिष्यते च स्थाय्यादीनामपि संलक्ष्यक्रम[1]व्यङ्ग्यत्वम् । अमुमेव च प्रभेदं ध्वनिमामनन्ति । यत्तु चित्रमीमांसायामप्पय्यदीक्षितैः 'निःशेषच्युतचन्दनम्' इति पद्यं ध्वन्युदाहरणप्रसङ्गे व्याख्या-

---

घूर्णनं भ्रमणम् । तादृशी सा मामवलोक्य दरेति नतेति च यथा स्यात्तथा घूर्णितासीदित्यन्वयः । मन्दत्वफलं **दरेति** । गुरुमध्यगतत्वान्नतेति । नायकोक्तिरियं सखायं प्रति । **कृतवानसीत्यर्थेति** । अस्याप्यमर्षं प्रति गुणतैव । तत्कार्यत्वात् । संवलितो विशिष्टः । **चर्वणेति** । पार्यन्तिकास्वादाश्रयत्वादित्यर्थः । तत्रामर्षे । अयमेव पूर्वोदाहरणाद्विशेषः । तल्पं शय्या । असहने हेतुगर्भं विशेषणं सुतनुरिति । स्वहृदयस्थितं शनैः स्वस्थानं प्रापयतीत्यर्थः । प्रबन्धो भामिनीविलासाख्यः । नवोढाप्रकरणादाह—**नवेति** । आङ् ईषदर्थे । संप्रतीत्यस्यार्थमाह—**प्रस्थानेति** । प्रकरणादाह—**प्रवदिति** । **सशङ्केनेति** । सुतनुत्वान्नाशशङ्केति भावः । **मन्दमिति** । भाविविरहशङ्कयेति भावः । **संलक्ष्येति** । व्यङ्ग्यव्यञ्ज-

१ स्फुटे प्रकरणे, झटिति प्रतीतेषु विभावानुभावव्यभिचारिषु, मार्मिकतमेन प्रमात्रा रसतया व्यपदेश्यः सोयं रत्यादिः सूक्ष्मतमेनैव समयेन प्रतीयत इति हेतुहेतुमतोः पौर्वापर्यक्रमस्याऽलक्ष्यत्वादलक्ष्यक्रम इति व्यपदेशः । यत्र तु विचारवेद्यं प्रकरणम्, न तु स्फुटम् । विभावादयोऽपि बुध्या उन्नेयास्तत्र रसाभिव्यक्तिसामग्रीविलम्बात् चमत्कृतेर्मान्थर्यम् । अत एव झगिति चमत्कारानुदयेन क्रमस्य संलक्ष्यतापि भवति । अस्मिन्पद्ये च 'संप्रति' इति पदेन "पूर्वं तस्या नववधूत्वे अन्यैव संकोचपरिस्थितिरासीत्, अधुना तु संकोचस्यापि क्रमिकः संकोच इति" पूर्वापरानुसंधानादर्थावगतिर्विलम्बेन । ततश्च क्रमस्य संलक्ष्यतेत्याशयः ।

तम्—'उत्तरीयकर्षणेन चन्दनच्युतिरित्यन्यथासिद्धिपरिहाराय निःशेषग्रहणम् । ततश्चन्दनच्युतेः स्नानसाधारण्यव्यावर्तनेन संभोगचिह्नोद्घाटनाय तटग्रहणम् । स्नाने हि सर्वत्र चन्दनच्युतिः स्यात्, तव तु स्तनयोस्तट उपरिभाग एव दृश्यते । इयमाश्लेषकृतैव । तथा निर्मृष्टरागोऽधर इत्यत्र ताम्बूलग्रहणविलम्बात्प्राचीनरागस्य किंचिन्मृष्टतेत्यन्यथासिद्धिपरिहाराय निर्मृष्टराग इति रागस्य निःशेषमृष्टतोक्ता । पुनः स्नानसाधारण्यव्यावर्तनेन संभोगचिह्नोद्घाटनायाधर इति विशिष्य ग्रहणम् । उत्तरोष्ठे सरागेऽधरोष्ठमात्रस्य निर्मृष्टरागता चुम्बनकृतैव' इत्यादिना, 'इदमपि ध्वनेरुदाहरणम्' इत्यन्तेन संदर्भेण । 'तटादिघटिता वाक्यार्थाः स्नानव्यावृत्तिद्वारा संभोगाङ्गानामाश्लेषचुम्बनादीनां प्रतिपादनेन प्रधानव्यङ्ग्यव्यञ्जने साहायकमाचरन्ति' इति, तदेतदलंकारशास्त्रतत्त्वानवबोधनिबन्धनम् । प्राचीनसकलग्रन्थविरुद्धत्वादुपपत्तिविरोधाच्च । तथा हि पञ्चमोल्लासशेषे 'निःशेषेत्यादौ गमकतया यानि चन्दनच्यवनादीन्युपात्तानि तानि कारणान्तरतोऽपि भवन्ति । यतश्चात्रैव स्नानकार्यत्वेनोपात्तानीति नोपभोग एव प्रतिबद्धानीत्यनैकान्तिकानि' इति काव्यप्रकाशकृतोक्तम् । तथा तत्रैव तेन—

'भम धम्मिअ वीसत्थो सो सुणओ अज्ज मालिदो तेण ।
गोलाणइकच्छनिकुडंगवासिणा दरिअसीहेण ॥'

---

कयोः क्रमः संलक्ष्यो यत्र तयेत्यर्थः । अयमेव पूर्वतो विशेषः । ननु स्थाय्यादीनामसंलक्ष्यक्रमव्यङ्ग्यत्वमेव प्राचीनैरुक्तमत आह—**उपेति** । असुमुत्तमोत्तमम् । व्याख्यानमेवाह—**उत्तरीयेत्याद्याचरन्तीत्यन्तेन** । इत्यादीत्यादिना प्रातर्दत्तमञ्जनं कालविलम्बेन किंचिद्विलुप्तमित्यन्यथासिद्धिपरिहाराय दूरमिति । अत्यर्थमित्यापाततोऽर्थः । एतेन कालान्यथासिद्धिनिरासः । पुनः स्नानसाधारण्यव्यावर्तनेन संभोगचिह्नोद्घाटनाय दूरे प्रान्त इति हृदयस्थितोऽर्थः । कालतः स्नानेन सर्वतोऽञ्जनलोपः स्यात्तव तु लोचनयोः क्वचित्प्रान्त एवानञ्जनत्वमिदं चुम्बनकृतमेवेत्यादिपरिग्रहः । वाक्यार्था विशेषणवाक्यार्थाः । प्रधानव्यङ्ग्यं संभोगः । तत्र ग्रन्थविरोधमाह—**पञ्चमोल्लासेति** । अस्योक्तमित्यत्रान्वयः । **गमकेति** । संभोगेत्यादिः । अत्रैव निःशेषेत्यादावेव । प्रतिबद्धानि जन्यतया न तत्रैव संबद्धानि । अनैकान्तिकानि साधारणानि । तत्रैव पञ्चमोल्लास एव । तेन प्रकाशकृता । अभ्युपगतमित्यत्रान्वयः । **भ्रमेति** । 'भ्रम धार्मिक विश्रब्धः स शुनकोऽद्य मारितस्तेन ।

इत्यादौ लिङ्गजलिङ्गिज्ञानरूपेणानुमानेन व्यक्तिं गतार्थयतो व्यक्तिविवेककृतो मतं प्रत्याचक्षाणेन व्यभिचारित्वेनासिद्धत्वेन च संदिह्यमानादपि लिङ्गाद्व्यञ्जनमभ्युपगतम् । इत्थमेव च ध्वनिकृतापि प्रथमोद्द्योते । एवं च व्यञ्जकानां साधारण्यं प्रतिपादयतां प्रामाणिकानां ग्रन्थैः सहासाधारण्यं प्रतिपादयतस्तव ग्रन्थस्य विरोधः स्फुटः । किं च यदिदं निःशेषेत्याद्यवान्तरवाक्यार्थानां वापीस्नानव्यावृत्तिद्वारेण व्यङ्ग्यासाधारण्यं संपाद्यते तत्किमर्थमिति पृच्छामः ? व्यङ्ग्यस्य व्यञ्जनार्थमिति चेन्न । व्यञ्जकगतासाधारण्यस्य व्यञ्जनानुपायत्वात् ।

'औण्णिद्दं दोब्बल्लं चिंता अलसंतणं सणीससिअम् ।
मह मंदभाइणीए केरं सहि तुह वि परिभवइ ॥'

इत्यादौ साधारणानामेवौन्निद्र्यादीनां वक्त्रादिवैशिष्ट्यवशादर्थविशेषव्यञ्जकताया अभ्युपगतेः । प्रत्युतासाधारण्यस्य व्याप्यपरपर्यायस्यानुमानानुकूलतया व्यक्तिप्रतिकूलत्वाच्च । अथ तटादिघटितत्वेऽपि न निःशेषेत्यादिवाक्यार्थानामसाधारण्यम् । सलिलार्द्रवसनकरणकप्रोञ्छनादिनापि तत्संभ-

---

गोदानदीकच्छनिकुञ्जवासिना दृप्तसिंहेन ॥' कुसुमावचयार्थं कुञ्जे धार्मिकपरिभ्रमणेन खण्डितसंकेतायास्तन्निवारणोक्तिरियम् । अत्र वाच्येन भीरुस्वभावस्य गृहे श्वनिवृत्त्या भ्रमणेन निकुञ्जे सिंहोपलब्ध्या भ्रमणनिषेधो व्यङ्ग्यः । **इत्थमेवेति** । उक्तं स्वीकृतं चेत्यर्थः । ननु तैः साधारण्ये व्यञ्जने स्वीकृतेऽसाधारण्ये सुतरामङ्गीकृतम्, प्रकृते च तथा संभवान्मयोपपादितमिति कस्तैर्विरोध इति चेत्सत्यम्, अत एवोपपत्तिविरोधोऽपरो दोषोऽभिहितस्तमुपपादयति—**किं चेत्यादि** । **व्यङ्ग्येति** । व्यङ्ग्यसंभोगं प्रत्यसाधारण्यमित्यर्थः । अनुपायत्वे हेतुमाह—**औण्णिद्दमिति** । 'औन्निद्र्यं दौर्बल्यं चिन्तालसत्वं सनिःश्वसितम् । मम मन्दभागिन्याः कृते सखि त्वामपि परिभवति ॥' कृतकामुकसंभोगां दूतीं प्रत्युपभोगचिह्नैस्तं ज्ञातवत्या नायिकाया इयमुक्तिः । साधारणानां रोगादितोऽपि तत्संभवात् । यथात्रैव नायिकायास्तद्वियोगतः । **वक्त्रादीति** । आदिना बोद्धव्यपरिग्रहः । ननु तस्य तदनुपायत्वेऽपि सति संभवे तत्प्रतिपादनमित्युक्तमेवात आह—**प्रत्युतेति** । **व्यक्तीति** । व्यञ्जनेत्यर्थः । एवमग्रेऽपि । एवं च व्यञ्जनासिद्धिरेव न स्यादिति भावः । तटादीत्यस्य वापीस्नानव्यावर्तनायेत्यादिः । आदिना जलबिन्दुपातादिपरिग्रहः । 'जातायाः' इति पाठः । नन्वत्र तदन्तिकमेव रन्तुं गतासीति प्राधान्येनाधमपदेन व्यज्यत इति प्रका-

वादिति चेत्तर्हि वापीस्नानव्यावर्तनेन कः पुरुषार्थः । एकत्रानैकान्तिकत्वस्येव बहुष्वनैकान्तिकताया अपि ज्ञाताया अनुमितिप्रतिकूलत्वाद्व्यत्त्ययप्रतिकूलत्वाच्च । अपि चात्र हि तदन्तिकमेव रन्तुं गतासीति व्यङ्ग्यशरीरे तदन्तिकगमनं रमणरूपफलांशश्चेति द्वयं घटकम् । तत्र तावत्तदन्तिकं गतासीत्यंशस्य त्वन्मते व्यङ्ग्यत्वं दुरुपपादम् । त्वदुक्तरीत्या विशेषणवाक्यार्थानां निःशेषेत्यादिप्रतिपाद्यानां वाच्यार्थे वापीस्नाने बाधितत्वाद्वाच्य[1]कक्षागतप्रधानवाक्यार्थीभूतविधिनिषेधप्रतिपादकाभ्यां गता न गतेति शब्दाभ्यां विरोधिलक्षणया निषेधस्य विधेश्च प्रतीतेरुपपत्तेः । नहि मुख्यार्थबाधेनोन्मीलितेऽर्थे व्यक्तिवेद्यतोचिता । यथा 'अहो पूर्णं सरो यत्र लुठन्तः स्नान्ति मानवाः' इत्यत्र कर्तृविशेषणानुपप[2]त्त्यधीनोल्लासे पूर्णत्वाभावे ।

अथ तदन्तिकगमनस्य लक्षणावेद्यत्वेऽपि रमणस्य फलां[3]शस्य लक्ष्यशक्तिमूलध्वननवेद्यत्वमव्याहतमेवेति चेत्, 'अधमत्वमप्रकृष्टत्वं तच्च जात्या कर्मणा वा भवति । तत्र जात्यापकर्षं नोत्तमनायिका नायकस्य वक्ति' इत्यादिना संदर्भेण भवतैवार्थापत्तिवेद्यतायाः स्फुटं वचनात् । अन्यलभ्यस्य

---

शकाराद्युक्तत्वात्स्नानव्यावृत्तिर्मया कृतात आह—**अपि चेति** । त्वन्मत इत्यनेन तेषां मते तत्सूपपादमिति सूचितम् । **त्वदुक्तेति** । तटादिघटितत्वरूपयेत्यर्थः । **निषेधस्येति** । यथाक्रममन्वयः । उन्मीलिते प्रकटिते । कर्तृविशेषणं लुठन्त इति । तदनुपपत्त्यधीन उल्लासो यस्य विरोधिलक्षणया पूर्णत्वाभावस्य तत्र यथा न व्यञ्जनावेद्यतेत्यर्थः । **लक्ष्येति** । लक्ष्यं तदन्तिकगमनं तस्य या शक्तिः सामर्थ्यं तन्मूलं यद्व्यञ्जनं तद्वेद्यत्वमित्यर्थः । आदिना 'नापि स्वापराधपर्यवसायिदूतीसंभोगादिहीनकर्मातिरिक्तेन

---

१ वाच्यकोटौ—वाक्यार्थे प्रधानीभूताभ्यां 'वापी स्नातुमितो गताऽसि' इति विधेः 'तस्य अधमस्य अन्तिकं न' इति निषेधस्य च प्रतिपादकाभ्यां 'गता' 'न गता' इति शब्दाभ्यां विपरीतलक्षणया 'गता' इति विधिस्थाने निषेधस्य 'न गता' इति निषेधस्य स्थाने च विधेश्च प्रतीत्या अर्थस्योपपादनं भवेत् । मुख्यार्थबाधे सति तु लक्षणा भवति, न व्यञ्जनेति प्रसिद्धम् । ततश्च तदन्तिकगमनरूपे व्यङ्ग्यस्य प्रथमांशेऽस्मिन् का वा व्यङ्ग्यतायाः प्रत्याशेत्याशयः ।

२ स्नानकर्तॄणां मानवानां 'लुठन्तः' इति विशेषणस्य सरःपूर्णत्वे अनुपपत्तिः । ततश्च विपरीतलक्षणया पूर्णत्वाऽभावे साधिते व्यक्तिवेद्यता यथा नोचिता भवति तथात्रेति संबन्धः ।

३ अर्थाद् व्यङ्ग्यशरीरघटकद्वितीयांशस्य ।

च शब्दार्थताया अस्वीकृतेः । अन्यच्च यथाकथंचिदङ्गीकुरु वात्र व्यञ्जना-व्यापारं तथापि न तवेष्टसिद्धिः । वाच्यानां निःशेषच्युतचन्दनस्तनतट-त्वादीनामधमत्वस्य च त्वदुक्तरीत्या प्रकारान्तरेणानुपपद्यमानतया दूती-संभोगमात्रनिष्पाद्यत्वेन गुणीभूतव्यङ्ग्यत्व[१]प्रसङ्गात् । एवं चोपपत्तिविरो-धो[२]ऽपि स्फुटतर एव । तस्माद्वाच्यार्थसाधारण्यमेवोचितमतिविदग्धनायि-कानिरूपितानां विशेषणवाक्यार्थानाम् । तथा हि—'अयि बान्धवजन-स्याज्ञातपीडागमे स्वार्थपरायणे स्नानकालातिक्रमभयवशेन नदीमदीयप्रि-ययोरन्तिकमगत्वैव वापीं स्नातुमितो ममान्तिकाद्गतासि, न पुनस्तस्य परवेदनानभिज्ञतया दुःखदातृत्वेनाधमस्यान्तिकम् । यतो निःशेष-च्युतचन्दनं स्तनयोस्तटमेव नोरःस्थलम्, वापीगतबहुलयुवजनत्रपा-पारवश्यादंसद्वयलग्नाग्रस्वस्तिकीकृतभुजलतायुगलेन तटस्यैवोन्नततया मुहु-रामर्शात् । एवं त्वरया सम्यगक्षालनेनोत्तरोष्ठो न निर्मृष्टरागोऽधरस्तु तद-पेक्षया गण्डूषजल-रदनशोधनाङ्गुल्यादीनामधिकसंमर्दमावहतीति तथा । किं च सम्यगक्षालनेन नेत्रे जलमात्रसंसर्गाद्दूरमुपरिभाग एवानञ्जने । शीतवशात्तानवाच्च तव तनुः पुलकितेति । एवं तस्या विदग्धाया गूढता-

---

कर्मणा, तादृशं हि दूतीप्रेषणात्प्राचीनं सर्वं सोढमेवेति नोद्घाटनार्हम्, अन्यथा स्वयं दूती-संप्रेषणानुपपत्तेः' इत्यादिपरिग्रहः । तस्यापि रमणस्यापि । ननु तद्वेद्यत्वेऽपि व्यञ्जना कुतो नात आह—**अन्येति** । 'अनन्यलभ्यो हि शब्दार्थः' इति न्यायादिति भावः । **यथा-कथंचिदिति** । अर्थापत्तिप्रमाणस्यातिरिक्तस्याभावादिति भावः । अत्र रमणे । **संभो-गमात्रेति** । तदन्येन वाच्यस्य सिद्धेरेवाभावादिति भावः । उपसंहरति—**एवं चेति** । उक्तरीत्या गुणीभूतव्यङ्ग्यत्वप्रसङ्गे चेत्यर्थः । एवं चात्र तदनुरोधेन तथोक्तावुपपत्तिविरो-धवत्तत्र तदनुरोधत्यागेनासाधारण्यप्रतिपादनं तद्विरुद्धमेव तदाह—**अपीति** । कथं तर्हि तस्य व्यङ्ग्यत्वं प्रकाशाद्युक्तमाह—**तस्माद्वाच्यार्थेति** । वापीस्नानेत्यर्थः । **निरूपि-तेति** । बोधितेत्यर्थः । गमे इत्यन्तव्याख्या स्वार्थेति । अन्तिकमित्यत्र गतासीत्यनुषङ्गः । एवं त्रपापारवश्यात् । तथा निर्मृष्टरागः । तन्वीत्यस्यार्थमाह—**तानवाच्चेति** । कृशत्वा-

---

१ तदन्तिकं रन्तुमेव गतासीति व्यङ्ग्यार्थेनैव अधमत्वरूपवाच्यार्थस्योपपादनात् ।

२ ध्वनेरिदमुदाहरणमिति स्वोपपादनस्य विरोधः । किंवा—उपपत्ति—( युक्ति— )द्वारापि भव-त्कथने विरोधः इत्यर्थः ।

त्पर्यैवोक्तिरुचिता, अन्यथा वैदग्ध्यभङ्गापत्तेः। एवं साधारणेष्वेषु वाक्यार्थेषु मुख्यार्थे बाधाभावात्तात्पर्यार्थस्य झटित्यनाकलनात्कुतोऽत्र लक्षणावकाशः। अनन्तरं च वाच्यार्थप्रतिपत्तेर्वक्तृबोद्धव्यनायकादीनां वैशिष्ट्यस्य प्रतीतौ सत्यामधमपदेन स्वप्रवृत्तिप्रयोजको दुःखदातृत्वरूपो धर्मः साधारणात्मा वाच्यार्थदशायामपराधान्तरनिमित्तकदुःखदातृत्वरूपेण स्थितो व्यञ्जनाव्यापारेण दूतीसंभोगनिमित्तकदुःखदातृत्वाकारेण पर्यवस्यतीत्यालंकारिकसिद्धान्तनिष्कर्षः। एतेन 'अधमत्वमपकृष्टत्वं तच्च जात्या कर्मणा वा भवति। तत्र जात्याऽपकर्षं नोत्तमनायिका नायकस्य वक्ति। नापि स्वापराधपर्यवसायिदूतीसंभोगादिहीनकर्मातिरिक्तेन कर्मणा। तादृशं च दूतीसंप्रेषणात्प्राचीनं सोढमेवेति नोद्घाटनार्हमितीतरव्यावृत्त्या संभोगरूपमेव पर्यवस्यति' इति यदुक्तम्, तदपि निरस्तम्। विदग्धोत्तमनायिकायाः सखीसमक्षं तदुपभोगरूपस्य स्वनायकापराधस्य स्फुटं प्रकाशयितुमतितमामनौचित्येन प्राचीनानामेव सोढानामप्यपराधानामसह्यतया दूतीं प्रति प्रतिपिपादयिषितत्वादिति दिक्।

---

च्चेत्यर्थः। उपसंहरति—**एवमिति**। उक्तप्रकारेत्यर्थः। प्रागुक्तलक्षणापत्तिदोष इह नेत्याह—**एवमिति**। मुख्यार्थे वापीस्नाने। **अनन्तेति**। वाच्यार्थप्रतिपत्तेरनन्तरं चेत्यर्थः। वक्त्री विदग्धोत्तमनायिका। बोद्धव्या दुःशीला दूती। नायकस्तादृशः। आदिना काक्वादिपरिग्रहः। **अधमपदेनेति**। बोधित इति शेषः। **स्वेति**। अधमपदप्रवृत्तिनिमित्तमित्यर्थः। **साधारणेति**। तादृशकर्मान्तरसाधारणेत्यर्थः। **दातृत्वरूपेण स्थित इति**। अधमपदप्रवृत्तिनिमित्तस्य सकलाधमसाधारणस्यैकस्याभावात्तत्तद्धर्मास्तत्र तत्र प्रवृत्तिनिमित्ततया स्वीकार्याः। प्रकृते तु दुःखदातृत्वरूपो धर्मः। तत्र च वाच्यकक्षायां दुःखत्वेन रूपेणापराधान्तरनिमित्तं दुःखं प्रकरणादिवशाद्घटकीभूय भासते। व्यङ्ग्यकक्षायां तु दूतीसंभोगनिमित्तदुःखत्वेन दूतीसंभोगनिमित्तकं दुःखमिति भावः। तदभिप्रायेणोच्यते–स्थितः पर्यवस्यतीति चेति। **स्वापेति**। स्वं नायिका। दूतीसंभोगादिरूपं यद्धीनकर्मेत्यर्थः। एतेनेत्यस्यार्थमाह—**विदेति**। **तदुपेति**। दूत्युपेत्यर्थः। अतितमामत्यन्तम्। **प्राचीति**। दूतीसंप्रेषणादित्यादिः। अन्यथा वैदग्ध्यादिभङ्गापत्तिः। दोषान्तरमपि प्रागुक्तं तदाह—**दिगिति**।

---

१ विदग्धायास्तस्याः सेयमुक्तिर्गूढतात्पर्या। ततश्च तात्पर्यार्थस्य सहसैव भानाभावात्तात्पर्यानुपपत्तिमाश्रित्याऽवतरन्ती लक्षणा कथं संभवेदित्याशयः।

**यत्र व्यङ्ग्यमप्रधानमेव सचमत्कारकारणं तद्द्वितीयम् ॥**

वाच्यापेक्षया प्रधानीभूतं व्यङ्ग्यान्तरमादाय गुणीभूतं व्यङ्ग्यमादायातिव्याप्तिवारणायावधारणम्[1]। तेन तस्य ध्वनित्वमेव। लीनव्यङ्ग्यवाच्यचित्रातिप्रसङ्गवारणाय[2] चमत्कारेत्यादि। यत्तु 'अतादृशि गुणीभूतव्यङ्ग्यम्' इत्यादिकाव्यप्रकाशगतलक्षणे चित्रान्यत्वं[3] टीकाकारैर्दत्तम्, तन्न। पर्यायोक्तसमासोक्त्यादिप्रधानकाव्येष्वव्याप्त्यापत्तेः। तेषां गुणीभूतव्यङ्ग्यतायाश्चित्रतायाश्च सर्वालंकारिकसंमतत्वात्।

उदाहरणम्—

'राघवविरहज्वालासंतापितसह्यशैलशिखरेषु।

शिशिरे सुखं शयानाः कपयः कुप्यन्ति पवनतनयाय ॥' इति।

अत्र जानकीकुशलावेदनेन राघवः शिशिरीकृत इति व्यङ्ग्यमाकस्मिक-

---

द्वितीयमुत्तमम्। **वाच्येति**। वाच्यार्थतः प्रधानमन्यव्यङ्ग्यादप्रधानं यद्व्यङ्ग्यं तदादायेत्यर्थः। अपराङ्गोदाहरणे 'अयं स रशनोत्कर्षी' इत्यत्रापि वाच्यापेक्षया शृङ्गारस्य न प्राधान्यम्। शोकोत्कर्षकतया शृङ्गाररूपव्यङ्ग्यापेक्षया वाच्यस्यैव चमत्कारकारित्वात्। एवं सर्वत्रापराङ्गोदाहरणेषूह्यम्। अवधारणे एवः। तस्य सांप्रतमुक्तस्य। लीनव्यङ्ग्येति बहुव्रीहिः। शब्दचित्रे तदभावादाह—**वाच्येति**। तत्रोत्तमत्वादिप्रसङ्गेत्यर्थः। **उदेति**। लक्षितद्वितीयकाव्योदाहरणमित्यर्थः। **राघवविरहेति**। सीतावियोगकृत-

---

१ अर्थात् 'एव'कारनिवेशः। अयं भावः—यद्यत्र 'व्यङ्ग्यमप्रधानमेव सत्' इत्यवधारणं न दीयेत तर्हि 'व्यङ्ग्यमप्रधानं सत् चमत्कारकम्' इत्यर्थो भवेत्। ततश्च 'अयं स रशनोत्कर्षी'त्याद्यपराङ्गोदाहरणेषु करुणापेक्षया अप्रधानं शृङ्गारश्चमत्कारकारणमस्तीति ध्वनित्वस्थाने अस्याप्युत्तमकाव्यत्वं प्रसज्येत। एवकारनिवेशे तु—यद् व्यङ्ग्यमप्रधानमेव सदित्युक्त्या करुणापेक्षया गुणत्वेपि वाच्यार्थापेक्षया शृङ्गारस्य प्राधान्यमस्तीति ध्वनिकाव्यत्वमस्याऽव्याहतम्। अत्र 'अयं स रशनोत्कर्षी'त्यत्र वाच्यापेक्षया शृङ्गारस्य न प्राधान्यम्, वाच्यस्यैव शोकोत्कर्षकतया चमत्कारित्वात्' इति नागेशोक्तिस्तु मूलविरुद्धा केवलं भ्रमापादिकैव। पूर्ववृत्तशृङ्गारस्य करुणप्रसङ्गे शोकोत्कर्षकतया चमत्कारित्वस्य प्रदीपाद्यङ्गीकृतत्वात्।

२ वाच्य—चित्रकाव्येषु व्यङ्ग्यं लीनं भवति, न तत्कृतश्चमत्कारः। तेष्वतिप्रसक्तिवारणाय चमत्कारकमित्युक्तम्।

३ चित्रान्यत्वं वाच्यचित्रादि—अलंकारप्रधानककाव्यभिन्नत्वम्।

४ राघवप्रीतिभाजने हनूमति 'जानकीकुशलसूचनेन रामः शिशिरीकृतः' इति व्यङ्ग्यं विना कपीनामकस्मात्कोपो नोपपद्यते। अतो वाच्यकोपोपपादकतया व्यङ्ग्यं गुणीभूतमित्याशयः।

कपिकर्तृक-हनूमद्विषयककोपोपपादकतया गुणीभूतमपि दुर्दैववशतो दास्यमनुभवद्राजकलत्रमिव काममपि कमनीयतामावहति । नन्वेवं प्रागुक्तमाक्षेपगतं मान्द्यमपि नववधूप्रकृतिविरोधादनुपपद्यमानं व्यङ्ग्येनैवोपपाद्यत इति कथमुत्तमोत्तमता तस्य काव्यस्येति चेत्, न । यतो ह्यनुदिनसख्युपदेशादिभिरनतिचमत्कारिभिरप्युपपद्यमानं मान्द्यमिदं प्रथमचित्तचुम्बिनीं विप्रलम्भरतिमप्रकाशयन्न प्रभवति स्वातन्त्र्येण परनिर्वृतिचर्वणागोचरतामाधातुम् । इत्थमेव निःशेषच्युतचन्दनमित्यादिपद्येष्वधमत्वादीनि वाच्यानि व्यङ्ग्यातिरिक्तेनार्थेनापाततो निष्पन्नशरीराणि[1] व्यञ्जकानीति न तत्रापि गुणीभावः शङ्कनीयः । अनयोर्भेदयोरनपह्नवनीयचमत्कारयोरपि प्राधान्याप्राधान्याभ्यामस्ति कश्चित्सहृदयवेद्यो[2] विशेषः । यत्तु चित्रमीमांसाकृतोक्तम्—

'प्रहरविरतौ मध्ये वाह्नस्ततोऽपि परेण वा
किमुत सकले याते वाऽह्नि प्रिय त्वमिहैष्यसि ।
इति दिनशतप्राप्यं देशं प्रियस्य यियासतो
हरति गमनं बालाऽऽलापैः सबाष्पगलज्जलैः ॥'

इत्यत्र सकलमहः परमावधिस्ततः परं प्राणान्धारयितुं न शक्नोमीति व्यङ्ग्यं प्रियगमननिवारणरूपवाच्यसिद्ध्यङ्गमतो गुणीभूतव्यङ्ग्यम्' इति । तन्न । सबाष्पगलज्जलानां प्रहरविरतावित्याद्यालापानामेव प्रियगमननिवा-

---

रामविरहानलज्वालासंतापितसह्यनामकाद्रिशिखरेषु शिशिरितौ सुखं यथा तथा शयाना इत्यादिरर्थः । कोपो वाच्यः । प्रागुक्तं ध्वनितृतीयलक्ष्ये 'तल्पगतापि च' इति पद्ये उक्तम् । व्यङ्ग्येनैव रत्याख्यस्थायिनैव । एवोऽन्यव्यवच्छेदे । प्रथममेव । चित्तारूढामित्यर्थः । **अप्रेति** । अव्यञ्जयन् । **स्वेति** । मन्दत्वमात्रेणेत्यर्थः । **परेति** । परमसुखास्वादविषयतामित्यर्थः । अर्थेनापराधान्तरनिमित्तकदुःखदातृत्वरूपेण । तत्र तात्पर्याभावादाह—**आपातत इति** । ननूक्तभेदयोश्चमत्कृतेस्तौल्यादैक्यमेवास्तामत आह—**अनयोरिति । प्रहरविरताविति** । हे प्रिय, त्वं किं प्रहरसमाप्तौ दिनमध्ये याते

---

१ अधमत्वादीनि केवलं दूतीसंभोगकारित्वमात्रेणैव न निष्पद्यन्ते, अपराधान्तरकृतदुःखदातृत्वेनापि संभवन्तीति व्यङ्ग्यमात्रोपपाद्यत्वं वाच्यस्य नास्तीत्याशयः ।

२ व्यङ्ग्यकृतचमत्कारो ह्युभयत्राऽप्यनपह्नवनीयः ( न निगूहनीयः ) तथापि उत्तमोत्तमे ध्वनिकाव्ये ( प्रथमे ) व्यङ्ग्यस्य प्राधान्यम्, उत्तमे गुणीभूतव्यङ्ग्ये ( द्वितीये ) च तस्याऽप्राधान्यमिति द्वयोर्विशेषः हृदयैरेव बुध्यत इत्यर्थः ।

रणरूपवाच्यसिद्ध्यङ्गतया व्यङ्ग्यस्य गुणीभावाभावात्। आलापैरिति तृतीयया प्रकृत्यर्थस्य हरणक्रियाकरणतायाः स्फुटं प्रतिपत्तेः। न च व्यङ्ग्यस्यापि वाच्यसिद्ध्यङ्गतात्र संभवतीति तथोक्तमिति वाच्यम्। निःशेषच्युतचन्दनमित्यादाविवाधमत्वरूपवाच्यसिद्ध्यङ्गताया दूतीसंभोगादौ संभवाद्गुणीभावापत्तेः। अस्तु वा ततः परं प्राणान्धारयितुं न शक्नोमीति व्यङ्ग्यस्य वाच्यसिद्ध्यङ्गतया गुणीभावस्तथापि नायकादेर्विभावस्य बाष्पादेरनुभावस्य चित्तावेगादेश्च संचारिणः संयोगादभिव्यज्यमानेन विप्रलम्भेन ध्वनित्वं को निवारयेत्।

**यत्र व्यङ्ग्यचमत्कारासमानाधिकरणो[1] वाच्यचमत्कारस्तत्तृतीयम्॥**

यथा यमुनावर्णने—'तनयमैनाकगवेषणलम्बीकृतजलधिजठरप्रविष्टहिमगिरिभुजायमानाया भगवत्या भागीरथ्याः सखी' इति। अत्रोत्प्रेक्षा वाच्यैव चमत्कृतिहेतुः। श्वैत्यपातालतलचुम्बित्वादीनां चमत्कारो

---

वा मध्याह्नादपि परेण तृतीयप्रहरेण यातेन वा सर्वदिने गते वेह मत्समीपे उत निश्चयेनैष्यस्यागमिष्यसीत्येवं प्रकारेण। आलापेऽस्यान्वयः। अग्रे स्पष्टम्। शतशब्दोऽनियतसंख्यावाची। एवमुक्तव्यङ्ग्यव्यवच्छेदे। व्यङ्ग्यस्य शक्नोमीत्यन्तस्य। ननु विनिगमनाविरहोऽत आह—**आलापैरिति**। प्रकृत्यर्थस्य तादृशालापस्य। अपिरुक्तसमुच्चये। ननु सबाष्पगलज्जलतदुक्तालापानां गमनोत्तरचिरकालावस्थितिनिवारकतयाप्युपपत्तेर्व्यङ्ग्यसहितानामेव गमननिवारणसामर्थ्यमत आह—**अस्तु वेति**। आन्तरालिकव्यङ्ग्यमादायैव ध्वनिगुणीभूतव्यङ्ग्यादिव्यवहारस्योपपद्यमानतया विप्रलम्भेन ध्वनित्वं को निवारयेदिति चिन्त्यम्। अन्यथा 'ग्रामतरुणम्' इत्यादिगुणीभूतव्यङ्ग्यीयप्रकाशाद्युक्तोदाहरणानामप्यसंगत्यापत्तौ व्याकुली स्यात्। तत्रापि व्यङ्ग्यसंकेतभङ्गेन वाच्यैर्[2]मुखमालिन्यातिशयरूपानुभावमुखेनैव विप्रलम्भाभासपोषणं न केवलेन संकेतभङ्गेन। तस्याकर्तव्यत्वबुद्ध्यापि संभवादिति बोध्यम्।

**व्यङ्ग्येति**। तदसमानाधिकरणत्वं चास्फुटतया बोध्यम्। हिमाचलस्य मैनाकः पुत्रः। लम्बीकृतत्वप्रविष्टत्वे भुजविशेषणे। तद्वदाचरिता। 'उपमानादाचारे' इति क्यङ्। सखी यमुना वाच्यैव। तदर्थे क्यङः सत्त्वात्। अत्र श्वेतपातालतलगामिनी भागीरथी तादृशविशिष्टभुजत्वेनोत्प्रेक्ष्यते। एवव्यावर्त्यं व्यङ्ग्यमाह—**श्वैत्येति**। व्यङ्ग्यानामिति

---

१ व्यङ्ग्यकृतचमत्कारस्य असमानाऽधिकरणः (असहवासी), व्यङ्ग्यचमत्काराऽपेक्षया वाच्यचमत्कारः स्पष्ट उत्कृष्टश्च यत्र स्यात् इत्याशयः।

२ व्यङ्ग्यद्वारा वाच्यस्य (मुखमालिन्यस्य) अतिशयः स्वयं श्रीमतैव स्वीक्रियते अत **एव** नात्र ध्वनित्वम्। चरमं विप्रलम्भाभासमादाय तु ध्वनित्वमनुमतमेव तन्[illegible]।

लेशतया सन्नप्युत्प्रेक्षाचमत्कृतिजठरनिलीनो नागरिकेतरनायिकाकल्पितकाश्मीरद्रवाङ्गरागनिगीर्णो निजाङ्गगौरिमेव प्रतीयते । न तादृशोऽस्ति कोऽपि वाच्यार्थो यो मनागनामृष्टप्रतीयमान एव स्वतो रमणीयतामाधातुं प्रभवति । अनयोरेव द्वितीयतृतीयभेदयोर्जागरूकाजागरूकगुणीभूतव्यङ्ग्ययोः[1] प्रविष्टं निखिलमलंकारप्रधानं काव्यम् ।

**८ यत्रार्थचमत्कृत्युपस्कृता शब्दचमत्कृतिः प्रधानं तदधमं चतुर्थम् ॥**

यथा—

'मित्रात्रिपुत्रनेत्राय त्रयीशात्रवशत्रवे ।
गोत्रारिगोत्रजत्राय गोत्रात्रे ते नमो नमः ॥' इति ।

अत्रार्थचमत्कृतिः शब्दचमत्कृतौ लीना । यद्यपि यत्रार्थचमत्कृतिसामान्यशून्या शब्दचमत्कृतिस्तत्पञ्चममधमाधममपि काव्यविधासु गणयितुमुचितम् । यथैकाक्षरपद्यार्धावृत्तियमकपद्मबन्धादि । तथापि रमणीयार्थप्रतिपादकशब्दतारूपकाव्यसामान्यलक्षणानाक्रान्ततया वस्तुतः

---

शेषः । **नागेति** । ग्रामीणेत्यर्थः । अत एव सम्यग्लेपनात्स्वाङ्गगौरत्वनिगरणम् । काश्मीरद्रवः केसररसः । सन्नपीत्यनेन व्यङ्ग्यासमानाधिकरणत्वमित्येव कुतो नोक्तमित्यस्य निरासः । तदाह—**न तादृश इति** । **मनागिति** । ईषदस्पृष्टव्यङ्ग्य एवेत्यर्थः । उपस्कृतत्वं पोषितत्वम् । अत एव तस्याः प्राधान्यम् । **मित्रेति** । गोत्रात्र इति तृजन्तस्य चतुर्थ्यन्तम् । शिवाय विष्णवे वा । सूर्याचन्द्रनेत्राय । त्रयी वेदत्रयी तत्र शात्रवं शत्रुत्वं यस्य मदनस्य, येषां वा दैत्यानाम्, तच्छत्रवे । गोत्रारिरिन्द्रस्तद्गोत्रजा देवास्तद्रक्षकायेत्यर्थः । **लीनेति** । अप्रधानत्वेनास्फुटत्वादिति भावः । न्यूनतां परिहरति—**यद्यपीति** । विधासु भेदेषु । महत्त्वेन तथानिबन्धे योग्यता सूचिता । परम्परामित्यनेनान्धपरम्परावदविचारः सूचितः । काव्येषु तत्र तत्र स्थलविशेषे । प्राचीनोक्तेः सूचितासांगत्यहेतुमाह—**वस्तुत इति** । केचित् प्रकाशकारादयः । एवं तारतम्यज्ञत्वेन । 'विनिर्गतं मानदमात्ममन्दिराद्भवत्युपश्रुत्य यदृच्छयापि यम् । ससंभ्रमेन्द्रद्रुतपातितार्गला निमीलिताक्षीव भियामरावती ॥' इति प्रकाशाद्युक्तम् । 'स च्छिन्न-

---

१ जागरूकः चमत्कृतिशाली गुणीभूतो व्यङ्ग्यो यस्मिन् स च, अजागरूको मन्दायमानः गुणीभूतो व्यङ्ग्यो यस्मिन्स चेति तयोः ।

काव्यत्वाभावेन महाकविभिः प्राचीनपरम्परामनुरुन्धानैस्तत्र तत्र काव्येषु निबद्धमपि नास्माभिर्गणितम्, वस्तुस्थितेरेवानुरोध्यत्वात् । केचिदिमानपि चतुरो भेदानगणयन्त उत्तममध्यमाधमभावेन त्रिविधमेव काव्यमाचक्षते । तत्रार्थचित्र-शब्दचित्रयोरविशेषेणाधमत्वमयुक्तं वक्तुम्, तारतम्यस्य स्फुटमुपलब्धेः । को ह्येवं सहृदयः सन् 'विनिर्गतं मानदमात्ममन्दिरात्', 'स च्छिन्नमूलः क्षतजेन रेणुः' इत्यादिभिः काव्यैः 'स्वच्छन्दोच्छलद्' इत्यादीनां पामरश्लाघ्यानामविशेषं ब्रूयात् । सत्यपि तारतम्ये यद्येकभेदत्वं कस्तर्हि ध्वनिगुणीभूतव्यङ्ग्ययोरीषदन्तरयोर्विभिन्नभेदत्वे दुराग्रहः । यत्र च शब्दार्थचमत्कृत्योरैकाधिकरण्यं तत्र तयोर्गुणप्रधानभावं पर्यालोच्य यथालक्षणं[१] व्यवहर्तव्यम् । समप्राधान्ये तु मध्यमतैव ।

यथा—

'उल्लासः फुल्लपङ्केरुहपटलपतन्मत्तपुष्पंधयानां
निस्तारः शोकदावानलविकलहृदां कोकसीमन्तिनीनाम् ।
उत्पातस्तामसानामुपहतमहसां चक्षुषां पक्षपातः
संघातः कोऽपि धाम्नामयमुदयगिरिप्रान्ततः प्रादुरासीत् ॥'

---

मूलः क्षतजेन रेणुस्तस्योपरिष्टात्पवनावधूतः । अङ्गारशेषस्य हुताशनस्य पूर्वोत्थितो धूम इवाबभासे ॥' इत्यप्पयदीक्षितोक्तम् । काव्यैः, अर्थचित्रैरिति शेषः । 'स्वच्छन्दोच्छलदच्छकच्छकुहरच्छातेतराम्भश्छटामूर्च्छन्मोहमहर्षिहर्षविहितस्नानाह्निकाह्नाय वः । भिन्द्यादुद्यदुदारदर्दुरदरीदैर्घ्यादरिद्रद्रुमद्रोहोद्रेकमहोर्मिमेदुरमदा मन्दाकिनी मन्दताम् ॥' इति प्रकाशायुक्तम् । **पामरेति** । शब्दचित्रत्वादिति भावः । **ईषदन्तरेति** । प्राधान्याप्राधान्यकृतेत्यर्थः । **उल्लास इति** । रविवर्णनम् । उदयाचलप्रान्तभागादयं कोऽपि विलक्षणो धाम्नां तेजसां समूहः प्रादुर्भवति । तत्र रूपकं चतुर्धा । विकसितकमलसमूहमध्यावधिकनिःसरणयुतरसपानजोन्मादवद्भ्रमराणामुल्लासः । तादृशकोकीनां निस्तारो दुःखोद्धर्ता । नाशिततेजसां तामसानां तमःसमूहानामुत्पातो नाशकः । नेत्राणां पक्षपातः सहकारी । 'आवृत्तवर्णसंपूर्णं वृत्त्यनुप्रासवद्वचः । ओजः स्यात्प्रौढिरर्थस्य संक्षेपो वाति-

---

१ लक्षणानुसारम् । अर्थचमत्कृतिप्राधान्ये मध्यमत्वम्, शब्दचमत्कृतिप्राधान्ये चाऽधमत्वं व्यपदेश्यमित्याशयः ।

अत्र वृत्त्यनुप्रासप्राचुर्यादोजोगुणप्रकाशकत्वाच्च शब्दस्य, प्रसादगुणयोगादनन्तरमेवाधिगतस्य रूपकस्य हेत्वलंकारस्य वा वाच्यस्य, चमत्कृत्योस्तुल्यस्कन्धत्वात्सममेव प्राधान्यम् ।

तत्र ध्वनेरुत्तमोत्तमस्यासंख्यभेदस्यापि सामान्यतः केऽपि भेदा निरूप्यन्ते—द्विविधो ध्वनिः, अभिधामूलो लक्षणामूलश्च । तत्राद्यस्त्रिविधः । रसवस्त्वलंकारध्वनिभेदात् । रसध्वनिरित्यलक्ष्यक्रमोपलक्षणाद्रसभावतदाभासभावशान्तिभावोदयभावसंधिभावशबलत्वानां ग्रहणम् । द्वितीयश्च द्विविधः । अर्थान्तरसंक्रमितवाच्योऽत्यन्ततिरस्कृतवाच्यश्च । एवं पञ्चात्मके ध्वनौ परमरमणीयतया रसध्वनेस्तदात्मा रसस्तावदभिधीयते—

समुचितललितसंनिवेशचारुणा काव्येन समर्पितैः सहृदयहृदयं प्रविष्टैस्तदीयसहृदयतासहकृतेन भावनाविशेषमहिम्ना विगलितदुष्यन्तरमणीत्वादिभिरलौकिकविभावानुभावव्यभिचारिशब्दव्यपदेश्यैः शकुन्तलादिभिरालम्बनकारणैः, चन्द्रिकादिभिरुद्दीपनकारणैः, अश्रुपातादिभिः कार्यैः, चिन्तादिभिः सहकारिभिश्च, संभूय प्रादुर्भावितेनालौकिकेन व्यापारेण तत्कालनिवर्तितानन्दांशावरणाज्ञानेनात एव प्रमुष्टपरिमितप्रमातृत्वादिनिजधर्मेण प्रमात्रा स्वप्रकाशतया वास्तवेन

---

भूयसः ॥ यस्मादन्तःस्थितः सर्वः स्पष्टमर्थोऽवभासते । सलिलस्येव सूक्तस्य स प्रसाद इति स्मृतः ॥' इति तल्लक्षणानि बोध्यानि । रूपकस्योल्लासाद्यभेदरूपकस्य । ननूल्लासादीनां तत्कार्यत्वात्कथं रूपकमत आह—**हेत्वलमिति** । 'हेतोर्हेतुमता सार्धं वर्णनं हेतुरुच्यते' इति तल्लक्षणम् । तत्र चतुर्णां मध्ये । त्रैविध्योपपत्तये आह—**रसेति** । एतेनाधिक्यात्त्रैविध्यमनुपपन्नमित्यपास्तम् । **तदाभासेति** । रसाभासभावाभासेत्यर्थः । एतेषां स्वरूपाण्यग्रे स्फुटीभविष्यन्ति । एवमुक्तप्रकारेण । घटकत्वं सप्तम्यर्थः । रसध्वनेः परमरमणीयतयेत्यर्थः । तदात्मा ध्वन्यात्मा । **समुचितेति** । तत्तद्रससमुचितेत्यर्थः । अत एव ललित इति बोध्यम् । सहकारिभिश्चेत्यस्य चर्व्यमाणैरिति शेषः । **आनन्दांशेति** । आनन्दांशस्यावरणरूपमज्ञानं यस्येति बहुव्रीहिः । प्रमातृविशेषणमिदम् । अत